॥ शिशुपालवधम् ॥

॥ श्रीमाघकविकृतम् ॥


साधारणविद्योत्साहकसमाजाधिपतोषितम्

श्रीमत्तारानाथतर्कवाचस्पतिभट्टाचार्य्यादिविबुधवरैर्विशोधितम्

श्रीमद्दत्तवंशावतंसश्रीबाबूरसमयदत्तमहाशयानामाज्ञया
कलिकाताराजधान्यां सारसुधानिधिमुद्रायन्त्रे
मुद्रितमभूत्

अङ्काङ्गाद्रिशशाङ्कसम्मितशके माघस्य पूर्व्वे दले
यन्त्रे सारसुधानिधौ सुललितं सर्व्वङ्कषालङ्कृतम् ।
तारानाथधरामरादिविबुधैः श्रीलैः समाशोधितं
श्रीमद्दत्तकुलाग्रणीरसमयादेशादभून्मुद्रितम् ॥

१७६९



॥ श्रीगणेशाय नमः ॥

इन्दीवरदलश्याममिन्दिरानन्दकन्दलम्।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम्॥ १ ॥
दन्ताङ्कुरेण धरणीतलमुन्नमय्य
पातालकेलिषु धृतादिवराहलीलम्।
उल्लाघलोत्फणफणाधरगोत्रसाल
क्रीडावदानमिभराजमुखं नमामः ॥ २ ॥
शारदा शारदाम्भोजवदना वदनाम्बुजे।
सर्व्वदा सर्व्वदास्माकं सन्निधिं सन्निधिं क्रियात्॥ ३ ॥
वाणीं काणभुजीमजीगणदवाशासीच्च वैयासिकी
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत्।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः॥ ४ ॥
मल्लिनाथः सुधीः सोऽयं महोपाध्यायशब्दभाक्।
विधत्ते माघकाव्यस्य व्याख्यां सर्व्वङ्कषाभिधाम्॥ ५ ॥
ये शब्दार्थपरीक्षणप्रणयिनो ये वा गुणालङ्क्रिया
शिक्षाकौतुकिनो विदग्धमनसो ये च ध्वनेरध्वगाः।
क्षुभ्यद्भावतरङ्गिते रससुधापूरे निमज्जन्ति ये
तेषामेव कृते करोमि विवृतिं माघस्य सर्व्वङ्कषाम्॥ ६ ॥

नेतास्मिन्यदुनन्दनः स भगवान्वीरप्रधानो रसः
शृङ्गारादिभिरङ्गवान्विजयते पूर्णा पुनर्व्वर्णना ।
इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं
धन्यो माघकविर्व्वयन्तु कृतिनस्तत्सूक्तिसंसेवनात् ॥ ७ ॥

इहान्वयमुखेनैव सर्व्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥ ८ ॥

॥ श्रीगणेशाय नमः ॥

॥ शिशुपालबधम् ॥

॥ प्रथमः सर्गः ॥

श्रियः पतिः श्रीमति शासितुं जग
ज्जगन्निवासो वसुदेवसद्मनि।
वसन् ददर्शावतरन्तमम्बरा
द्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥ १ ॥

अथ तत्रभवान् माघकविः काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे। इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनताङ्काव्यालापांश्च वर्ज्जयेदिति निषेधस्यासत्काव्यविषयताञ्च पश्यन् शिशुपालबधाख्यं काव्यं चिकीर्षुः चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात् आशीर्नमस्क्रिया वस्तुनिर्द्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च काव्यफलं शिशुपालबधबीजभूतं भगवतः श्रीकृष्णस्य नारददर्शनरूपं वस्तु

आदौ श्रीशब्दप्रयोगपूर्व्वकं निर्द्दिशन् कथामुपचिपति । श्रियइति । तत्रादौ श्रीशब्दप्रयोगात् वर्णगणादिशुद्धेरभ्युच्चय: । तदुक्तम् । देवतावाचका: शब्दाये च भद्रादिवाचका: । ते सर्व्वे नैव निन्द्या: स्युर्लिपितोगणतोऽपि वेति । श्रिय: लक्ष्म्या: पति: अनेन रुक्मिणीरूपया श्रिया समेतइति सूचितम् । राघवत्वे भवेत् सीता रुक्मिणी कृष्णजन्मनीति विष्णुपुराणात् । जगन्निवासो जगतामाधार: कुक्षिस्थाखिलभुवनइति यावत् तथापि जगत् लोकं शासितुं दुष्टनिग्रहशिष्टानुग्रहाभ्यां नियन्तुम् श्रीमति लक्ष्मी युक्ते वसुदेवसद्मनि वसुदेवरूपिण: कश्यपस्य वेश्मनि वसन् कृष्ण रूपेण तिष्ठन् हरिर्विष्णु: अम्बरादवतरन्तमायान्तं इन्द्रसन्देश कथनार्थमिति भाव: हिरण्यस्य गर्भो हिरण्यगर्भोब्रह्मा ब्रह्मा ण्डप्रभवत्वात् तस्याङ्गभुवं तनूजं अथवा तस्याङ्गादवयवादुत्सङ्गा ख्याद्भवतीति हिरण्यगर्भाङ्गभू: तं मुनिं नारदमित्यर्थ: । उत्सङ्गा न्नारदोजज्ञे दचोऽङ्गुष्ठात्स्वयम्भुवइति भागवतात् । ददर्श कदाचि दिति शेष: । अत्राल्पीयसि वसुदेवसद्मनि सकलजगदाश्रयतया महो यसोहरेराधेयत्वकथनादधिकप्रभेदोऽलङ्कार: । तदुक्तम् । आधारा धेययोरानुरूप्याभावोऽधिकोमतइति । जगन्निवासस्य जगदेक देशनिवासित्वमिति विरोधश्च । तथा तकारसकारादे: केवलस्यासकृदा वृत्त्या जगज्जगदिति सकृद्व्यञ्जनद्वयसादृश्याच्च वृत्त्यनुप्रासभेदौ शब्दा लङ्कारौ । एषाञ्चान्योन्यनैरपेच्येणैकत्र समावेशात्तिलतण्डुलवत् संसृष्टि: । सर्गेऽस्मिन् वंशस्थवृत्तम् । जतौ तु वंशस्थमुदीरितं जरा विति लक्षणात् ॥ १ ॥

गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्द्ध्वज्वलनं हविर्भुजः
पतत्यधोधाम विसारि सर्व्वतः
किमेतदित्याकुलमीक्षितं जनैः ॥ २ ॥

तदानीं जनैर्विस्मयादीक्षितुं प्रवृत्तमित्याह । गतमिति । अविद्यमानावूरू यस्य स अनूरुः स सारथिर्यस्य तस्यानूरुसारथेः सूर्य्यस्य गतं गतिः । भावे क्तः । तिरश्चीनं तिर्य्यग्भूतं विभाषाऽञ्चेरदिक् स्त्रियामिति तिर्य्यक्शब्दादञ्चत्यन्तात्प्रातिपदिकात् स्वार्थे खप्रत्ययः । हविर्भुजोऽग्नेरूर्द्ध्वज्वलनं ऊर्द्ध्वस्फुरणं प्रसिद्धं इदन्तु सर्व्वतोविसारि धामाधः पतति किमेतदिति सूर्य्याग्निविलक्षणमदृष्टपूर्व्वमिदं धाम किमात्मकं स्यादित्याकुलं विस्मयात् सम्भ्रान्तं यथा तथा जनैरीक्षितं ईक्षणं कृतम् । सकर्म्मकादप्यविवक्षिते कर्म्मणि क्तः । प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रियेति वचनात् । केचित् कर्म्मणि क्तान्तं कृत्वा ईक्षितं मुनिं ददर्शेति पूर्व्वेण योजयन्ति । अत्रोपमेयस्य मुनिधाम्नः सूर्य्याग्निभ्यामुपमानाभ्यामधःप्रसरणधर्म्मेणाधिक्यवर्णनात् व्यतिरेकः । तदुक्तं काव्यप्रकाशे । उपमानाद्यदन्यस्य व्यतिरेकः सएव सइति । धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोरिति हेमचन्द्रः ॥ २ ॥

दिवाकरस्तु वृत्तरत्नाकरटीकायां प्रथमपठितेन

द्विधाकृतात्मा किमयं दिवाकरो
विधूमरोचिः किमयं हुताशनः ।

इति चरणद्वयेन सह इममेव श्लोकं षट्पदच्छन्दस उदाहरण

चयस्त्विषामित्यवधारितं पुरा
ततः शरीरीति विभाविताकृतिम् ।
विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यबोधि सः ॥ ३ ॥

माह तत्राद्यचरणद्वयेन सन्देहाकारो गतमिति तन्निरासस्य बोध्य इत्युपरिष्टात् ॥

अथ भगवान्निरनैषीदित्याह । चयइति । विभुस्तत्त्वावधारण समर्थः स हरिः पुरा प्रथमं त्विषाञ्चय इत्यवधारितं तेजःपुञ्जमात्र त्वेन विनिश्चितं ततः प्रत्यासन्ने विभाविता विस्पष्टा आकृतिः संस्थानं यस्य तं तथोक्तं अतएव शरीरी चेतन इत्यवधारितम् ततो विभक्ताः विविच्य गृहीताः अवयवा मुखादयो यस्य तं तथो क्तम् अतएव पुमानित्यवधारितं अमुमागच्छन्तं व्यक्तिविशेषं नारदं वास्तवाभिप्रायेणेति पुंलिङ्गतोनिर्व्वाहः । क्रमात् पूर्व्वोक्त सामान्यविशेषज्ञानक्रमेण । लोकदृष्ट्येदमुक्तम् हरिस्तु सर्व्वं वेदवेति तत्त्वम् । नारदइत्यबोधि नारदं बुद्धवानित्यर्थः । नारदस्य कर्म्मत्वेऽपि निपातशब्देनाभिहितत्वान्न द्वितीया । तिङामुप सङ्ख्यानस्योपलक्षणत्वात् । यथाह वामनः।निपातेनाभिहिते कर्म्मणि न कर्म्मविभक्तिः । परिगणनस्य प्रायिकत्वादिति । बुध्यतेः कर्त्तरि लिङ् दीपजनेत्यादिना चिण् चिणोलुगिति लुक् । अत्र विभाविताकृतिं विभक्तावयवमित्यादिना आकृतिविभावनावयव विभावनयोः पदार्थयोर्व्विशेषणवृत्त्या शरीरित्वपुंस्त्वावधारण हेतुत्वेनोपन्यासात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । हेतोर्व्वाक्य पदार्थत्वे काव्यलिङ्गमुदाहृतमिति लक्षणात् ॥ ३ ॥

नवानधोऽधोवृहतः पयोधरान्
समूढकर्पूरपरागपाण्डुरम् ।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना
स्फुटोपमं भूतिसितेन शम्भुना ॥ ४ ॥

अथ सप्तभिर्मुनिं विशिनष्टि । नवानित्यादि कीदृशममुं नवान् सद्यःसम्भृतसलिलानिति यावत् वृहतोविपुलान् पयोधरान् मेघान् अधोऽधः मेघानां समीपाधःप्रदेशे स्थितमिति शेषः । उपर्य्यध्यधसः सामीप्ये इति द्विर्भावः तद्योगे द्वितीया उभसर्व्वतसोः कार्य्या धिगुपर्य्यादिषु त्रिष्विच्यादिवचनात् । समूढः पुञ्जीकृतः समूढः पुञ्जिते भुग्ने इति विश्वः। कर्पूरस्य परागश्चूर्णं तद्वत्पाण्डुरं अतएव क्षणं मेघसमीपावस्थानक्षणे। अत्यन्तसंयोगे द्वितीया । क्षणेषु ताण्डवोत्सवेषु । निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणइत्युभयत्राप्यमरः। भूत्या भस्मना सितेन। भूतिर्भस्मनि सम्पदीत्यमरः । शम्भुना स्फुटा उपमा सादृश्यं यस्य तं स्फुटं शम्भूपममित्यर्थः । सापेक्षत्वेऽपि समासः । सदृशप्रर्य्यायेोस्तुलोपमाशब्दयोरतुलोपमाभ्यामिति निषेधात्सादृश्यवाचित्वे तृतीयेत्याहुः । केचिदिमं श्लोकं चयस्त्विषामित्यतः प्राक् लिखित्वा व्याचक्षते तेषां पुंस्त्वावधारणात् प्राक् तेजःपिण्डमात्रस्य शम्भूपमोचित्यञ्चिन्त्यम् ॥ ४ ॥

दधानमिति पुनश्च अम्भोरुहकेसरद्युतीः पद्मकिञ्जल्कप्रभापिशङ्गीरित्यर्थः जटादधानं स्वयन्तु शरच्चन्द्रमरीचिरिव रोचिर्य्यस्य तं धवलमित्यर्थः अतएव विपाकेन परिणामेन

दधानमम्भोरुहकेसरद्युती
र्जटाः शरच्चन्द्रमरीचिरोचिषम् ।
विपाकपिङ्गास्तुहिनस्थलीरुहो
धराधरेन्द्रं व्रततीततीरिव ॥ ५ ॥

पिशङ्गमौञ्जीयुजमर्ज्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताधराम्बरां
विडम्बयन्तं शितिवाससस्तनुम् ॥ ६ ॥

पिङ्गाः पिङ्गलाः तुहिनस्थल्यां रोहन्तीति तुहिनस्थलीरुहः व्रतती ततीर्लताव्यूहान् । वल्ली तु व्रतती लतेत्यमरः । दधानं धराधरेन्द्रोहिमवान् तुहिनस्थलीतिलिङ्गात् नारदोपमानलाभ तमिव स्थितम् ॥ ५ ॥

पिशङ्गेति । पुनः मुञ्जस्तृणविशेषः तन्मयी मेखला मौञ्जी पिशङ्गा मौञ्ज्यायुज्यतइति पिशङ्गमौञ्जीयुक् तं । सत्सूद्विषेत्यादि नाक्विप् स्त्रियाः पुंवदिति पिशङ्गशब्दस्य पुंवद्भावः । अर्ज्जुनच्छविम्धवलकान्तिं । वलक्षोधवलोऽर्ज्जुनइत्यमरः । अञ्जनद्युति अञ्जनवर्णं एणाजिनं कृष्णमृगचर्म्म वसानं आच्छादयन्तं । वस आच्छादनइति धातोः शानच् । सुवर्णसूत्रेण कनकमेखलया आकलितं बद्धम् अधराम्बरं अन्तरीयकं यस्यास्तां शितिवाससो नीलाम्बरस्य रामस्य तनुं विडम्बयन्तमनकुर्व्वाणमित्यार्थीयमुपमा ॥ ६ ॥

विहङ्गराजाङ्गरुहैरिवायतै
र्हिरण्मयोर्वीरुहवल्लितन्तुभिः ।
कृतोपवीतं हिमशुभ्रमुच्चकै
र्घनं घनान्ते तडितां गुणैरिव ॥ ७ ॥
निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा
लसद्बिसच्छेदसिताङ्गसङ्गिना ।
चकासतं चारुचमूरुचर्मणा
कुथेन नागेन्द्रमिवेन्द्रवाहनम् ॥ ८ ॥

विहङ्गेति । पुनः विहङ्गराजाङ्गरुहैरिव गरुत्मल्लोमतुल्यैः कैः आयतैर्दीर्घैः हिरण्यस्य विकारो हिरण्मयी । दाण्डिनायने त्यादिना मयटि यलोपनिपातः । तस्या मुर्व्यां रुहा रूढाः । इगुपधालक्षणः कप्रत्ययः । तासां वल्लीनां तन्तुभिस्तन्तुल्यैः सूक्ष्मावयवैः उपादानगुणात् हिरण्मयैः कृतोपवीतं शोभार्थं कल्पित यज्ञसूत्रं स्वयं हिमशुभ्रं अतएव घनान्ते शरदि तडितां गुणै रुपलक्षितं । तडित्सौदामनीविद्युदित्यमरः । उच्चैरेव उच्चकै रुन्नताङ्गं मेघमिव स्थितम् ॥ ७ ॥

निसर्गेति । पुनः निसर्गात् स्वभावादेव चित्राणि शबलानि उज्ज्वलानि भास्वराणि सूक्ष्माणि पक्ष्माणि लोमानि यस्य तेन लसन् यो विसच्छेदो मृणालखण्डः । छेदः खण्डोऽस्त्रिया मिति त्रिकाण्डशेषः । तद्वत्सिते अङ्गे वपुषि सङ्गिना सक्तेन चारुणा चमूरुचर्मणा मृगत्वचा कुथेन पृष्ठास्तरणेन । प्रवेण्या

अजस्रमास्फालितवल्लकीगुण-
क्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया ।
पुरः प्रवालैरिव पूरितार्द्धया
विभान्तमच्छस्फटिकाक्षमालया ॥ ९ ॥

स्तरणं वर्णः परिस्तोमः कुथोद्वयोरित्यमरः । इन्द्रवाहनं नागेन्द्रं ऐरावतमिव चकासतं शोभमानम् इन्द्रस्य वाहनमिति स्वस्वामिभावमात्रस्याविवक्षितत्वात् वाहनमाहितादिति न णत्वम् । यथाह वामनः नेन्द्रवाहनशब्दे णत्वमाहितत्वस्याविवक्षितत्वादिति । चकासतेः शतरि नाभ्यस्ताच्छतुरिति नुमभावः । जक्षित्यादयः षडित्यभ्यस्तसंज्ञा ॥ ८ ॥

अजस्रमिति । पुनरजस्रं प्राचुर्येणास्फालितास्ताडिताः सौष्ठव परीक्षार्थं न्युब्जाङ्गुष्ठेन तन्त्रीताडनं प्रसिद्धं तेषां वल्लकीगुणानां वीणातन्त्रीणां क्षतेन सङ्घर्षणेन उज्ज्वलैरङ्गुष्ठनखांशुभिर्भिन्नया मिश्रया तद्रागरक्तयेत्यर्थः अतएव पुरः पुरोभागे प्रवालैः विद्रुमैः । अथ विद्रुमः पुंसि प्रवालं पुन्नपुंसकमित्यमरः । पूरितार्द्धयेव स्थितया अच्छस्फटिकाक्षमालया स्वच्छस्फटिकानां मालया जपमालयेत्यर्थः । अच्छोभल्लूके स्फटिकेऽमलेऽच्छाभि मुखेऽव्ययमिति हेमचन्द्रः । तथा प्रसिद्धस्फटिकग्रहणात् अस्य मोक्षार्थित्वं व्यज्यते । स्फटिकोमोक्षदः परमिति मोक्षार्थिनां स्फटिकाक्षमालाभिधानात् । विभान्तं भासमानं । भातेः शतृप्रत्ययः अत्र नखांशुभिन्नयेति स्वगुणत्यागेनान्यगुणस्वीकारलक्षणस्तद्गुणा लङ्कारउक्तः तद्गुणः स्वगुणत्यागादिति ॥ ९ ॥

रणद्भिराघट्टनया नभस्वतः
पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः ।
स्फुटीभवद्ग्रामविशेषमूर्च्छना-
मवेक्षमाणं महतीं मुहुर्मुहुः ॥ १० ॥

रणद्भिरिति । पुनर्नभस्वतो वायोराघट्टनया आघातेन पृथक् प्रकीर्णं रणद्भिर्ध्वनद्भिः अनुरणनोत्पद्यमानैरित्यर्थः । श्रुत्यारभ्यमनुरणनं स्वर इति लक्षणात् । तदुक्तं रत्नाकरे । श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणनात्मकः । स्वतो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यत इति । श्रुतिर्नाम स्वरारम्भकावयवः शब्दविशेषः । तदुक्तं । प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः । सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणेति । विभिन्नानि प्रतिनियतसङ्ख्यया व्यवस्थितानि श्रुतीनां मण्डलानि समूहा येषां तैर्विभिन्नश्रुतिमण्डलैः श्रुतिसङ्ख्यानियमश्च दर्शितः । चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः । द्वे द्वे निषादगान्धारौ त्रिस्त्रिर्ऋषभधैवतौ । स्वराः षड्जादयः सप्तोक्तलक्षणाः । तदुक्तं श्रुतिभ्यः स्युः स्वराः षड्जर्षभगान्धारमध्यमाः । पञ्चमो धैवतश्चाथ निषाद इति सप्त ते । तेषां ज्ञाः सरिगमपधनीत्यपरा मता इति । तैः स्वरैः स्फुटीभवन्तो मविशेषाणां षड्जाद्यपरनामकानां स्वरसङ्घातभेदानां त्रया मूर्च्छना स्वरारोहावरोहक्रमभेदा यस्यां तां महतीं निजवीणां । विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती । महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपीति वैजयन्ती । मुहुर्मुहुरवेक्षमाणं । मन्त्रोपयोजनाभेदलक्षणमहिम्ना पुरुषप्रयत्नमन्तरेणैवाविसंवादं

निवर्त्त्य सोऽनुव्रजतः कृतानती
नतीन्द्रियज्ञाननिधिर्नभस्सदः ।
समासदत्सादितदैत्यसम्पदः
पदं महेन्द्रालयचारु चक्रिणः ॥ ११ ॥

ध्वनतीति कौतुकादनुसन्दधानमित्यर्थः । अथ ग्रामलक्षणम् । यथा कुटुम्बिनः सर्व्वेऽप्येकीभूता भवन्ति हि । तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते । षड्जग्रामो भवेदादौ मध्यमग्राम एव च । गान्धारग्राम इत्येतत् ग्रामत्रयमुदाहृतमिति । तथाच नन्द्यावर्त्तोऽथ जीमूतः सुभद्रो ग्रामकास्त्रयः । षड्जमध्यमगान्धारास्त्रयाणां जन्महेतवः इति । मूर्च्छनालक्षणञ्च । क्रमात्स्वराणां सप्तानामारोहश्चावरोहणं । सा मूर्च्छेत्युच्यते ग्रामस्था एताः सप्त सप्त च । ग्रामत्रयेऽपि प्रत्येकं सप्तसप्तमूर्च्छना इत्येकविंशतिर्मूर्च्छना भवन्ति । तत्र नामानि तु नानपेक्षितमुच्यत इति प्रतिज्ञाभयान्न लिख्यन्त इति सर्व्वमवदातम् । अत्र पुंव्यापारमन्तरेण स्वराणामाविर्भावात्मा कोऽपि लोकातिक्रान्तोऽयं शिल्पसौष्ठवातिशयो वीणायाः प्रतीयते । तेन सह स्वतःप्रसिद्धातिशयस्याभेदेनाध्यवसितत्वात् । तन्मूलातिशयोक्तिरलङ्कारः । सा च महत्याः पुंव्यापारं विना मूर्च्छाद्यसम्बन्धेऽपि सम्बन्धाभिधानादसम्बन्धे सम्बन्धरूपतया पुंव्यापाराख्यरूपकारणं विनापि मूर्च्छनादिकार्य्योत्पत्तिद्योतनाद्विभावना व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिरिति संक्षेपः ॥ १० ॥

निवर्त्त्येति । अतीन्द्रियादिन्द्रियमतिक्रान्ताद्देशकालस्वरूपाद्विप्रकृष्टार्थाः । अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः । द्विगु

पतत्पतङ्गप्रतिमस्तपोनिधिः
पुरोऽस्य यावन्न भुवि व्यलीयत ।
गिरेस्तडित्वानिव तावदुच्चकै-
र्ज्जवेन पीठादुदतिष्ठदच्युतः ॥ १२ ॥

प्राप्तापन्नालंपूर्व्वगतिसमासेषु परलिङ्गताप्रतिषेधो वक्तव्य इति वि शेष्यलिङ्गत्वं । तेषां स्थानं तस्य निधिः सर्व्वार्थेत्यर्थः । स्तान नतीन् कृतप्रणामान् अनुव्रजतोऽनुगच्छतः नभसि आकाशे सीदन्ति गच्छ न्तीति नभःसदः सुरान् । सत्सूद्विषेत्यादिना क्विप् । निवर्त्य प्रति षिध्य स मुनिः सादितदैत्यसम्पदः सादिताः विध्वस्तीकृताः दैत्यानां सम्पदो येन तस्य चक्रिणः कृष्णस्य पदं स्थानं महेन्द्रालयचारु इन्द्रभवनमिव भासमानं समासदत् । समाङ्पूर्व्वात् षद्धातोः लङ् । अत्र नतीनती पदः पदमिति च द्वयोर्व्यञ्जनयुग्मयोरसकृदा वृत्त्या छेकानुप्रासः अन्यत्र वृत्त्यनुप्रासः इत्यनयोः संसृष्टिः ॥ ११ ॥

पतदिति । पतन् यः पतङ्गः सूर्य्यः स प्रतिमा उपमानं यस्य सः । पतङ्गौ पक्षिसूर्य्यौ चेत्यमरः । तपोनिधिर्मुनिः अस्य हरेः पुरोभुवि पुरः प्रदेशे यावत् न व्यलीयत नातिष्ठत् । लिङ् गताविति धातोरैवादिकात्कर्त्तरि लङ् । तावदच्युतो गिरेः शैलात् तडितोऽस्य सन्तीति तडित्वान् मेघ इव । मादुपधायाश्च मतोर्वोऽयवादिभ्य इति मतुपो मकारस्य वकारः तसौ मत्वर्थे इति भसंज्ञायामेकसंज्ञाधिकारेणापदत्वाच्च जश्त्वं । उच्चैः उन्नतात्पीठात् आसनात् जवेनोदतिष्ठत् । मुनिचरणस्य भूस्प र्शात्प्रागेव स्वयमुत्थितवान् । ऊर्द्ध्वस्याधोऽनुगमनमिति सूचः

अथ प्रयत्नोन्नमितानमत्फणै
र्धृते कथञ्चित्फणिनाङ्गणैरधः ।
न्यधायिषातामभिदेवकीसुतं
सुतेन धातुश्चरणौ भुवस्तले ॥ १२ ॥

स्थविरमायति । प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते इति शास्त्रमनुस्मरन्निति भावः । उदोऽनूर्द्ध्वकर्म्मणीति नियमादिहोर्द्ध्व कर्म्मणि नात्मनेपदं पतत्पतङ्ग इत्यत्र पतङ्गस्य पतनासम्भवादियम भूतोपमा इत्याचार्य्यदण्डिप्रभृतयो बभणुः । अत एवाप्रसिद्धस्योप मानत्वायोगादुत्प्रेक्षेत्याधुनिकालङ्कारिकाः सर्व्वे वर्णयन्ति ॥ १२ ॥

अथेति । अथाच्युताभ्युत्थानानन्तरं धातुःसुतेन नारदेन प्रयत्नोन्नमिताश्च यथापि मुनिपादन्यासभारादानमन्त्यः फणा येषां तेषां फणिनां गणैः अधोऽधःप्रदेशे कथंचिद्धृते स्थापिते भुवस्तले भूपृष्ठे अभिदेवकीसुतं देवकीसुतं अभिलक्ष्येत्यर्थः । लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः । चरणौ पदौ । पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः । न्यधायिषातां निहितौ । दधातेः कर्म्मणि लुङ् । स्यसिचसीत्यादिना चिण्वदिट् युक् । अत्र फणानां नमनेनानमनासम्बन्धेऽपि मुनिगौरवाय तत्सम्बन्धा भिधानादतिशयोक्तिभेदः ॥ १२ ॥

तमिति । आदिपूरुषः पुराणपुरुषः । अन्येषामपि दृश्यते इति वा दीर्घः । स कृष्णः अर्घं पूजामर्हतीति अर्घ्यः । दण्डादिभ्यो यः । तं नारदं । अर्घार्थं द्रव्यमर्घ्यम् । पादार्घाभ्यां चेति यत्प्रत्ययः । मूल्ये पूजाविधावर्घः षट् तु निम्नार्घमर्घार्थमिति चामरः । अर्घ्यमादिर्य्य

समर्घ्यमर्घ्यादिकयादिपूरुषः
सपर्य्यया साधु स पर्य्यपूपुजत्।
गृहानुपैतुं प्रणयादभीप्सवो
भवन्ति नापुण्यकृतां मनीषिणः ॥ १४ ॥

न यावदेतावुदपश्यदुत्थितौ
जनस्तुषाराञ्जनपर्व्वताविव ।
स्वहस्तदत्ते मुनिमासने मुनि
श्चिरन्तनस्तावदभिन्यवीविशत् ॥ १५ ॥

स्रासया अर्घ्यादिकया। शेषाद्विभाषेति विकल्पेन कप् प्रत्ययः। सप र्य्यया पूजया। पूजा नमस्यापचितिः सपर्य्यार्च्चार्हणाः समा इत्यमरः। साधु यथा तथा पर्य्यपूपुजत्परिपूजितवान्। णौ चङ्युपधाया ह्रस्वः। युक्तं चैतदित्यर्थान्तरं न्यस्यति गृहानिति। मनसईषिणो मनीषिणः सन्तः पृषोदरादित्वात्साधुः। अपुण्यकृतामपुण्यमकृतवतां। सुकर्म्मपाप मन्त्रपुण्येषु कृञ् इति भूते क्विप्। गृहान् प्रणयादुपैतुमभीप्सवः प्राप्तु मिच्छवः। आप्नोतेः सनन्तादुप्रत्ययः आपज्ञप्यृधामीदितीकारः। न भवन्ति किन्तु पुण्यकृतामेव। अतः कृतकृत्याः सन्तः पूज्या इत्यर्थः ॥ १४ ॥

न यावदिति। उत्थितावेतौ मुनिकृष्णौ जनः तुषाराञ्जनयोः पर्व्वताविव यावन्नोदपश्यन्नोत्प्रेक्षितवान्। तावच्चिरन्तनः पुराणो मुनिः कृष्णः पुरा किल भगवान् वदरिकारण्ये नारायणा कारेण तपसि स्थितवानिति पुराणात्। सायं चिरमित्यादिना त्युप्रत्ययः तुडागमश्च। स्वहस्तेन दत्ते आसने मुनिं नारदं अभि

महामहानीलशिलारुचः पुरो
निषेदिवान् कंसकृषः स विष्टरे ।
श्रितोदयाद्रेरभिसायमुच्चकै
रचूचुरच्चन्द्रमसोऽभिरामताम् ॥ १६ ॥

न्यवीविशत् स्वाभिमुखेनोपवेशितवान् । अभिनिपूर्व्वात् विशतेर्ण्यन्ता
ल्लुङि णिश्रीति चङ् ॥ १५ ॥

महामहेति । महत्यामहानीलशिलायाः सिंहलद्वीपसम्भवे
न्द्रनीलोपलस्य रुगिव रुग्यस्य तस्येत्युपमालङ्कारः । सिंहलस्याकरा
ज्जातामहानीलास्तु ते स्मृता इति भगवानगस्त्यः । कंसकृषो हरेः पुरो
ऽग्रे उच्चकैरुन्नते विष्टरे आसने । वृक्षासनयोर्विष्टर इति सत्वं । निषे
दिवानुपविष्टवान् । भाषायां सदवसश्रुव इति क्वसुः । स मुनिरभि
सायं सायङ्कालाभिमुखं । अव्ययीभावसमासः सायङ्कालस्य कार्ष्ण्यात्
कृष्णोपमानत्वम् । श्रितआश्रित उदयाद्रिरुदयाचलोयेन तस्य चन्द्र
मसोऽभिरामतां शोभामचूचुरत् चोरितवान् प्राप्तवानित्यर्थः ।
चुर स्तेये णिश्रीति चङ् । अन्यस्यान्यधर्म्मसम्बन्धासम्भवात् चन्द्रमसो
ऽभिरामतामिवाभिरामतामित्यौपम्यपर्य्यवसानादसम्भवद्वस्तुसम्बन्ध
रूपो निदर्शनाभेदः स चोक्तोपमया अङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ १६ ॥

विधायेति । यज्वानो विधिनेष्टवन्तः । यज्वा तु विधिनेष्टवा
नित्यमरः । सुयजोरिति यजिधातोर्ङ्वनिप् । तेषां प्रियो हरिः प्रसे
दुषः प्रसन्नस्य । सदेः क्वसुरित्युक्तं । तस्य मुनेरपचितिं पूजां । पूजा
नमस्यापचितिरित्यमरः । विधाय विशेषेण मनोवाक्कायकर्म्मभि
स्तत्परतया कृत्वा प्रकाममत्यर्थमप्रीयत प्रीतो बभूव । प्रीयतेर्दैवादि

विधाय तस्यापचितिं प्रसेदुषः
प्रकाममप्रीयत यज्वनां प्रियः ।
ग्रहीतुमार्य्यान् परिचर्य्यया मुहु-
र्महानुभावा हि नितान्तमर्थिनः ॥ १७ ॥
अशेषतीर्थोपहृताः कमण्डलो-
र्न्निधाय पाणावृषिणाभ्युदीरिताः ।
अघौघविध्वंसविधौ पटीयसी-
र्न्नतेन मूर्द्ध्ना हरिरग्रहीदपः ॥ १८ ॥

त्वात्कर्त्तरि लुङ् । मुनिपूजायाः प्रीतिहेतुत्वेऽर्थान्तरं न्यस्यति । महानुभावा महात्मानः आर्य्यान् पूज्यान् परिचर्य्यया मुहुर्ग्रहीतुं वशीकर्त्तुं । ग्रहोऽलिटि दीर्घइतीटोदीर्घः । नितान्तमर्थिनोऽभिलाषवन्तो हि भवन्ति अर्थोऽभिलाषः स एषामस्तीति मत्वर्थइनिः नतु णिनिः कृद्वृत्तेस्तद्धितवृत्तिर्बलीयसीति भाष्यात् ॥ १७ ॥

अशेषेति । अशेषेभ्यस्तीर्थेभ्यउपहृताआहृतास्तथा कमण्डलोरुदकपात्रादुद्धृत्येत्यर्थः पाणौनिधाय ऋषिणाभ्युदीरिता आक्षिप्ताः अतएवाघौघानां पापसमूहानां विध्वंसविधौ विनाशकरणे पटीयसीः समर्थतराः । पटुशब्दात् ईयसुनि उगितश्चेति ङीप् । अपोजलानि हरिर्नतेन मूर्द्ध्ना अग्रहीत् स्वीकृतवान् ग्रहलुङ् ॥ १८ ॥

स काञ्चनेति । नवाम्बुदश्यामतनुः स हरिर्मुनेरनुज्ञया काञ्चने काञ्चनविकारे वैकारिकोऽण्प्रत्ययः । यत्रासने न्यविक्षत उपविष्ट

स काञ्चने यत्र मुनेरनुज्ञया
नवाम्बुदश्यामवपुर्न्यविक्षत ।
जिगाय जम्बूजनितश्रियः श्रियं
सुमेरुशृङ्गस्य तदा तदासनम् ॥ १९ ॥
स तप्तकार्त्तस्वरभास्वराम्बरः
कठोरताराधिपलाञ्छनच्छविः ।
विदिद्युते वाडवजातवेदसः
शिखाभिराश्लिष्ट इवाम्भसां निधिः ॥ २० ॥

वान् । निपूर्व्वविशेर्लुङि नेर्विंश इत्यात्मनेपदं शलइगुपधादनिट् क्सः । तदासनं तदा हर्य्युपवेशनसमये जम्बूर्नीलफलविशेषः । जम्बूः सुरभिपत्रा च राजजम्बूर्महाफलेत्यभिधानरत्नमालायां । तया जनिताश्रीर्यस्य तत्तथोक्तस्य । भाषितपुंस्कत्वात् पचे पुंवद्भावानुम भावः । सुमेरुशृङ्गस्य श्रियञ्जिगायाभिभावितवान् इत्यर्थः सम् शिटोर्ज्जेरिति कुत्वं । उपमानानुप्रासयोः संसृष्टिः ॥ १९ ॥

सतप्तेति । तप्तं पुटपाकशोधितं कार्त्तस्वरं सुवर्णं । स्वर्णं कार्त्त स्वरं जाम्बूनदमष्टापदोऽस्त्रियामित्यमरः । तद्वद्भास्वरं दीप्य मानमम्बरं यस्य सः पीताम्बर इत्यर्थः । कठोरताराधिपस्य पूर्णेन्दो र्लाञ्छनस्य छविरिव छविर्य्यस्य स इत्युपमानपूर्व्वपदो बहुव्रीहिः उत्तरपदलोपश्च । स हरिर्व्वाडवजातवेदसोवाडवाग्नेः शिखाभि र्ज्वालाभिराश्लिष्टोव्याप्तोऽम्भसान्निधिरिव समुद्र इव विदिद्युते बभौ ॥ २० ॥

रथाङ्गपाणेः पटलेन रोचिषा
ऋषित्विषः संवलिता विरेजिरे ।
चलत्पलाशान्तरगोचरास्तरो
स्तुषारमूर्त्तेरिव नक्तमंशवः ॥ २१ ॥
प्रफुल्लतापिञ्छनिभैरभीषुभिः
शुभैश्च सप्तच्छदपांशुपाण्डुभिः ।
परस्परेणच्छुरितामलच्छवी
तदैकवर्णाविव तौ बभूवतुः ॥ २२ ॥

रथाङ्गपाणेरिति । रथाङ्गं चक्रं पाणौ यस्य तस्य हरेः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति पाणेः परनिपातः । रोचिषां छवीनां पटलेन समूहेन संवलिता मिलिता ऋषित्विषो नक्तं रात्रौ । सप्तम्यर्थेऽव्ययम् । तरोश्चलतां पलाशानां पत्राणामन्तराणि विवराणि गोचर आश्रयो येषां ते तुषारा मूर्त्तिर्यस्य तस्येन्दोरंशव इव विरेजिरे चकाशिरे ॥ २१ ॥

प्रफुल्लेति । प्रफुल्लतीति प्रफुल्लं विकसितम् । फुल्ल विकसने इति धातोः पचाद्यजन्तम् । फलेर्निष्ठायां अनुपसर्गात् फुल्लक्षीवकृशोल्लाघा इति निपातनात् प्रफुल्लमित्येवेति क्षीरस्वामी । तापिञ्छस्य तमालस्य पुष्पं तापिञ्छम् । फले लुगिति तद्धितलुक् । द्वितीयं प्रचक्षे सर्वमिति नपुंसकत्वम् । कालस्कन्धस्तमालः स्यात्तापिञ्छोऽपीत्यमरः । तेन सदृशैः प्रफुल्लतापिञ्छनिभैः । नित्यसमासत्वादस्वपदविग्रहः । अतएव स्युरुत्तरपदे त्वमीति । निभसङ्काशनीकाशप्रतीकाशोपमादय इत्यमरः । सप्त सप्तच्छदाः पर्णानि पर्वसु यस्येति

युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकाशमासत ।
तनौ ममुस्तत्र न कैटभद्विष
स्तपोधनाभ्यागमसम्भवामुदः ॥ २३ ॥

सप्तच्छदोवृक्षभेदः । सप्तपर्णोविशालत्वक् शारदोविषमच्छद इत्य मरः । सङ्ख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवदित्युक्तं भाष्ये । शेषन्तापिङ्कवत् । तस्य पुष्पाणि सप्तच्छदानि तेषां पांशु वत्पाण्डुभिः शुभ्रैरभीषुभिः अन्योन्यरश्मिभिः । अभीषुः प्रग्रहे रश्माविति शाश्वतः । परस्परेण छुरिते रंषिते अमले छवी अन्योन्य कान्ती ययोस्तौ । छव्योरभीषूणामवयवावयविभावाद्भेदनिर्देशः । तौ हरिनारदौ तदा एकवर्णाविव बभूवतुः उभयप्रभामेलना दुभयोरपि सर्वाङ्गीनोगङ्गायमुनासङ्गमइव स्फटिकेन्द्रनीलमणि प्रभामेलनप्रायः कश्चिदेकोवर्णः प्रादुर्बभूव । तन्निमित्ता चयं अनयोरेकवर्णत्वोत्प्रेक्षा ॥ २२ ॥

युगान्तेति । युगान्तकाले प्रतिसंहृतात्मनः आत्मन्युप संहृताः आत्मानोजीवायेन तस्य कैटभद्विषोहरेर्यस्यान्तनौ ज गन्ति सविकाशं सविस्तरमासत अतिष्ठन् । आस उपवेशने लङ् । तत्र तनौ देहे तपोधनाभ्यागमेन सम्भवन्तीति सम्भवाः सम्भूताः । पचाद्यच् । मुदः सन्तोषाः न ममुः अतिरिच्यन्ते सेत्यर्थः । चतुर्द्दश भुवनभरणपर्य्याप्ते वपुषि अन्तर्न माप्नोति कविप्रौढोक्तिसिद्धाति शयेन स्वतःसिद्धस्याभेदेनाध्यवसितातिशयोक्तिः सा च मुदामन्तः सम्बन्धेऽप्यसम्बन्धोक्त्या सम्बन्धासम्बन्धरूपा ॥ २३ ॥

निदाघधामानमिवाधिदीधितिं
मुदा विकाशं मुनिमभ्युपेयुषी ।
विलोचने बिभ्रदधिश्रितश्रिणी
स पुण्डरीकाक्ष इति स्फुटोऽभवत् ॥ २४ ॥

निदाघेति । निदाघमुष्णं धाम किरणो यस्य तथोक्तं । निदाघो ग्रीष्मकाले स्यादुष्णस्वेदाम्बुनोरपीति विश्वः । अर्कमिवाधिदीधितिं अधिकतेजसं मुनिमभिलक्ष्य । अभिरभागे इति लक्षणे कर्मप्रवचनीयसंज्ञा कर्मप्रवचनीययुक्ते द्वितीया । मुदा विकाशमुपेयुषी उपगते । क्वसुप्रत्ययान्तो निपातः । अत एवाधिश्रिता प्राप्ता श्रीर्याभ्यां ते तथोक्ते । इकोऽचि विभक्ताविति नुमागमः । विलोचने बिभ्रत् । नाभ्यस्ताच्छतुरिति नुमभावः । स हरिः पुण्डरीकाक्षः इत्येवं स्फुटोऽभवत् सूर्य्यसन्निधाने श्रीविकाशभावादक्ष्णां पुण्डरीकसाधर्म्यात् । पुण्डरीकइवाक्षिणी यस्येत्यवयवार्थलाभे पुण्डरीकाक्षइति व्यक्तमन्वर्थसंज्ञोऽभूदित्यर्थः । बिभ्रत् स्फुटोऽभवदिति पदार्थहेतुकस्य काव्यलिङ्गस्य निदाघधामानमिवेत्युपमासापेक्षत्वादनयोरङ्गाङ्गिभावेन सङ्करः ॥ २४ ॥

सितमिति । अथोभयोरुपवेशानन्तरं अच्युतो हेतुकर्त्ता विसारिभिरभीक्ष्णं प्रसरद्भिः । बहुलमाभीक्ष्ण्ये इति णिनिः । द्विजावलिर्दन्तपङ्क्तिः । दन्तविप्राण्डजा द्विजा इत्यमरः । सैव व्याजः कपटं यस्य सः तद्रूपइत्यर्थः सचासौ निशाकरश्च तस्यांशुभिः किरणैः सितं स्वभावशुभ्रं मुनेर्वपुः सौधं प्रासादमिव सुतरामत्यन्तं । अव्ययादाम् प्रत्ययः । सितिमा धावल्येन प्रयोज्यकर्त्ता लम्भयन्

सितं सितिम्ना सुतरां मुनेर्वपु
र्विसारिभिः सौधमिवाऽथ लम्भयन् ।
द्विजावलिव्याजनिशाकरांशुभिः
शुचिस्मितां वाचमवोचदच्युतः ॥ २५ ॥

हरत्यघं सम्प्रति हेतुरेष्यतः
शुभस्य पूर्व्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥२६॥

श्यापारयन् अतिधवलयन्नित्यर्थः । लभेरत्र गत्युपसर्ज्जनप्राप्त्यर्थ त्वेनागत्यर्थत्वात् । गतिबुद्धीत्यादिना अणि कर्त्तुर्न कर्म्मत्वं । तथाह वामनः लभेर्गत्यर्थत्वात् णिच्यणौ कर्त्तुः कर्म्मत्वाकर्मत्वे इति प्राप्त्युपसर्ज्जनगत्यर्थत्वे तु न कर्म्मत्वमेवेति रहस्यम् । लभेश्चेति नुमागमः । शुचिस्मितां वाचमवोचत् उक्तवान् ब्रुवोवच्यादेशः लुङ् वचि उम् इत्युमागमे गुणः । अत्र सौधमिवेत्युपमायाः सितिम्ना लम्भयन्नित्यसम्बन्धरूपातिशयोक्तेः द्विजावलिव्याजनिशा करेति छलादिशब्दैरसत्यत्वप्रतिपादनरूपापह्नवस्य च मिथोनैर पेक्ष्यात्संसृष्टिः ॥ २५ ॥

हरतीति । भवदीयदर्शनं शरीरभाजां द्रष्टॄणां इत्यर्थः । भजो ण्विः । कालत्रितये भूतादिकालत्रितयेऽपि योग्यतां पवित्रतां व्यनक्ति गमयति कुतः सम्प्रति दर्शनकाले अघं पापं हरति एष्यतो

जगत्यपर्य्याप्तसहस्रभानुना
न यन्नियन्तुं समभावि भानुना ।
प्रसह्य तेजोभिरसङ्ख्यतां गतै-
रदस्त्वया नुन्नमनुत्तमं तमः ॥ २७ ॥

भाविनः शुभस्य श्रेयसो हेतुः तथा पूर्व्वाचरितैः प्रागनुष्ठितैः शुभैः सुकृतैः कृतं एवं त्रैकाल्येऽपि कार्य्यत्वेन कारणत्वेन च पुंसि सुकृत समवायमवगमयते । अतएतादृशं दर्शनं कस्य न प्रार्थ्यमिति भावः । अत्र हरतीत्यादिवाक्यत्रयस्यार्थस्य शरीरेत्यादिवाक्यत्रयोक्त्या वा क्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २६ ॥

जगतीति । जगत्यपर्य्याप्ता अपरिच्छिन्नाः सहस्रं भानवः अंशवो यस्य तेन भानुना अर्केण भानवोऽर्कहरांशवइति वैजयन्ती । यत्तमो नियन्तुं निवारयितुन्न समभावि न शेके । भावे लुङ् । अविद्य मानमुत्तमं यस्मात् तदनुत्तमं सर्व्वाधिकं अदस्तमो मोहात्मकं असङ्ख्यताङ्गतैस्तेजोभिः प्रसह्य बलात् त्वया नुन्नं छिन्नं अतः श्लाघ्य दर्शनो भवानिति भावः । नुदविदेत्यादिना विकल्पान्निष्ठानत्व भावः । अत्रोपमानाद्भानोर्मुनेराधिक्यप्रतिपादनात् व्यतिरेका लङ्कारः ॥ २७ ॥

कृतइति । प्रजानाञ्जनानां अपत्यानां च क्षेमकृता कुशलकारिणा । प्रजा स्यात्सन्ततौ जने इत्यमरः । सुपात्रे योग्यपुरुषे कटाहादि दृढभाजने च निक्षेपेण निधानेन च निराकुलात्मना स्वस्थचित्तेन । योग्यभाजनयोः पात्रमित्यमरः । प्रजासृजा ब्रह्मणा पुत्रिणा च त्वं धनसम्पदामिव श्रुतीनां वेदानां सदोपयोगे दानभोगाभ्यां सवेऽपि

कृतः प्रजाक्षेमकृता प्रजासृजा
सुपात्रनिःक्षेपनिराकुलात्मना ।
सदोपयोगेऽपि गुरुस्त्वमक्षयो
निधिः श्रुतीनां धनसम्पदामिव ॥ २८ ॥
विलोकनेनैव तवामुना मुने
कृतः कृतार्थोऽस्मि निवर्हितांहसा ।
तथापि शुश्रूषुरहं गरीयसी
र्गिरोऽथवा श्रेयसि केन तृप्यते ॥ २९ ॥

अक्षयः एकत्राम्नानादन्यत्रानन्याप्येति भावः। गुरुरुपदेष्टा सम्प्रदाय प्रवर्त्तकइति यावत् । अन्यत्र महान् । निधीयतइति निधिःनिक्षेपः कृतः । उपसर्गे घोः किः । श्रुतिसम्प्रदायद्वारा धर्माधर्मव्यवस्थापक तया जगत्प्रतिष्ठाहेतूनां भवादृशां दर्शनं कस्य न श्लाघ्यमिति भावः । अत्र शब्दमात्रसाधर्म्यात् श्लेषोऽयं प्रकृतविषयत्वादङ्गः ॥ २८ ॥

विलोकनेनेति । हे मुने निवर्हितांहसा अपहतपाप्मना अत एवामुना तव विलोकनेनैव कृतार्थः कृतोऽस्मि । तथाप्यहं गरीयसी रर्थवत्तराः । द्विवचनेत्यादिना ईयसुन्प्रत्ययः उगितश्चेति ङीप् प्रियस्थिरेत्यादिना गुरोर्गरादेशः । गिरस्तव वाचोऽपि शुश्रूषुः श्रोतुमिच्छुरस्मि । शृणोतेः सनन्तादुप्रत्ययः । नचैतद्दृष्ये त्याह । अथवा तथाहीत्यर्थः । अथवेति पक्षान्तरप्रसिद्धोरिति गणव्याख्यानात् । श्रेयसि विषये केन तृप्यते न केनापीत्यर्थः । कृतार्थ तायाः तृप्त्यभावादिति भावः । भावे लिट् ॥ २९ ॥

गतस्पृहोऽप्युपागमनप्रयोजनं
वदेति वक्तुं व्यवसीयते यया।
तनोति नस्तामुदितात्मगौरवो
गुरुस्तवैवागम एष धृष्टताम् ॥ ३० ॥

इति ब्रुवन्तं तमुवाच स व्रती
न वाच्यमित्थं पुरुषोत्तम त्वया।
त्वमेव साक्षात्करणीय इत्यतः
किमस्ति कार्य्यं गुरु योगिनामपि ॥ ३१ ॥

एवं प्रियमुक्त्वा सम्प्रत्यागमनप्रयोजनं विनयेन पृच्छति। गतस्पृहोऽपीति। गतस्पृहो विरक्तोऽपि त्वमागमनप्रयोजनं वदेति वक्तुं यया धृष्टतया व्यवसीयते उद्यम्यते। स्यतेर्भावे लट्। उदित मुत्पन्नं उक्तं वा आत्मनो मम गौरवं येन सः गुरुः श्लाघ्यः एष तवागमः आगमनमेव नोऽस्माकं धृष्टतां तनोति विस्तारयति। तनुविस्तारे लट्। भवतो निस्पृहत्वेऽपि प्रेक्षावत्प्रवृत्तेः प्रयोजन व्याप्त्या सावकाशः प्रश्न इति भावः ॥ ३० ॥

इति ब्रुवन्तमिति। इति ब्रुवन्तं हरिं स व्रती मुनिरुवाच। किमिति हे पुरुषोत्तम पुरुषेषु श्रेष्ठ। न निर्द्धारण इति षष्ठीसमासप्रतिषेधः। त्वया इत्थं गतस्पृहोऽपीति न वाच्यं निस्पृहस्याप्यत्र प्रयोजनसम्भवादिति भावः। तदेवाह योगिनामपि त्वमेव साक्षात्करणीयः प्रत्यक्षीकर्त्तव्य इत्यतोऽस्मादन्यत् गुरु कार्य्यं किमस्ति न किञ्चिदित्यर्थः। तस्मान्न प्रयोजनान्तरप्रश्नावकाश इति भावः ॥ ३१ ॥

उदीर्णरागप्रतिरोधकं जनै
रभीक्ष्णमक्षुण्णतयातिदुर्गमम् ।
उपेयुषो मोक्षपथं मनस्विन
स्त्वमग्रभूमिर्निरपायसंश्रया ॥ ३२ ॥

यदुक्तं योगिनामपि त्वमेव साक्षात्करणीय इति तदेव द्रढयति । उदीर्णरागेति । उदीर्ण उद्रिक्तो रागो विषयाभिलाषः स एव प्रतिरोधकः प्रतिबन्धकः पाटच्चरश्च यस्मिन् । प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचा इत्यमरः । अभीक्ष्णमक्षुण्णतया अनभ्यस्तत्वेनाप्रतिहतत्वेन च जनैरतिदुर्गमं मोक्षपथमपवर्गमार्गं कान्तारञ्चोपेयुषः प्राप्तवतः । उपेयिवानित्यादिना क्वस्वन्तो निपातः । मनस्विनः सुमनसः धीरस्य च । प्रशंसायां विनिः । त्वमेव निरपायः पुनरावृत्तिरहितः संश्रयः प्राप्तिर्यस्याः सा तथोक्ता । न स पुनरावर्त्तत इति श्रुतेः । अग्रभूमिः प्राप्यस्थानं । अग्रमालम्बने प्राप्य इति विश्वः । सोऽहमित्यादिश्रुतेस्त्वत्प्राप्तेरेव मोक्षत्वादिति भावः । तस्मान्मुमुक्षूणामपि त्वमेव साक्षात्करणीय इति सिद्धम् । तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतेः । यथा कस्यचित् कुतश्चित्सङ्कटात् निर्गतस्य केनचित् कान्तारेणागतस्य किञ्चिन्निर्बाधस्थानप्राप्तिरभयाय कल्पते तथा त्वमपि मुमुक्षोरिति ध्वनिः ॥ ३२ ॥

ननु प्रकृतिविविक्तपुरुषसाक्षात्कारान्मोक्षो नान्यस्य साक्षात्कारादित्याशङ्क्य सोऽपि त्वमेवेत्याह । उदासितारमिति । पुराविदः पूर्वज्ञाः कपिलादयः त्वां निगृहीतमानसैरनिबद्धचित्तैर्योगिभिः

उदासितारं निगृहीतमानसै-
र्गृहीतमध्यात्मदृशा कथञ्चन।
बहिर्विकारं प्रकृतेः पृथग्विदुः
पुरातनं त्वां पुरुषं पुराविदः ॥ ३३ ॥

आत्मनि अधि इत्यध्यात्मं। विभक्त्यर्थेऽव्ययीभावः अनश्चेति समासान्त ष्टच्। अध्यात्मं या दृक् ज्ञानन्तया अध्यात्मदृशा प्रत्यग्दृष्ट्या कथञ्चन गृहीतं साक्षात्कृतं। केन रूपेण गृहीतमित्यत आह। उदासितारं उदासीनं प्रकृतौ स्वार्थप्रवृत्तायामपि स्वयमप्राकृतत्वादस्पृष्टमित्यर्थः। आसेस्तृच्। विकारेभ्यो बहिः बहिर्विकारं महदादिभ्यः पृथग्भूत मित्यर्थः। अपपरिबहिरञ्चवः पञ्चम्येत्यव्ययीभावः। किञ्च प्रकृतेस्त्रैगुण्यात्मनो मूलकारणात् पृथक् भिन्नं। प्रकृतिः पञ्च भूतेषु प्रधाने मूलकारण इति यादवः। पुरातनमनादिं। सायंचिर मित्यादिना ट्युप्रत्ययः। पुरुषं पुरुषपदवाच्यं विज्ञानघनं विदु र्विदन्ति। विदो लटो वेति झेरुसादेशः। यथाहुः। मूलप्रकृतिरविकृति र्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति। अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतिश्च। सोऽपि त्वमेव तत्त्वमसीत्यादिवाक्यैरैक्यश्रवणात्। तस्मात्त्वमेव साक्षात्करणीय इति सूक्ष्ममिति भावः॥ ३३ ॥

एवं भगवतो निर्गुणस्वरूपमुक्त्वा सम्प्रति प्रस्तुतोपयोगितया सगुणमाश्रित्य षड्भिः स्तौति। निवेशयामासिथेति। अनन्यस्य एकस्य पतिरेकाधिपतिः एकपत्नी च। स्वपतिरधिपतौ तस्मि न्नस्त्यतिशयितत्वेनेति वैजयन्ती। त्वं हेलयोद्धृतं वराहावतारे

निवेशयामासिथ हेलयोद्धृतं
फणाभृतां छादनमेकमोकसः ।
जगत्त्रयैकस्थपतिस्त्वमुच्चकै-
रहीश्वरस्तम्भशिरःसु भूतलम् ॥ ३४ ॥
अनन्यगुर्व्वास्तव केन केवलः
पुराणमूर्त्तेर्महिमावगम्यते ।
मनुष्यजन्मापि सुरासुरान् गुणै-
र्भवान् भवच्छेदकरैः करोत्यधः ॥ ३५ ॥

इति भावः । फणाभृतामोकसः आश्रयस्य सद्मनश्च ओकः सद्मनि चाश्रये इति विश्वः । एकं छादनमावरणं भूतलं उच्चकैः उन्नतेषु अहीश्वरः शेषएव स्तम्भः तस्य शिरःसु मूर्द्धसु अग्रेषु च फणासहस्रेष्विति भावः निवेशयामासिथ निवेशितवानसि । विशतेर्ण्यन्तात् लिटि थल् कृञ्चानुप्रयुज्यते लिटीति अस्तेरनुप्रयोगः । अत्र श्लिष्टाश्लिष्टरूपकयोर्हेतुहेतुमद्भावात् श्लिष्टं परम्परितरूपकम् ॥ ३४ ॥

अनन्येति । न विद्यतेऽन्योगुरुर्यस्यास्तस्याः अनन्यगुर्व्वाः इत्यनीकारान्तः पाठः समासान्ताङ्गीशि नद्यृतश्चेति कप्प्रसङ्गः स्यात् पश्चात्त्वनुपसर्ज्जनाधिकारात् वोतोगुणवचनादिति न प्राप्नोति ङिति ह्रस्वश्चेति वा नदीसंज्ञालादाण्नद्याइत्याडागमः केचित्तु समासान्तविधिरनित्यइति कप वारयन्ति । तस्याः सर्व्वोत्तमायास्तव पुराणमूर्त्तेरमानसरूपस्य केवलः कृत्स्नः । केवलः कृत्स्न एकः स्यात्केवल

लघूकरिष्यन्नतिभारभङ्गुरा
ममूं किल त्वं त्रिदिवादवातरः ।
उदूढलोकत्रितयेन साम्प्रतं
गुरुर्द्धरित्री क्रियतेतरां त्वया ॥ २६ ॥

स्यावधारणे इति विश्वः । महिमा केनावगम्यते न केनापीत्यर्थः कुतः मनुष्याज्जन्म यस्य स मनुष्यजन्मा भवान् । सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः । अवर्ण्योऽपि बहुव्रीहि र्व्यधिकरणोजन्माद्युत्तरपदइति वामनः । भवच्छेदकरैः संसार निवर्त्तकैर्गुणैर्ज्ञानादिभिः सुरासुरान् । सुरासुरविरोधस्य कार्य्योपाधिकत्वेनाशाश्वतिकत्वाद्येषाञ्च विरोधः शाश्वतिकइति न द्वन्द्वैकवद्भावइत्याहुः । अधः करोति । शेषे प्रथमइति प्रथमपुरुषः भवच्छब्दस्य युष्मदस्मदन्यत्वेन शेषत्वादिति । मानुषएव ते महिमा दुरवगाहः अमानुषस्तु किमिति तात्पर्य्यार्थः । द्वितीयार्द्धेऽस्य कद्रुञ्जनावृत्त्या छेकानुप्रासः ॥ २५ ॥

लघूकरिष्यन्निति । त्वमतिभारेण ऊर्व्या स्वरूपेण भङ्गुरां स्वयं भज्यमानां । भञ्जभासमिदो घुरच् भङ्गुरः कर्म्मकर्त्तरीति वामनः । अमूं भुवमित्यर्थः । लघूकरिष्यन् निर्भारां करिष्यन् किल । अभूततद्भावे च्विः च्वौ चेति दीर्घः । तृतीया द्यौस्त्रिदिवः स्वर्ग्गस्तस्मात् । घञर्थे कविधानं इत्तिविसंबे सङ्ख्याशब्दस्य पूरणार्थत्वं त्रिभागादिवत् । अवातरः अवतीर्णोऽसि साम्प्रतं सम्प्रति उदूढलोकत्रितयेन कुक्षाविति शेषः त्वया धरित्री गुरुः पूज्या भारवती च क्रियतेतरां अतिशयेन क्रियते । तिङश्चेति तरप् किमेत्तिङव्ययादित्यादिना आमुप्रत्ययः । अयमर्था

निजौजसोज्जासयितुं जगद्द्रुहा
मुपाजिहीथा न महीतलं यदि ।
समाहितैरप्यनिरूपितस्ततः
पदं दृशः स्याः कथमीश मादृशाम् ॥ ३७॥

गुरुकर्म्मेति विरोधाभासोऽलङ्कारः। आभासत्वे विरोधस्य विरोधाभावउच्यतइति लक्षणात् ॥ ३६ ॥

निजेति । निजौजसा स्वतेजसा जगद्भ्योद्रुह्यन्तीति जगद्द्रुहः कंसादयः। सत्सूद्विषेत्यादिना क्विप् । तेषां उज्जासयितुन्नाम् हिंसितु मित्यर्थः । जासिनिप्रहणेत्यादिना कर्म्मणि शेषे षष्ठी जसु हिंसायामिति चुरादिः । महीतलं नोपाजिहीथाः यदि नावतरेस्तेत्। ओहाङ् गतौ लङि थासि रूपं। ततस्तर्हि समाहितैः समाधिनिष्ठैरपि। सकर्म्मकादप्याशितादिवदविवक्षिते कर्म्मणि कर्त्तरि क्तः । अथवा समाहितैः समाहितचित्तैरित्यर्थः । विभक्तधनेषु विभक्ता भ्रातरइतिवदुत्तरपदलोपोद्रष्टव्यः गम्यमानार्थस्याप्रयोग एव लोप इति कैयटः। अनिरूपितोऽगृहीतस्त्वमीश मादृशाञ्चर्म्मचक्षुषामिति भावः । विनयोक्तिरियं दृशोदृष्टेः पदं गोचरः कथं स्याः न कथञ्चिदित्यर्थः । तस्मात्त्वत्साक्षात्कार एवागमनप्रयोजनमिति भावः॥३७॥

ननु कोऽयं नियमोयन्ममैवायं दुष्टनिग्रहाधिकारइत्याशङ्क्यान्यस्याभावमेवाह । उपप्लुतमिति । विश्वं बिभर्त्तीति विश्वम्भरस्तत्सम्बुद्धौ हे विश्वम्भर किम्वचातः । संज्ञायां भृतॄवृजीत्यादिना खच्प्रत्यये मुमागमः । मदोद्धतैः कंसादिभिः उपप्लुतं पीडितं अदोविश्वं पातुन्त्वमेव ईशिषे शक्तोऽसि विश्वम्भरत्वादिति भावः ।

उपप्लुतं पातुमदो मदोद्धतै-
स्त्वमेव विश्वम्भर विश्वमीशिषे ।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः ॥ ३८ ॥
करोति कंसादिमहीभृतां वधा-
ज्जनो मृगाणामिव यत्तव स्तवम् ।
हरे हिरण्याक्षपुरःसरासुर-
द्विपद्विषः प्रत्युत सा तिरस्क्रिया ॥ ३९ ॥

ईश ऐश्वर्य्ये लिटि थासि रूपं । अत्र वैधर्म्येण दृष्टान्तमाह । क्षपायास्तमस्काण्डैस्तमोवर्ग्गैः । काण्डोऽस्त्री दण्डबाणार्व्ववर्ग्गावसरवारिष्वित्यमरः । कस्कादिषु चेति विसर्जनीयस्य सत्वं । मलीमसं मलिनं । मलीमसन्तु मलिनं कच्चरं मलदूषितमित्यमरः । ज्योत्स्नातमिस्रेत्यादिना मत्वर्थीयो निपातः । नभः क्षालयितुं रवेः ऋते रविं विना । अन्यारादितरर्त्ते इति पञ्चमी । कः क्षमेत शक्नुयात् न कोऽपीत्यर्थः । अत्र वाक्यद्वये समानधर्म्मस्यैकस्येशिषे क्षमेतेति शब्दद्वयेन वस्तुभावेन निर्द्देशात्तत्रापि व्यतिरेकमुखत्वा द्वैधर्म्येण प्रतिवस्तूपमालङ्कारः । तदुक्तं सर्व्वस्य वाक्यार्थगतत्वेन सामान्यस्य वाक्यद्वये पृथङ्निर्द्देशे प्रतिवस्तूपमा ॥ ३८ ॥

करोतीति । किञ्च जनो मृगाणामिव कंसादिमहीभृतां वधाद्धेतोः स्तवं स्तोत्रं । स्तवः स्तोत्रं नुतिः स्तुतिरित्यमरः । करोतीति यत् हे हरे हे कृष्ण हे सिंहेति च गम्यते सा स्तुतिक्रिया हिरण्याक्ष

प्रवृत्तएव स्वयमुज्झितश्रमः
क्रमेण पेष्टुम्भुवनद्विषामसि ।
तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः ॥ ४० ॥

पुरःसराः हिरण्याक्षप्रभृतयोये असुरास्तएव द्विपास्तेषां द्विषः हन्तुरित्यर्थः । तस्य तव प्रत्युत वैपरीत्येन प्रत्युतेत्युक्तवैपरीत्ये इति गणव्याख्यानात् । तिरस्क्रिया अवमानः । यदिति सामान्ये नपुंसकं । सेति विधेयलिङ्गं । गजघातिनः सिंहस्य मृगवधवर्णन मिव महासुरहन्तुस्तव कंसादिक्षुद्रनृपवधवर्णनं तिरस्कार एवेत्यर्थः । अत्रासुरद्विपानामिति हरिबद्धुरिरिति श्लिष्टपरम्परित रूपकं मृगाणामिवेत्युपमयाऽङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ ३९ ॥

एवं स्तुत्या देवमभिमुखीकृत्यागमनप्रयोजनं वक्तुमुपोद्घातयति । प्रवृत्तइति । त्वमुज्झितश्रमस्त्यक्तश्रमः सन् क्रमेण भुवनानि द्विषन्तीति भुवनद्विषः दुष्टाः तेषां पेष्टुं तान् हिंसितुमित्यर्थः । आशिनिप्रहणेत्यादिना कर्म्मणि शेषे षष्ठी । स्वयमपरप्रेरितएव प्रवृत्तोसि एवं तर्हि पिष्टपेषणं किमिति चेत्तत्राह । तथापि स्वतः प्रवृत्तेऽपि मिथोरहसि त्वदाभाषणे त्वया सह संलापे लोलुपं लुब्धं । लुब्धोऽभिलाषुकस्तृष्णकसमौ लोलुपलोलुभावित्यमरः । मनोमां वाचालतया सह युनक्ति वाचालं करोतीत्यर्थः । वाचो बह्व्योऽस्य सन्तीति वाचालः । आलजाटचौ बहुभाषिणीत्यालच् । स्याज्जल्पकस्तु वाचालोवाचाटो बहुभाषिणीत्यमरः ॥ ४० ॥

तदिन्द्रसन्दिष्टमुपेन्द्र यद्वचः
क्षणं मया विश्वजनीनमुच्यते ।
समस्तकार्य्येषु गतेन धुर्य्यता
महिद्विषस्तद्भवता निशम्यताम् ॥ ४१ ॥

अथ स्ववाक्यश्रवणं सहेतुकमाप्रार्थयते । तदिति । तत्तस्मादिन्द्रमुपगतः उपेन्द्रः इन्द्रावरजः अतएवेन्द्रसन्दिष्टं श्रोतव्यमिति भावः। किञ्च विश्वस्मै जनाय हितं विश्वजनीनं । आत्मन्विश्वजनभोगोत्तरपदात् खः । यद्वचः क्षणम्न तु चिरं मयोच्यते । तद्वचोऽहिद्विषोवृत्रघ्नः । सर्प्पे वृत्रासुरेऽप्यहिरिति वैजयन्ती । समस्तकार्य्येषु धुर्य्यतां धुरन्धरत्वं गतेन अतोऽपि भवता निशम्यतां । प्रार्थनायां लोट् । धुरं वहतीति धुर्य्यः । धुरोयड्ढकाविति यत्प्रत्ययः । स्फुटमत्र पदार्थहेतुककाव्यलिङ्गमलङ्कारः ॥ ४१ ॥

अथ शिशुपालो हन्तव्य इति वक्तुन्तस्यावश्यवध्यत्वेऽनन्यवध्यत्वज्ञापनौपयिकतया औद्धत्यप्रकटनार्थं जन्मान्तरवृत्तान्तं तावदुद्घाटयति । अभूदिति । प्रतिपक्षाच्छत्रोः जन्म यासान्तासा श्रियामभूमिरविषयः निर्भीक इत्यर्थः । तपनद्युतिः सूर्य्यतापो दितेस्तनूजो दैत्योऽभूत् । कोऽसावत आह । हरेरिन्द्रस्य इन्द्रशब्दार्थनिसूदनं इन्दतीति इन्द्रः । इदि परमैश्वर्य्ये ऋज्रेन्द्रेत्यादिना रन्प्रत्ययान्तः औणादिकनिपातः । तस्य इन्द्र इति शब्दस्येन्द्र इति संज्ञापदस्य योऽर्थः परमैश्वर्य्यलक्षणः तस्य निसूदनं निवर्त्तकं । कर्त्तरि ल्युट । हरेरैश्वर्य्यनिहन्तारमित्यर्थः । यं दैत्यं हिरण्यपूर्व्वं कशिपुम्प्रचक्षते हिरण्यकशिपुमाहुरित्यर्थः । अत्र हिरण्यशब्द

अभूदभूमिः प्रतिपक्षजन्मनां
भियां तनूजस्तपनद्युतिर्दितेः।
यमिन्द्रशब्दार्थनिसूदनं हरे
र्हिरण्यपूर्व्वं कशिपुं प्रचक्षते ॥ ४२ ॥
समत्सरेणासुर इत्युपेयुषा
चिराय नाम्नः प्रथमाभिधेयताम्।
भयस्य पूर्व्वावतरस्तरस्विना
मनस्सु येन द्युसदां न्यधीयत ॥ ४३ ॥

पूर्व्वकत्वं कशिपुशब्दस्यैव न तु संज्ञिनस्तदर्थस्येति शब्दपरस्य कशिपुशब्दस्यार्थगतत्वेनाप्रयोज्यस्य प्रयोगादवाच्यवचनाख्यार्थदोषमाहुः। यदेवावाच्यवचनमवाच्यवचनं हि तदिति समाधानं एवंविधविषये शब्दपरेणार्थलक्षणेति कथञ्चित्सम्पाद्यमित्युक्तमस्माभिर्देवपूर्व्वं गिरिन्तेइति धनुरुपपदमस्मै वेदमभ्यादिदेशेत्येतद्व्याख्यानावसरे सञ्जीविन्यांकृष्टापथे च विशेषस्त्वत्रायं दैत्यमपदिश्य हिरण्यपूर्व्वं कशिपुम्प्रचक्षते संज्ञात्वेन प्रयुङ्क्ते ॥ ४२ ॥

समत्सरेणेति। समत्सरेण अन्यशुभद्वेषसहितेन। मत्सरोऽन्यशुभद्वेषइत्यमरः। अस्यतीत्यसुरः। असेरुरन्। असुरइति नाम्नः चिराय चिरकालेन। चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाइत्यमरः। प्रथमाभिधेयतामुपेयुषा अन्वर्थतया मुख्यार्थतां गतेन तरस्विना बलवता। तरसी बलरंहसी इति विश्वः। येन हिरण्यकशिपुना दिवि सीदन्तीति द्युसदान्देवानां मनस्सु

दिशामधीशांश्चतुरोयतः सुरा
नपास्य तं रागहृताः सिषेविरे ।
अवापुरारभ्य ततश्चलाइति
प्रवादमुच्चैरयशस्करं श्रियः ॥ ४४ ॥

भयस्य पूर्व्वावतरः प्रथमप्रवेशः । ऋदोरप् । न्यधीयत निहितः । धाञः कर्म्मणि लङ् । अस्मादेव देवानां प्रथमं भयस्योत्पत्ति रभूदित्यर्थः ॥ ४३ ॥

दिशामिति । श्रियः सम्पदः यतोयद्देत्यर्थः दिशामधीशान् दिक्पतीनपि चतुरः सुरान् इन्द्रवरुणयमकुवेरान् अपास्य त्यक्ता तं हिरण्यकशिपुं रागहृताः रागकृष्टाः सत्यः न तु बलादिति भावः । सिषेविरे यतोवीरप्रियाः श्रियइति भावः । ततआरभ्य तदा प्रभृति अयशः करोतीत्ययशस्करं दुष्कीर्त्तिहेतुमित्यर्थः । कृञो हेतुताच्छील्यानुलोम्येष्विति टप्रत्ययः । अतः कृकमीत्यादिना विसर्ज्जनीयस्य सत्वं । उच्चैः प्रचुरं चलाअस्थिराइति प्रवादञ्जनाप वादमापुः दिगीशानामपि सर्व्वस्वहारित्वात्तदैाद्धत्यस्य प्राकव्य मिति भावः ॥ ४४ ॥

पुराणीति । किञ्च नाकिनां सुराणां गणैः यं हिरण्यकशिपुं आशङ्क्य बाधकत्वेनोत्प्रेक्ष्य स कालः आदिर्यस्मिन् तत्तदादि तदा प्रभृति स्वरूपशोभैवैक फलं मुख्यं प्रयोजनं येषां तेषां सुरादीनां तानि तथोक्तानि प्रागीदृगबाध्यशत्रोरभावादिति भावः । नपुंसकमनपुंसकेनेत्यादिना नपुंसकैकशेषः । पुराणि दुर्गाणि प्राकारपरिखादिना अगम्यानि चक्रिरे । कृदुरोरधिकरणे इति

पुराणि दुर्गाणि निशातमायुधं
बलानि शूराणि घनाश्च कञ्चुकाः ।
स्वरूपशोभैकफलानि नाकिनां
गणैर्यमाशङ्क्य तदादि चक्रिरे ॥ ४५ ॥

स सञ्चरिष्णुर्भुवनान्तरेषु यां
यदृच्छयाशिश्रियदाश्रयः श्रियः ।
अकारि तस्यै मुकुटोपलस्खल
त्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः ॥ ४६ ॥

गमेर्डः । आयधं निशातं निशितञ्चक्रे इति विभक्तिविपरिणामेनान्वयः । शो तनूकरणे इति धातोः क्तः शाच्छोरन्यतरस्यामितीत्वविकल्पात्पचे आत्वम् । बलानि सैन्यानि शूराणि शौर्य्यवन्ति चक्रिरे सम्पादितानि कञ्चुकावारवाणाः लोहवर्माणीत्यर्थः । कञ्चुको वारवाणोऽस्त्रीत्यमरः । घनादुर्भेदाश्चक्रिरे इत्यं नित्यसन्नद्धा जायते स्मेत्यर्थः ॥ ४५ ॥

स इति । अन्येषु भुवनेषु भुवनान्तरेषु । सुप्सुपेति समासः । सञ्चरिष्णुः सञ्चरणशीलः । अलङ्कृञित्यादिना चरेरिष्णुच् । श्रियो लक्ष्म्याः आश्रयः स हिरण्यकशिपुः । यदृच्छया स्वैरवृत्त्या । यदृच्छा स्वैरवृत्तिरित्यमरः । यां दिशमशिश्रियत् अगमत् । श्रियतेर्लुङ् णिश्रीत्यादिना चङि द्विर्भावः इयङादेशः । मुकुटोपलेषु मौलिरत्नेषु स्खलन्तः करा येषान्तैः शिरसि बद्धाञ्जलिभिरित्यर्थः । उपलः प्रस्तरे रत्ने इति विश्वः । तिस्रो दशावाल्यकौमारयौवनानि जन्मसत्तावृद्धयो वा येषान्तैस्त्रिदशैर्देवैः । तिस्रः सन्ध्याः समा

सटाच्छटाभिन्नघनेन बिभ्रता
नृसिंह सैंहीमतनुं तनुं त्वया।
स मुग्धकान्तास्तनसङ्गभङ्गुरै
रुरोविदारं प्रतिचस्करे नखैः ॥ ४७ ॥

स्तास्त्रिसन्ध्यम्। तद्धितार्थोत्तरपदेत्यादिना समाहारे द्विगुः द्विगुरेकवचनं वा टावन्तइति पक्षे नपुंसकत्वं अत्यन्तसंयोगे द्वितीया। तस्यै दिशे करैर्हस्तैः। नमः स्वस्तीत्यादिना चतुर्थी। नमः नमस्कारोऽकारि कृतम्। कृञः कर्मणि लुङ् चिण् भाव कर्मणोरिति चिण्। सन्ध्यावन्दनेऽपि दिङ्नियमं परित्यज्य तदागमनभयात्तस्यै दिशे नमस्कारः कृतइति भावः ॥ ४६ ॥

अथ सोऽपि त्वयैव हतइत्याह। सटाच्छटेति। हे नृसिंह नरः सिंहइवेत्युपमितसमासः ना चासौ सिंहश्चेत्यपि प्रस्तावात्। सिंहस्ये मां सैंहीं तनुङ्कायं बिभ्रता नृसिंहावतारभाजेत्यर्थः। किम्भूतां अतनुं विस्तीर्णां अतएव सटाच्छटाभिः केशरसमूहैः भिन्नाघना मेघायेन अभ्रङ्कषविग्रहत्वादिति भावः। सटा जटाकेशरयोरिति तनुः काये कृशेऽल्पे चेति चविश्वः। त्वया स दैत्यः मुग्धौ नवौ। मुग्धः सौम्ये नवे मूढे इति वैजयन्ती। यौ कान्तास्तनौ तयोः सङ्गेनापि भङ्गुरैः कुटिलैर्नखैरुरोविदारं उरोविदार्य्य। परि क्लिश्यमाने चेति णमुल्प्रत्ययः। प्रतिचस्करे हतः। किरतेः कर्म्मणि लिट् ऋच्छत्यृतामिति गुणः हिंसायां प्रतेश्चेति सुडागमः। वज्र कठिनोऽपि नखैर्विदारितइति वाङ्मनसयोरगोचरमहिमस्ते कि मसाध्यमिति भावः ॥ ४७ ॥

विनोदमिच्छन्नथ दर्प्पजन्मनो
रणेन कण्ड्वास्त्रिदशैः समं पुनः ।
स रावणोनाम निकामभीषणं
बभूव रक्षः क्षतरक्षणं दिवः ॥ ४८ ॥

अथास्य जन्मान्तरचेष्टितान्याचष्टे । विनोदमिति । अथ स हिरण्यकशिपुः पुनः भूयोऽपि त्रिदशैः समं सह । साकं सार्द्धं समं सहेत्यमरः । रणेन दर्प्पादन्तस्साराज्जन्म यस्यास्तस्याः कण्ड्वाः भुजकण्डूतेर्विनोदमपनोदमिच्छन् प्राग्भवनखक्षतैस्तदपनोदाभावादित्यर्थः । दिवः स्वर्गस्य क्षतं नष्टं रक्षणं रक्षा येन तत् क्षतयुरक्षणमित्यर्थः । सापेक्षत्वेऽपि गमकत्वात्समासः । अनेन देवसर्व्वस्वापहारित्वमुक्तं । भीषयतइति भीषणः नन्द्यादित्वात् ल्युः भियोहेतुभये षुगिति षुक् । निकामं भीषणः । सुप्सुपेति समासः । रावणोनाम रावणइति प्रसिद्धं रक्षोबभूव राक्षसयोनौ जातइत्यर्थः । विश्रवसोपत्यं पुमान् रावणइति विग्रहः । तस्यापत्यमित्यणि कृते विश्रवसोविश्रवणरवणाविति प्रकृतेरवणादेशः । पौराणिकास्तु रावयतीति व्युत्पादयन्ति तदुक्तमुत्तरकाण्डे यस्माल्लोकत्रयं चैतद्रावितं भयमागतं । तस्मात्त्वं रावणोनाम नाम्ना वीरोभविष्यसीति । रौतेर्ण्यन्तात्कर्त्तरि ल्युट् । रावणरक्षसोर्नियतलिङ्गत्वाद्विशेषणविशेष्यभावेऽपि स्वलिङ्गता ॥ ४८ ॥

अथास्यौद्धत्यमष्टादशश्लोक्याचष्टे । प्रभुरिति । योरावणः भुवनत्रयस्य प्रभुः स्वामी बुभूषुः भवितुमिच्छुः । भुवः सन्नन्तादुप्रत्ययः । अतिरागादुत्साहात्न तु फलविलम्बनिर्वेदादिति भावः । इत्थं

प्रभुर्बुभूषुर्भुवनत्रयस्य यः
शिरोऽतिरागाद्दशमं चिकर्त्तिषुः ।
अतर्कयद्विघ्नमिवेष्टसाहसः
प्रसादमिच्छासदृशं पिनाकिनः ॥ ४९ ॥

समुत्क्षिपन् यः पृथिवीभृतां वरं
वरप्रदानस्य चकार शूलिनः ।
त्रसत्तुषाराद्रिसुताससम्भ्रम
स्वयङ्ग्रहाश्लेषसुखेन निष्क्रयम् ॥ ५० ॥

शिरः चिकर्त्तिषुः कर्त्तितुं छेत्तुमिच्छुः । कृती छेदे इति धातोः सन्नन्तादुप्रत्ययः । इष्टसाहसः प्रियसाहसः अत एवेच्छासदृश मिच्छानुरूपं पिनाकिनः प्रसादं वरं विघ्नमिवातर्कयत् उत्प्रेक्षितवान् इति परमसाहसिकत्वोक्तिः इतआरभ्य श्लोकषट्केऽपि यच्छब्दस्य स रावणोनाम रक्षोबभूवेति पूर्व्वेणान्वयः । रक्षूराजस्तु न चक्रमस्याक्रमताधिकन्धरमिति उपरिष्टादन्वयइत्याह तदसत् गुणानां च परार्थत्वादिति न्यायादारुण्यादिवत्प्रत्येकं प्रधानान्वयिनां मिथःसम्बन्धायोगादित्यलम् शाखाचङ्क्रमणेन । पुरा किल रावणः काम्ये कर्म्मणि पशुपतिप्रीणनाय नव शिरांसि अग्नौ हुत्वा दशमारम्भे सन्तुष्टात्तस्मात् त्रैलोक्याधिपत्यं वव्रे इति पौराणिकी कथात्रानुसन्धेया ॥ ४९ ॥

अथ कैलासोत्क्षेपणवृत्तान्तमाह । समुत्क्षिपन्निति । योरावणः पृथिवीभृतां पर्व्वतानां वरं श्रेष्ठं कैलासं समुत्क्षिपन् दर्प्पादिति शेषः। शूलिनोवरप्रदानस्य पूर्व्वोक्तस्य त्रसन्त्याः शैलचलनेन बिभ्यत्या

पुरीमवस्कन्द लुनीहि नन्दनं
मुषाण रत्नानि हरामराङ्गनाः ।
विगृह्य चक्रे नमुचिद्विषा बली
यइत्थमस्वास्थ्यमहर्दिवं दिवः ॥ ५१ ॥

तुषाराद्रिसुतायाः पार्व्वत्याः ससम्भ्रमोयः स्वयङ्ग्रहः प्रियप्रार्थनां विना कण्ठग्रहणं । सुप्सुपेति समासः । तेन आश्लेषः सम्मेलनं तेन यत्सुखं । तेन त्रैलोक्याधिपत्यसुखादुत्कृष्टेनेति भावः । निष्क्रयं प्रत्युपकारनिर्मितिं चकार । निष्क्रयोबुद्धियोगे स्यात्सामर्थ्ये निर्गतावपीति वैजयन्ती । यद्वा निष्क्रयं चकार क्रयेण व्यवहारेण यात्रादोषदैन्यं ममार्ज्जेत्यर्थः । अत्र सुखवरदानयोर्विनिमयात् परिवृत्तिरलङ्कारः ॥ ५० ॥

पुरीमिति । योबली बलवान् रावणः नमुचिद्विषा इन्द्रेण विगृह्य विरुध्य पुरीममरावतीमवस्कन्द अवरोध नन्दनं इन्द्रवनं । नन्दनं वनमित्यमरः । लुनीहि चिच्छेद । ई हल्यघोरितीकारः । रत्नानि श्रेष्ठवस्तूनि मणीन्वा । रत्नं श्रेष्ठे मणावपीति विश्वः । मुषाण मुमोष । मुष स्तेये हलः श्नः शानज्झाविति श्नः शानजादेशः । अमराङ्गनाः हर जहार । सर्वत्र पौनःपुन्येनेत्यर्थः इत्थमनेन प्रकारेण अहनि च दिवा चाहर्दिवं अहन्यहनीत्यर्थः । अचतुरे त्यादिना सप्तम्यर्थवृत्तौ द्वन्द्वे समासान्तोनिपातः । दिवः स्वर्गस्य अस्वास्थ्यमुपद्रवं चक्रे । अत्रावस्कन्देत्यादौ क्रियासमभिहारे लोट् लोटोहिस्वौ च वा तध्वमोरित्यनुवृत्तौ समुच्चयेऽन्यतरस्यामिति विकल्पेन कालसामान्ये लोट् । तस्य यथोपग्रहं सर्वतिङादेशो हिस्वौ च प्रकरणादिना लर्थविशेषावसानं अतोहेरिति यथायोग्यं

सलीलयातानि न भर्त्तुरभ्रमो-
र्न चित्रमुच्चैःश्रवसः पदक्रमम् ।
अनुद्रुतः संयति येन केवलं
बलस्य शत्रुः प्रशशंस शीघ्रताम् ॥ ५२ ॥
अशक्नुवन् सोढुमधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम् ।
प्रविश्य हेमाद्रिगुहागृहान्तरं
निनाय बिभ्यद्दिवसानि कौशिकः ॥ ५३ ॥

हिलुक् पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः अवस्कन्दनादि क्रियाविशेषाणां समुच्चयः क्रियासमभिहारः तत्सामान्यस्य करोतेः। समुच्चये सामान्यवचनस्येत्यनुप्रयोगश्चक्रे इति । अत्र तिङ् वैचित्र्यात्सौशब्द्याद्योगुणः । सुपां तिङां परावृत्तिः सौशब्दमिति लक्षणात् समुच्चयश्चालङ्कारः ॥ ५१ ॥

सलीलेति । संयति युद्धे । समुदायः स्त्रियां संयत्समित्याजि समिद्युधइत्यमरः । येन रावणेन अनुद्रुतोऽनुधावित बलस्य शत्रु रिन्द्रः अभ्रमोर्भर्त्तुरैरावतस्य सलीलयातानि सभङ्गीकगमनानि न प्रशशंस तथा उच्चैःश्रवसः स्वाश्वस्य चित्रं नानाविधं पदक्रमं पादविक्षेपं अर्द्धपुलायितादिगतिविशेषमित्यर्थः न प्रशशंस किन्तु केवलं शीघ्रतां शीघ्रगामित्वमेव प्रशशंस अन्यथा शीघ्रं म मास्कन्द्य ग्रहीष्यतीति भयादिति भावः ॥ ५२ ॥

अशक्नुवन्निति । अधीरलोचनः अस्थिरदृष्टिः कौशिको महेन्द्रः उलूकश्च । महेन्द्रगुग्गुलूलूकव्यालग्राहेषु कौशिकइत्य

बृहच्छिलानिष्ठुरकण्ठघट्टना
द्विकीर्णलोलाग्निकणं सुरद्विषः ।
जगत्प्रभोरप्रसहिष्णु वैष्णवं
न चक्रमस्याक्रमताधिकन्धरम् ॥ ५४ ॥

मरः । सहस्ररश्मेः सूर्य्यस्येव यस्य रावणस्य विक्रमकर्म्मणो दर्शनं सोढुमशक्नुवन् । हेमाद्रेर्गुहेव गृहस्तस्यान्तरं प्रविश्य बिभ्यत्तत्रापि वेपमान एव । बिभीतेः शतरि नाभ्यस्ताच्छतुरिति नुमभावः । दिवसानि वासराणि निनाय । वा तु क्लीबे दिवसवासरौ इत्यमरः । यथा पेचकः सूर्य्योदये भीतः सन् तिष्ठति तथा सोऽपीति भावः । कौशिक इत्यभिधायाः प्रस्तुतैकगोचरत्वेनोभयस्येषेऽपि विशेष्यस्येवा सम्भवात् उलूकविषयशब्दशक्तिमूलोध्वनिः सहस्ररश्मेरिवेत्युपमान निर्व्वाहकत्वात् वाच्यसिद्धाङ्गम् ॥ ५३ ॥

बृहच्छिलेति । बृहति शिलेव निष्ठुरे कण्ठे घट्टनादभिघाता द्विकीर्णा विक्षिप्ताः लोलाश्चाग्निकणाः स्फुलिङ्गाः यस्य तत् अतएवाप्रसहिष्णु अनभिभावकं । प्रसहनमभिभव इति वृत्तिकारः । अलङ्कृञित्यादिना इष्णुच् । वैष्णवं चक्रं सुदर्शनं जगत्प्रभोः सकललोकैकस्वामिनः अस्य सुरद्विषो रावणस्य कन्धरायामधि अधिकन्धरं अधिग्रीवं । विभक्त्यर्थेऽव्ययीभावः अव्ययीभावश्चेति नपुंसकत्वात् ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वम् । कण्ठो गलो ऽथ ग्रीवायां शिरोधिः कन्धरेत्यपीत्यमरः । नाक्रमताप्रतिहतं न क्रमते स्म न प्रवर्त्तते स्म किन्तु प्रतिहतमेवेत्यर्थः । वृत्तिसर्गतायनेषु क्रम इति वृत्तावात्मनेपदं वृत्तिरप्रतिबन्धः ॥ ५४ ॥

विभिन्नशङ्खः कलुषीभवन्मुहु-
र्मदेन दन्तीव मनुष्यधर्मणः ।
निरस्तगाम्भीर्यमपास्तपुष्पकं
प्रकम्पयामास न मानसं न सः ॥ ५५ ॥

रणेषु तस्य प्रहिताः प्रचेतसा
सरोषहुंकारपराङ्मुखीकृताः ।
प्रहर्तुरेवोरगराजरज्जवो
जवेन कण्ठं सभयाः प्रपेदिरे ॥ ५६ ॥

विभिन्नेति । स रावणो मदेन दर्पेण भदानेन च । मदो दर्पे भदानयोरिति विश्वः । दन्तीव गज इव विभिन्नो विघट्टितः शङ्खो निधिभेदः कम्बुश्च येन सः सन् । शङ्खो निध्यन्तरे कम्बुललाटास्थि नखेषु चेति विश्वः । अकलुषं कलुषं क्षुब्धमाविलं च भवत् कलुषी भवत् निरस्तं गाम्भीर्यमविकारित्वमगाधत्वं च यस्य तत् । अपास्तानि पुष्पाणि पुष्पकं विमानश्च यस्मात् तत् । पुष्पपक्षे वैभाषिकः कप् प्रत्ययः । मनुष्यस्येव धर्मः अस्वत्वादिर्यस्येति स्वामी । तस्य मनुष्य धर्मणः । धर्मादनिच् केवलादित्यनिच् । मानसं चित्तं तदीयं सरश्च । मानसं सरसि स्वान्त इति विश्वः । मुहुर्न कम्पयामास न चोभयामासेति किन्तु कम्पयामासैवेत्यर्थः । कुबेरस्य महामहिमतया सम्भाविता प्रकम्पित्वनिवारणाय नञ्द्वयं सम्भाव्यनिषेधनिवर्त्तने नञ्द्वय मिति वामनः । अत्र दन्तिरावणयोः प्रकृताप्रकृतयोः श्लेषः ॥ ५५ ॥

रणेष्विति । किञ्च रणेषु प्रचेतसा वरुणेन प्रहिताः प्रयुक्ताः उरगराजमयाः सर्पास्ते रज्जव इव उरगराजरज्जवः नागपाशा

परेतभर्तुर्महिषोऽमुना धनु
र्विधातुमुत्खातविषाणमण्डलः ।
हृतेऽपि भारे महतस्त्रपाभरा
दुवाह दुःखेन भृशानतं शिरः ॥ ५७ ॥

इत्यर्थः । तस्य रावणस्य सरोषहुङ्कारेण पराङ्मुखीकृताः व्यावर्त्तिताः । अतएव सभयाः सत्यः जवेन वेगेन प्रहर्त्तुः प्रयोक्तुः अचेतसएव कण्ठं प्रपेदिरे प्राप्ताः । अत्र परहिंसाप्रयुक्तस्यायुधस्य वपरीत्येन स्वकण्ठग्रहणादनर्थोत्पत्तिरूपोविषमालङ्कारः ॥ ५६ ॥

परेतभर्तुरिति । अमुना रावणेन धनुः शार्ङ्गं विधातुं निर्म्मातुं उत्खातमुत्पाटितं विषाणयोः शृङ्गयोर्मण्डलं वलयं यस्य स परेत भर्त्तुः यमस्य महिषोवाहनभूतइति भावः । भारे विषाणरूपे । भृञोघञ् । हृतेऽपि महतस्त्रपैव भरस्तस्मात्तोऽपि दुर्भरादिति भावः । भृञः श्वैयादिकात् च्छदोरविति अप्प्रत्ययः । भृशमत्यर्थ मानतं नम्रं शिरोदुःखेनोवाह वहति स्म । असंयोगाल्लिट् कित्वाद्वचिस्वपीत्यादिना संप्रसारणं । हृतेऽपि भारे नतमिति विरोधः तदनुप्राणिता चेयं अवनतिहेतुत्वसाधर्म्यात् त्रपा भारत्वोत्प्रेक्षा ॥ ५७ ॥

स्पृशन्निति । अहः करोतीत्यहस्करः सूर्य्यः । दिवाविभा निशेत्यादिना टप्रत्ययः कस्कादित्वात्सत्वं । शुचौ समये ग्रीष्मकाले अनुपहते आचारे च स्थितोऽपि । शुचिः शुद्धेऽनुपहते शृङ्गारा षाढयोरपि ग्रीष्मे हुतवहेऽपि स्यादिति विश्वः । समयाः शपथाचार कालसिद्धान्तसंविदइत्यमरः । असमयपातिभिः सङ्कुचितदृष्टिभि

स्पृशन् सशङ्कः समये शुचावपि
स्थितः कराग्रैरसमग्रपातिभिः ।
अघर्म्मघर्म्मोदकविन्दुमौक्तिकै
रलञ्चकारास्य वधूरहस्करः ॥ ५८ ॥
कलासमग्रेण गृहानमुञ्चता
मनस्विनीरुत्कयितुं पटीयसा ।
विलासिनस्तस्य वितन्वता रतिं
न नर्म्मसाचिव्यमकारि नेन्दुना ॥ ५९ ॥

रित्यर्थः । कराणामंशूनां हस्तानां चाग्रैः । बलिहस्तांशवः करा इत्यमरः । सशङ्कः स्पृशन् अविश्वासभयादिति भावः । अघर्म्माः अनुष्णाः घर्म्मोदकविन्दवः स्वेदोदविन्दवः । मन्थोदनेत्यादिना विकल्पादुदकशब्दस्योदादेशाभावः । तैरेव मौक्तिकैरस्य वधूरल ञ्चकार ग्रीष्मे तद्भयान्नासह्यन्तपतीत्यर्थः । अत्र प्रस्तुतसूर्य्यविशेषण मात्रसाम्यादप्रस्तुतप्रसाधकप्रतीतेः समासोक्तिरलङ्कारः ॥ ५८ ॥

कलासमग्रेणेति । कलाभिः षोडशांशैः शिल्पविद्याभिश्च समग्रेण सम्पूर्णेन । काले शिल्पे वित्तवृद्धौ चन्द्रांशे कलने कलेति वैजयन्ती । गृहानमुञ्चता सदा तद्गृहेष्वेव वसता दण्डभयात् सेवाधर्मत्वाच्चेति भावः । मनस्विनीर्मानिनीरुत्का उत्सुकाः कर्त्तुं उत्कयितुं । उत्क उन्मनाइति निपातनादुत्कशब्दात्तत्करोतीति ण्यन्तात्तुमुन् । पटीयसा मनोभेदचतुरेणेत्यर्थः । कुतः रतिं वितन्वता चन्द्रिकाभिश्चतुरोक्तिभिश्च रागं वर्द्धयता इन्दुना विलासिनो विलसनशीलस्य । वौकषलसेत्यादिना घिणुन् प्रत्ययः ।

विदग्धलीलोचितदन्तपत्रिका
विधित्सया नूनमनेन मानिना।
न जातु वैनायकमेकमुद्धृतं
विषाणमद्यापि पुनः प्ररोहति ॥ ६० ॥

तस्य रावणस्य नर्म्मसाचिव्यं क्रीडासम्बन्ध्यधिकारित्वे सचेष्टत्वम्। लीला क्रीडा च नर्म्म चेत्यमरः। नाकारीति न किन्त्वकार्य्येवेत्यर्थः। अनौचित्यात्प्राप्तनर्मसाचिव्यनिषेधनिवारणार्थं नञ्द्वयं। सम्भाव्यनिषेधनिवर्त्तने नञ्द्वयमिति वामनः। अत्रेन्दोः प्रकृतस्याप्रकृतेन नर्म्मसचिवेन स्लेषः॥ ५८ ॥

विदग्धेति। मानिना अहङ्कारिणा अनेन रावणेन विदग्धलीलाश्चतुरविलासिन्यइत्यर्थः। तासामुचितास्तु तादन्तपत्रिकास्तु कर्णभूषणानि विलासिनीविभ्रमदन्तपत्रिकेति साधीयान्पाठः। अन्यथा विप्रकृष्टार्थप्रतीतिकत्वेन कष्टाख्यार्थदोषापत्तेः। कष्टं तदर्थावगमोदूरायत्तोभवेदिति लक्षणात्। विलासिनीनां याविभ्रमदन्तपत्रिकाविभ्रमार्थानि यानि दन्तमयपत्राणि। विभ्रमदन्तशब्दयोः षष्ठीसमासपर्य्यवसानात् तादर्थ्यलाभः। तासां विधित्सया विधातुमिच्छया। विपूर्व्वाद्धधातेः सनि मिमीत्यादिना इकारः लोपोऽभ्यासस्येत्यभ्यासलोपस्ततः स्त्रियामित्यनुवृत्तौ अ प्रत्ययादित्यकारप्रत्यये टाप्। नूनं निश्चितं जातु कदाचिदपि। कदाचिज्जात्वित्यमरः। उद्धृतमुत्पाटितं विनायकस्य गणेशस्येदं वैनायकं एकं विषाणं दन्तः। विषाणं पशुशृङ्गे स्यात् क्रीडाद्विरददन्तयोरिति विश्वः। अद्यापि पुनर्न प्ररोहति न प्रादुर्भवति। प्रपूर्व्वाद्रु

निशान्तनारीपरिधानधूनन
स्फुटागसाप्यूरुषु लोलचक्षुषः।
प्रियेण तस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ॥ ६१ ॥

रुह प्रादुर्भावे इत्यस्मात् लट्। किमन्यदकार्य्यमस्येति भावः। एतदन्यथा कथं गजाननस्यैकदन्तलमुत्प्रेक्ष्यते नूनमिति ॥ ६० ॥

निशान्तेति। निशान्तं गृहं। निशान्तं गृहशान्तयोरिति विश्वः। तत्र याः नार्य्यः शुद्धान्तःस्त्रियइत्यर्थः। तासां परिधानानि अन्तरीयाणि। अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुकइत्यमरः। तेषां धूननं चालनं। धूञ्‌ कम्पने इत्यस्मात् ल्युट्। धूञ्प्रीञोर्नुग्वक्तव्यइति नुक्। तेन स्फुटागसा व्यक्तापराधेनापि अन्तःपुरद्रोहस्य महापराधत्वादिति भावः। ऊरुषु तासां सक्थिषु लोलचक्षुषः सतृष्णादृष्टेः। सक्थि क्लीबे पुमानूरुरिति लोलश्चलसतृष्णयोरिति चामरः। अतएव तस्य रावणस्य प्रियेण प्रमोदास्पदभूतेन अङ्गीकृता ग्लानि र्न दोषायेति न्यायादिति भावः। प्रकम्पनेन वायुना अनपराधे अपराधाभावेऽपि बाधिताः राजपुरुषैरिति शेषः। सुराः अनुचकम्पिरे स्वयमुपायेनान्तः प्रविश्यानपराधबाधानिवेदनेन मोचयता वायुना अनुकम्पिताइत्यर्थः। एकस्य वैदग्ध्यादहवो जीवन्तीति भावः ॥ ६१ ॥

तिरस्कृतइति। किञ्च तस्य रावणस्य जनाभिभाविना लोकतिरस्कारिणा महीयसामतिमहतां महधान्तेजसां महिम्ना महत्त्वेन। पृथ्वादिभ्यइमनिज्वेति इमनिच्। मुहुस्तिरस्कृतः

निरस्ततस्तस्य जनाभिभाविना
मुहुर्महिम्ना महसां महीयसाम्।
बभार वाष्पैर्द्विगुणीकृतं तनु
स्तनूनपाद्धूमवितानमाधिजैः ॥ ६२ ॥

अतएव तनुः क्षमः तनुं न पातयति जाठररूपेण शरीरं धारयतीति तनूनपादग्निरिति स्वामी। नभ्राडित्यादिसूत्रेण निपातनान्नञो लोपाभावः। आधिजैर्दुःखोत्थैर्वाष्पैः निश्वासोष्मभिः। वाष्पौ नेत्रजलोष्मणोः। पुंस्याधिर्मानसी व्यथेति विश्वामरौ। द्वौ गुणा वावृत्ती यस्य स द्विगुणः। ततः च्विः। द्विगुणीकृतं द्विरावृत्तं। गुण स्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्विति वैजयन्ती। धूमवितानं धूममण्डलं बभार अग्निरपि तत्सन्निधौ निस्तेजस्को धूमायमान आस्तेत्यर्थः। धूमद्वैगुण्यासम्बन्धे सम्बन्धाभिधानादतिशयोक्तिः ॥ ६२ ॥

परस्येति। किञ्च इद्धं दीप्तमुग्रमित्यर्थः। इन्धी दीप्तौ कर्त्तरि क्तः। तं रावणमाराधयितुं सेवितुं परस्य खेतरस्य मर्म्माणि हृदयादिजीवस्थानानि कुलाचारव्रतानि च विध्यति भिनत्तीति मर्म्मावित्। विध्यतेः क्विप् ग्रहिज्येति सम्प्रसारणं नहिवृतीत्यादिना पूर्व्वस्य दीर्घः। तं मर्म्माविधं निजं स्वीयं द्विजिह्वतायां सर्प्पत्वे यादोषोदृष्टिविषत्वादिः तम्। अन्यत्र द्विजिह्वता पिशुनता। द्विजिह्वौ सर्प्पसूचकावित्यमरः। सैव दोषस्तमुज्झतां त्यजतां फणिनां सम्बन्धिभिरजिह्मगामिभिः करचरणादिमद्विग्रहधारित्वात् ऋजु गतिभिः अकपटचारिभिश्च तथा कर्णाभ्यां सह वर्त्तन्त इति

परस्य मर्म्माविधमुज्झतां निजं
द्विजिह्वतादोषमजिह्मगामिभिः ।
तमिद्धमाराधयितुं सकर्णकैः
कुलैर्न्न भेजे फणिनां भुजङ्गता ॥ ६३ ॥

तदीयमातङ्गघटाविघट्टितैः
कटस्थलप्रोषितदानवारिभिः ।
गृहीतदिक्कैरपुनर्न्निवर्त्तिभि
श्चिराय याथार्थ्यमलम्भि दिग्गजैः ॥६४॥

सकर्णकाः तैश्चक्षुःश्रवस्त्वं विहायाविष्कृतकर्णैरित्यर्थः । तेन सहेति तुल्ययोगे बहुव्रीहिः शेषाद्विभाषेति कप् । अन्यत्र कर्णयति सर्व्वं शृणोतीति कर्णको नियन्ता । कर्णयतेर्ण्वुल् ततः पूर्व्ववत्समासे सकर्णकैः सनियामकैरित्यर्थः कुलैर्वर्गैर्भुजङ्गता सर्पता विटत्वञ्च । भुजङ्गौ विटसर्प्पयोरिति हलायुधः । न भेजे त्यक्ता भुजैर्गच्छन्तीति भुजङ्गाः । गमेः सुपि खच् च डिद्वा वाच्यः । तस्मिन्नियन्तरि खलैः खलत्वमपि सर्पैः सर्प्पत्वमपि विहाय वेषभावक्रियाभिः सौम्यत्वं श्रितमित्यर्थः । अत्र प्रस्तुतसर्प्पविशेषणसाम्यादप्रस्तुतखलव्यवहार प्रतीतेः समासोक्तिः ॥ ६३ ॥

तदीयेति । तदीयमातङ्गानां घटाभिर्यूथैः विघट्टितैरभिहतैः । गजानां घटना घटेत्यमरः । अतएव कटस्थलेभ्यः प्रोषिता न्यपगतानि दानवारीणि येषां तैः गृहीताः पलाय्य संश्रिता दिशो यैस्तैर्गृहीतदिक्कैः । शेषाद्विभाषेति कप् । अपुनर्निवर्त्तिभिर्भया

अभीक्ष्णमुष्णैरपि तस्य सोष्मणः
सुरेन्द्रवन्दिश्वसितानिलैर्यथा ।
सचन्दनाम्भःकणकोमलैस्तथा
वपुर्जलार्द्रापवनैर्न निर्ववौ ॥ ६५ ॥

त्तत्रैव स्थितैर्दिग्गजैः चिराय यायार्थं दिक्षु स्थितागजाः दिग्गजास्तदनुगतार्थनामकत्वमलम्भि लब्धम् । लभेर्ण्यन्तात्कर्म्मणि लुङ् विभाषा चिणमुलोरिति विकल्पान्नुमागमः ॥ ६४ ॥

अभीक्ष्णमिति । उष्मणा स्मरज्वरेण सहितः सोष्मा तस्य सोष्मणस्तस्य रावणस्य वपुरभीक्ष्णं भृशमुष्णैरपि शोकादिति भावः सुरेन्द्रस्य वन्द्यः वन्दीकृताः स्त्रियः तासां श्वसितानिलैः निःश्वास मारुतैर्यथा निर्ववौ निर्वृतम् । निर्व्वाणं निर्वृतौ मोक्षे इति वैजयन्ती । तथा सचन्दनाम्भःकणाः चन्दनोदकविन्दुसहिताः ते च ते कोमलाम्मृदुलाश्च तैर्जलार्द्राणां जलोक्षिततालवृन्तानां पवनैर्न निर्ववौ । धुवित्रं तालवृन्तं स्यादुत्क्षेपव्यजनं च तत् । जलेनार्द्रं जलार्द्रा स्यादिति वैजयन्ती । अत्र सन्तप्तस्योष्णोपचारान्निर्वृतिरिति कारणविरुद्धकार्य्योत्पत्तिरूपोविषमालङ्कारः ॥ ६५ ॥

तपेनेति । सदा नित्यं ननु यथाकालं प्रसूनक्लृप्तिं कुसुमसम्पत्तिं । प्रसूनं कुसुमं सममित्यमरः। दधतोधारयन्तः ऋतवोवर्षाः प्रावृट् तपेन ग्रीष्मेण । उष्णउष्मागमस्तपइति स्त्रियां प्रावृट स्त्रियां भूम्नि वर्षाश्च शरत् स्त्रियामिति चामरः । तथा हिमागमोहेमन्तः शरदा तथा शिशिरोवसन्तलक्ष्म्या च इमेत्य मिथुनीभावेन

तपेन वर्षाः शरदा हिमागमो
वसन्तलक्ष्म्या शिशिरः समेत्य च ।
प्रसूनक्लृप्तिं दधतः सदर्त्तवः
पुरेऽस्य वास्तव्यकुटुम्बितां ययुः ॥ ६६ ॥

अमानवं जातमजं कुले मनोः
प्रभाविनं भाविनमन्तमात्मनः ।
मुमोच जानन्नपि जानकीन्न यः
सदाभिमानैकधनाहि मानिनः ॥ ६७ ॥

मिलित्वा अस्य रावणस्य पुरे वसन्तीति वास्तव्याः वस्तारः । वसे स्तव्यत्कर्त्तरि णिच्चेति तव्यत्प्रत्ययः । ते च कुटुम्बिनस्तु तेषां भावं तत्तां प्रतिवासित्वमित्यर्थः । ययुः समेत्य ययुरिति समुदाय समुदायिनोरभेदविवक्षया समानकर्त्तृत्वम् । अत्र पुरे युगपत् सर्व्वर्त्तु सम्बन्धाभिधानादसम्बन्धे सम्बन्धरूपातिशयोक्तिः ॥ ६६ ॥

स चायमासन्नविनाशस्त्वयैव हत इति युग्मेनाह । अमानव मिति । मनोरयं मानवः । तस्येदमित्यणप्रत्यये पर्य्यवसानाज्जाता वेकवचनं अन्यथा मनोर्ज्जातमित्येव स्यात् । अमानवममानुषं न जायत इत्यजन्येष्वपि दृश्यत इति डप्रत्ययः । तथापि मनोः कुले जातं रामस्वरूपेणोत्पन्नमिति विरोधः । तदाभासत्वादल ङ्कार इत्याह । प्रभाविनमिति महानुभावे तस्मिन् कश्चिद्विरोध इति भावः । आभीक्ष्ण्ये णिनिरिति णिनिर्वा मत्वर्थीयः । भवन्तमिति शेषः । आत्मनः स्वस्यान्तं करोतीति अन्तम् । अन्त

स्मरत्यदो दाशरथिर्भवन्भवा
नमुं वनान्ताद्वनितापहारिणम् ।
पयोधिमाबद्धचलज्जलाविलं
विलङ्घ्य लङ्कां निकषा हनिष्यति ॥ ६८ ॥

शब्दात्तत्करोतीति णन्तात्पचाद्यच् । भाविनं भविष्यन्तं । भविष्यति गम्यादयः । जानन्नपि योरावणः जनकस्यापत्यं स्त्री जानकी सीता तां न मुमोच नामुञ्चदित्यन्वयः जानतोऽपि अमोचने कारण माह । मानिनः सदा प्राणात्ययेऽपि अभिमानएवैकं मुख्यं धनं येषां ते प्राणात्ययेऽपि न मानं मुञ्चन्तीत्यर्थः । कारणेन कार्य्यसमर्थन रूपोऽर्थान्तरन्यासः ॥ ६७ ॥

स्मरतीति । भातीति भवान् । भातेर्डवतुः । दशरथस्यापत्यं पुमा न्दाशरथिः । अतइञितीञ्प्रत्ययः । भवन् रामः सन्नित्यर्थः । भवतेर्लटः शत्रादेशः । वनान्ताद्दण्डकारण्यात् वनितापहारिणं सीतापहर्त्तारं अमुं रावणं । आबद्धः प्रक्षिप्ताद्रिभिर्बद्धसेतुः अतएव चलन्ति जलानि यस्य स च अतएव आविलश्च तं आबद्धचलज्जला विलं पयोधिं विलङ्घ्य लङ्कां निकषा लङ्कासमीपे । समयानिकषा शब्दौ सामीप्येत्वव्यये मताविति हलायुधः । अभितः परितः समया निकषाहाप्रतियोगेष्वपीति द्वितीया । हनिष्यति अवधीत् । अभिज्ञावचने लृडिति भूते लृट् । अदोहननं भवान् स्मरतीति काकुः प्रत्यभिजानासि किमित्यर्थः । शेषे प्रथमः ॥ ६८ ॥

अथेति । अथ राघवदेहत्यागानन्तरं सम्प्रति छलनापरः परप्रतारणापरः एष रावणः शैलूषोनटः तस्य भूमिकां रूपा

अथोपपत्तिं छलनापरोऽपरा
मवाप्य शैलूषइवैष भूमिकाम्।
तिरोहितात्मा शिशुपालसंज्ञया
प्रतीयते सम्प्रति सोऽप्यसः परैः॥ ६९ ॥

न्तरमिव। शैलूषोनटभिक्षयोः भूमिका रचनायां स्यान्मूर्त्त्यन्तर परिग्रहइति विश्वः। अपरामुपपत्तिं जन्मान्तरमित्यर्थः। अवाप्य शिशुपालसंज्ञया तिरोहितात्मा तिरोहितस्वरूपः सन् सोऽपि रावणएव सन्नपि परैरितरैः स न भवतीत्यसः तस्मादन्यएव। नञिति नञ्समासः अतएव एतत्तदोः सुलोपइत्यादिना न सुलोपः प्रतीयते ज्ञायतइति प्रतिपूर्वादिणः कर्म्मणि लट्। यथैकएव शैलूषः रूपान्तरमास्थाय तद्वेशभाषादिभिरन्यएव प्रतीयते। तद्वदयमपि मानुषदेहपरिग्रहादन्यइव भाति दौर्जन्यन्तु तदेवेत्यवश्यं संहार्य्यइति भावः॥ ६९ ॥

अथैतद्दौर्ज्जन्यं त्रिभिराविष्करोति। स बालइति। स शिशुपालोबालः सन् वपुषा चतुर्भुजोभुजचतुष्टयवानासीत्। विष्णुरिति ध्वनिः। मुखेन पूर्णेन्दुनिभस्त्रिलोचनोलोचनत्रयवानासीत् त्र्यम्बकइति ध्वनिः बालविशेषणात्सम्प्रति तत्सर्व्वमन्तर्हितमिति भावः। सम्प्रति तु युवा सन् करेण बलिना आक्रान्तमहीभृदधिष्ठितराजकः सन् अन्यचांशुव्याप्तशैलः। बलिहस्तांशवः कराइत्यमरः। उच्चकैस्तेजसा रविरसंशयं संशयोनास्तीत्यर्थः। अर्थाभावेऽव्ययीभावः। वपुषा मुखेन चेति। येनाङ्गविकारइति तृतीया। त्रानित्वदाधिक्यस्यापि विकारत्वात्। तथा च वामनः त्रानि

स बालआसीद्वपुषा चतुर्भुजो
मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ।
युवा कराक्रान्तमहीभृदुच्चकै
रसंशयं सम्प्रति तेजसा रविः ॥ ७० ॥

स्वयं विधाता सुरदैत्यरक्षसा
मनुग्रहावग्रहयोर्यदृच्छया ।
दशाननादीनभिराद्धदेवता
वितीर्णवीर्य्यातिशयान् हसत्यसौ ॥ ७१ ॥

वदाधिक्यमप्यङ्गविकार इति तेजसेति प्रकृत्यादिभ्य उपसङ्ख्यानमिति तृतीया । कराक्रान्तेत्यादिना श्लेषानुप्राणितेयमुत्प्रेचा रविरसंशय मिति तस्य पूर्णेन्दुनिभइत्युपमया संसृष्टिः । हरिहरादितुल्य महिमत्वादतिदुर्द्धर्षस्त्वइति भावः ॥ ७० ॥

स्वयमिति । यदृच्छया स्वेच्छया स्वयं सामर्थ्येन न तु देवता प्रसादबलादिति भावः । सुरदैत्यरक्षसां देवदानवयातुधानानां अनुग्रहावग्रहयोः प्रसादनिग्रहयोर्विधाता कर्त्ताऽसौ शिशुपालः अभिराद्धाभिराराधिताभिर्देवताभिरीश्वरादिभिर्वितीर्णोदत्तो वीर्य्यातिशयः प्रभावातिशयो येषां तान्दशाननादीन् हसति । अनन्य प्रसादलब्धैश्वर्य्ये मयि कथं याचकैस्तुल्यतेति गर्व्वाद्धसतीत्यर्थः ॥ ७१ ॥

बलेति । जिगीषुणा नित्योत्साहवतेत्यर्थः । तेन शिशुपालेन बलावलेपाद्बलगर्व्वादधुनापि पूर्व्ववत्पूर्व्वजन्मनीव जगत्प्रबाध्यते ।

बलावलेपादधुनापि पूर्व्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा।
सतीव योषित् प्रकृतिः सुनिश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥ ७२ ॥

तदेनमुल्लङ्घितशासनं विधे
र्विधेहि कीनाशनिकेतनातिथिम्।
शुभेतराचारविपक्तिमापदो
विपादनीयाहि सतामसाधवः ॥ ७३ ॥

तथाहि सती पतिव्रता योषिदिव सुनिश्चला अतिस्थिरा प्रकृतिः स्वभावोभवान्तरेष्वपि पुंमांसमभ्येति। पतिं या नाभिचरति मनो वाक्कायसंयता। सा भर्त्तुर्लोकमाप्नोति सद्भिः साध्वीति चोच्यते इति मनुः। उपमोपमेयपुरस्कृतोऽर्थान्तरन्यासः ॥ ७२ ॥

तदेनमिति। तत्तस्माद्विधेर्विधातुरपि उल्लङ्घितशासनं स्वयं विधातेत्याद्युक्तरीत्यातिक्रान्तदैवमित्यर्थः। सापेक्षत्वेऽपि गमकत्वात् समासः। एनं शिशुपालं कीनाशनिकेतनातिथिं कीनाशोऽन्तकः तस्य निकेतनं गृहं तत्र अतिथिं प्राघुणिकं विधेहि कुरु यमगृहं प्रेषयेत्यर्थः। कीनाशः कर्षके क्षुद्रे कृतान्तोपांशुघातिनोरिति विश्वः। न चैतत् प्राघुणिकत्वेन सम्मारणं भवादृशामवश्य कर्त्तव्यत्वादित्याह। शुभेतराचारेण दुराचारेण विपक्तिमाः परिपाकेन निर्वृत्ताः कालपरिपाकेण प्राप्ता आपदो येषां ते तथोक्ताः। ड्वितः क्त्रिरिति पचेः क्त्रिप्रत्ययः क्त्रेर्मम्नित्यमिति

हृदयमरिवधोदयादुदूढ
द्रढिम दधातु पुनः पुरन्दरस्य ।
घनपुलकपुलोमजाकुचाग्र
द्रुतपरिरम्भनिपीडनक्षमत्वम् ॥ ७४ ॥

तद्धितोमप्रत्ययः । अथाधवोदुष्टाः सतां भवाद्दृशां जगन्ति यन्तॄणां निपातनीयाः वध्याहि । न च नैर्घृण्यदोषः स्वदोषेणैव तेषां विनाशे निमित्तमात्रत्वादस्माकमित्याशयेन प्रभुभेतराचारे त्यादिविशेषणोक्तिः । सामान्येन विशेषसमर्थनरूपोर्थान्तरन्यासः ॥ ७३ ॥

किञ्चैवं दुष्टनिग्रहे शिष्टानुग्रहः स्यादित्याह । हृदयमिति । अरिवधोदयाद्रिपुनाशलाभात् उदूढद्रढिमनैश्चिन्त्यात् धृतदार्ढ्यं स्वस्थमिति यावत् । पृथ्वादित्वात् दृढशब्दादिमनिच्प्रत्ययः । रऋतोहलादेर्लघोरिति ऋकारस्य रेफादेशः । पुरः शत्रुपुराणि दारयतीति पुरन्दरः इन्द्रः । पूःसर्व्वयोर्दारिसहोरिति खच्प्रत्ययः खचि ह्रस्वइति उपधाह्रस्वः वाचंयमपुरन्दरौ चेति निपातनाद दन्तत्वं मुमागमश्च । तस्य हृदयं पुनर्भूयोऽपि पूर्व्ववदेवेति भावः घनपुलकयोः सान्द्ररोमाञ्चयोः पुलोम्नोजाता पुलोमजा शची तस्याः कुचाग्रयोः द्रुतपरिरम्भः औत्सुक्यात् शीघ्रालिङ्गनं तत्र यत्पीडनं तस्य क्षमत्वं सहत्वं दधातु प्राक् चित्तविक्षेपात्त्यक्तभोगेन शक्रेण सम्प्रति त्वत्प्रसादान्निष्कण्टकं स्वकीयं राज्यं भुज्यतामित्यर्थः अत्र दार्ढ्यपदार्थस्योदूढद्रढिमेति विशेषणगत्या निपीडनक्षमत्वं प्रति हेतुत्वोक्त्या पदार्थहेतुकं काव्यलिङ्गम् । हृदयनिपीडनक्षमत्व

ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभ
स्तस्मिन्नुत्पतिते पुरः सुरमुनाविन्दोः श्रियं बिभ्रति।
शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैद्यम्प्रति
व्योम्नीव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदम्
॥ ७५ ॥

सम्बन्धेऽप्यसम्बन्धोक्त्या सम्बन्धेऽसम्बन्धरूपातिशयोक्तिरित्थर्थालङ्कारो वृत्त्यनुप्रासश्च तैरन्योन्यं संसृज्यते। पुष्पिताग्रा वृत्तम्। अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति लक्षणात् ॥ ७४ ॥

ओमिति। तस्मिन्सुरमुनौ नारदे इति इत्थम्भूतां वाचं व्याहृत्योक्त्वा नभ उत्पतिते खमुद्गते पुरोऽग्रे इन्दोः श्रियं बिभ्रति सति अथ मुनिवाक्यानन्तरमोमित्युक्तवतस्तथास्त्वित्यङ्गीकृतवतः। ओमस्मेऽङ्गीकृतौ रोषे इति विश्वः। चेदीनां जनपदानामयं चैद्यः शिशुपालः वृद्धेत्कोसलाजादाञ्ञ्यङिति ञ्यङ्प्रत्ययः। तम्प्रति क्रुद्धस्य शार्ङ्गिणोवदने व्योम्नीवानिशं सर्व्वदा अव्यभिचारेणेत्यर्थः। शत्रूणां विनाशस्य पिशुनः सूचकः। चन्द्रमभ्युत्थितः केतुः क्षितीशानां विनाशकृदिति शास्त्रादिति भावः। केतुरुत्पातविशेषः। केतुर्द्युतौ पताकायां ग्रहोत्पातारिलक्ष्मस्वित्यमरः। भ्रुकुटिच्छलेन भ्रूभङ्गव्याजेनास्पदं प्रतिष्ठां स्थितिं चकार. आस्पदं प्रतिष्ठायामिति निपातनात् सुडागमः। अनेन वाक्यार्थभूतस्य वीररससहकारिणो रौद्रस्य स्थायी क्रोधः स्वानुभावेन भ्रुकुट्या कारणभूतोऽनुमेय इत्युक्तम्। तथा तदविनाभूतस्याङ्गिनो वीरस्य स्थायी प्रयत्नोऽपमेय

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये कृष्णनारदसम्भाषणं नाम प्रथमः सर्गः ॥ १ ॥

उत्साहोऽप्युत्पन्न एवेत्यनुसन्धेयम् । इन्दोः श्रियं बिभर्ति इत्यत्र मुनेरिन्दुश्रियोऽयोगात्तत्सदृशीमिति सादृश्याक्षेपादसम्भवदस्तु सम्बन्धरूपो निदर्शनालङ्कारः। वदने सोमीवेत्युपमा। भ्रुकुटिच्छलेन केतुरिति छलादिशब्देनासत्यत्वप्रतिपादनरूपोऽपह्नवः तच्च शत्रुविनाशसूचके त्वपेचितेन्दुसान्निध्यव्योमावस्थानसम्पादकत्वे निदर्शनोपमयोरपह्नवोपकारकत्वादङ्गाङ्गिभावेन सङ्करः । चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु श्रीशब्दप्रयोगः यथाह भगवान् भाष्यकारः । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति अध्येतारश्च प्रवक्तारो भवन्तीति। शार्दूलविक्रीडितं वृत्तम्। सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति लक्षणात् । सर्गान्तत्वाद्वृत्तभेदः। यथाह दण्डी। सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः सर्व्वत्र भिन्नसर्गान्तैरुपेतं लोकरञ्जकमिति ॥७५॥

अथ कविः कविकाव्यवर्णनीयाख्यानपूर्व्वकसर्गसमाप्तिं कथयति। इतीति । इतिशब्दः समाप्तौ माघकृताविति कविनामकथनं महाकाव्ये इति महच्छब्देन लक्षणसम्पत्तिः सूचिता शिशुपालवधइति काव्यनामकथनं प्रथमः सर्गइति समाप्तइति शेषः । एवमुत्तरत्रापि द्रष्टव्यम् । इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते शिशुपालवधकाव्यव्याख्याने सर्व्वङ्कषाख्ये प्रथमः सर्गः ॥ १ ॥

यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम्।
अभिचैद्यं प्रतिष्ठासुरासीत्कार्य्यद्वयाकुलः ॥ १ ॥
सार्द्धमुद्धवसीरिभ्यामथासावासदत्सदः।
गुरुकाव्यानुगां बिभ्रच्चान्द्रीमभिनभःश्रियम् ॥२ ॥

अस्मिन्सर्गे मन्त्रवर्णनाय वीजं वपति। यियक्षमाणेनेति। अथेन्द्रसन्देशश्रवणानन्तरं यियक्षमाणेन यष्टुमिच्छता। यजतेः सन्नन्ताल्लटः शानच्। पार्थेन पृथापुत्रेण युधिष्ठिरेण। तस्येदमित्यण् अन्यथा स्त्रीभ्योढक् स्यात्। आहूतः आकारितः। ह्वयतेः कर्म्मणि क्ते सम्प्रसारणदीर्घौ। तथा अभिचैद्यं शिशुपालं प्रति। लक्षणेनाभिप्रती आभिमुख्य इत्यव्ययीभावः अभिरभागे इति कर्म्मप्रवचनीयत्वे तद्योगे द्वितीया वा। प्रतिष्ठासुः प्रस्थातुमिच्छुः। तिष्ठतेः सन्नन्तादुप्रत्ययः। मुरं द्विषन्मुरारिः। द्विषोऽमित्रे इति शतृप्रत्यये द्विषः शतुर्व्वेति वैकल्पिकः षष्ठीप्रतिषेधः। कार्य्यद्वयेन सुरकार्य्यसुहृत्कार्य्यरूपेणाकुलो विप्रतिषेधादावश्यकत्वाच्च द्वयोः सन्दिहानआसीत् अतोमन्त्रस्याय मवसरइति भावः ॥ १ ॥

एवं मन्त्रबीजसन्देहमुपन्यस्य मन्त्रोचितं देशमाह। सार्द्धमिति। अथ सन्देहानन्तरं असौ हरिः अभिनभः। पूर्व्ववदव्ययीभावः कर्म्मप्रवचनीयत्वे वा द्वितीया। गुरुकाव्यौ बृहस्पतिशुक्रौ बनगावनुयायिनौ यस्यां तां। गीष्पतिर्धिषणोगुरुरिति शुक्रोदैत्यगुरुः काव्यइति चामरः। चन्द्रस्येमां चान्द्रीं श्रियं बिभ्रत्। अथ श्रोतृणां श्रियमिति निदर्शनाभेदः। उद्धवसीरिभ्यां सार्द्धं

जाज्वल्यमाना जगतः शान्तये समुपेयुषी।
व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी॥ ३ ॥
रत्नस्तम्भेषु सङ्क्रान्तप्रतिमास्ते चकाशिरे।
एकाकिनोऽपि परितः पौरुषेयवृता इव ॥ ४ ॥

उद्धवरामाभ्यां सह सदः सभामासदत् अगमत् राजसदसः प्रासादत्वादिति भावः। सदेर्लुङि पुषादित्वात् च्लेरङादेशः। अत्र मनुः। गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः। अरण्ये निःशलाके वा मन्त्रयेदविभाविनाविति ॥ २ ॥

जाज्वल्यमानेति। जगतः शान्तयेऽनुपद्रवाय समुपेयुषी मिलिता जाज्वल्यमाना भृशं ज्वलन्ती। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ततो लटः शानजादेशे टाप। असौ नराः पुरुषा एव शिखिनोऽग्नयस्तेषां त्रयी। द्वित्रिभ्यामित्यादिना तयस्यायजादेशे कृते टिड्ढाणञित्यादिना ङीप्। सभा आस्थानी सैव वेदिः। वेदिः परिष्कृता भूमिरित्यमरः। तस्यां व्यद्योतिष्ट दीप्यते स्म। द्युद्भ्यो लुङीत्यभावे तङ्। रूपकालङ्कारः॥ ३ ॥

रत्नेति। रत्नानां स्तम्भाः। इति षष्ठीसमासस्य विशेषे पर्य्यवसाना द्विकारार्थत्वं। तेषु सङ्क्रान्तप्रतिमाः सङ्क्रान्तप्रतिबिम्बाः। प्रतिमानं प्रतिबिम्बं प्रतिमेत्यमरः। ते त्रयः एकाकिनोऽसहाया अपि। एकाद्याकिनिच्चासहाय इत्याकिनिच्प्रत्ययः। परितोऽभितः सर्व्वतः पर्य्यभिभ्यां चेति तसिल्प्रत्ययः सच सर्व्वोभयार्थाभ्यामिष्यते। पौरुषेयेण प्रतिबिम्बभूयस्त्वात्। पुरुषसमूहेनावृता इवेत्युत्प्रेक्षा। चकाशिरे। सर्वपुरुषाभ्यां णढञौ। पुरुषाद्वधविकारसमूहतेन

अध्यासामासुरुत्तुङ्गहेमपीठानि यान्यमी ।
तैरूहे केशरिक्रान्तत्रिकूटशिखरोपमा ॥ ५ ॥
गुरुद्वयाय गुरुणोरुभयोरथ कार्य्ययोः ।
हरिर्विप्रतिषेधन्तमाचचक्षे विचक्षणः ॥ ६ ॥

छतेष्विति वक्तव्यमिति समूहे ढञ्प्रत्ययः । एतेन विजनत्वमुक्तं । यद्यपि निस्तम्भेनिर्गवाक्षे च निर्भित्त्यन्तरसंश्रये । प्रासादाग्रे स्तरण्ये वा मन्त्रयेद्भावभाविनाविति कामन्दकीये मन्त्रभूमेः स्तम्भप्राचुर्य्य निषेधोगम्यते । तथापि तस्यापि विजनोपलक्षणत्वाददोषइति भावः ॥ ४ ॥

अध्यासामासुरिति । अमी त्रयोयान्युत्तुङ्गहेमपीठानि आसनानि अध्यासामासुरधितष्ठुः येषूपविष्टाइत्यर्थः । अधिशीङ् स्थासां कर्म्मेति कर्म्मत्वं आसउपवेशने लिट् दयायासश्चेत्याम्प्रत्ययः कृञ्चानुप्रयुज्यते लिटीति अस्तेरनुप्रयोगः आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येति कृञएवेति नियमादस्तेर्नात्मनेपदं । तैः पीठैः केशरिभिः सिंहैः क्रान्तानां त्रिकूटस्य त्रिकूटाद्रेः शिखराणामुपमासादृश्यं ऊहे ऊढा वहेः कर्म्मणि लिट् सम्प्रसारणं । त्रीणि कूटान्यस्येत्यन्वर्थ संज्ञा । कूटोऽस्त्री शिखरं शृङ्गमित्यमरः । उपमालङ्कारः ॥५॥

गुर्विति । अथोपवेशनानन्तरं विचष्टे इति विचक्षणः वक्ता । कर्त्तरि ल्युडिति न्यासकारः । अस्यनयोस्तु प्रतिषेधोवक्तव्यइति चक्षिङः ख्याञादेशाभावः । हरिर्गुर्वोः चक्कवरामयोः पितृव्यज्येष्ठभ्रात्रोर्द्वयाय द्वाभ्यामित्यर्थः । गुरुणोर्महतोरुभयोः कार्य्ययोः पूर्व्वोक्तयोः तं विप्रतिषेधं विरोधमाचचक्षे आख्यातवान् । तुल्यबलविरोधोविप्रतिषेधः ॥ ६ ॥

द्योतितान्तःसभैः कुन्दकुड्मलाग्रदतः स्मितैः ।
स्नपितेवाभवत्तस्य शुद्धवर्णा सरस्वती ॥ ७ ॥

द्योतितेति । कुन्दं माघभवः पुष्पविशेषः । माघ्यं कुन्द मित्यमरः । कुन्दकुड्मलाग्राणीव दन्ताग्रं यस्य तस्य कुन्दकुड्मलाग्रदतः । अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्चेत्यग्रान्तपूर्व्वपदबहुव्रीहेः समासान्तो वैभाषिको दतादेशः । तस्य हरेः सरस्वती अन्तःप्रधाना सभा अन्तःसभा सभाभ्यन्तरमित्यर्थः । सा द्योतिता प्रकाशिता यैस्तैः स्मितैः स्नपितेव क्षालितेव । स्नातेर्ण्यन्तात् क्तः अर्त्ति ह्रीत्यादिना पुगागमः मितां ह्रस्वः । शुद्धवर्णा स्फुटाक्षरत्वात् स्वच्छकान्तिरभवत् । अत्र स्वाभाविकवर्णशुद्धेः स्नानहेतुकत्व मुत्प्रेक्ष्यते । स्मितपूर्व्वाभिभाषी हरिरिति भावः ॥ ७ ॥

कार्य्यविप्रतिषेधं निवेद्य तत्र स्वमतमावेदयिष्यन् पण्डित मानित्वं तावत्परिहरति । भवद्भिरामिति । भवद्भिरां युष्म द्वाचां अवसरप्रदानाय प्रसञ्जनायेत्यर्थः नोऽस्माकं वचांसि सिद्धान्तोन्नयनार्थमुच्यते न तु सिद्धान्तत्वेनेत्यर्थः । तथाहि । पूर्व्वं रज्यतेऽस्मिन्निति पूर्व्वरङ्गः नाट्यशाला तत्स्थं कर्म्मापि पूर्व्व रङ्ग इति दशरूपके । अतः पूर्व्वरङ्गो नाम रङ्गप्रधानाख्यो रङ्ग विघ्नशान्तिकारी नान्दीपाठगीतवादित्राद्यनेकाङ्गविशेषो नाट्यादौ कर्त्तव्यः कर्म्मविशेषः । तदुक्तं वसन्तराजीये । यन्नाट्य वस्तुनः पूर्व्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्व्वन्ति पर्व्वरङ्गः प्रकीर्त्तितइति । स पूर्व्वरङ्गो नाटके भवं नाटकीयं तत्र वर्ण्य मित्यर्थः । वृद्धाच्छः तस्यायनेनीयादेशः । तस्य वस्तुनः प्रसिद्धस्य

भवद्गिरामवसरप्रदानाय वचांसि नः ।
पूर्व्वरङ्गप्रसङ्गाय नाटकीयस्य वस्तुनः ॥ ८ ॥
करदीकृतभूपालोभ्रातृभिर्जित्वरैर्दिशाम् ।
विनाप्यस्मदलम्भूष्णुरिज्यायै तपसः सुतः ॥ ९ ॥

प्रसङ्गाय प्रसञ्जनाय प्रवर्त्तनायेति यावत्। अत्र प्रथमवादेन दोषायेति भावः । पूर्व्वरङ्गः प्रस्तावनेति रङ्गराजः तच्चिन्त्यम् पूर्व्वरङ्गं विधायादौ सूत्रधारे विनिर्गते। प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः। प्रथमं पूर्व्वरङ्गस्य ततः प्रस्तावनेति च । आरम्भे सर्व्वनाट्यानामेतत्सामान्यमिष्यतइति दशरूपकाद्युक्तभेदविरोधादिति । अत्र हरिवाक्यपूर्व्वरङ्गयोः प्रसञ्जकत्वस्वरूपसामान्यस्य वाक्यद्वये शब्दान्तरेण पृथङ्निर्द्देशात्प्रतिवस्तूपमालङ्कारः तल्लक्षणं तूक्तम् ॥ ८ ॥

सम्प्रति स्वमतमाह। करदीकृतेति । दिशां जित्वरैः जयनशीलैः। इण्नशजिसर्त्तिभ्यः क्वरप् कृद्योगात्कर्म्मणि षष्ठी । भ्रातृभिर्भीमादिभिर्हेतुभिः करदाः षष्ठभागप्रदाः । भागधेयोबलिः कर इत्यमरः। ततः च्विः ऊर्य्यादिच्विडाचश्चेति गतिसंज्ञायां कुगतिप्रादय इति नित्यसमासः। अकरदाः करदाः सम्पद्यमानाः कृताः करदीकृताभूपालाः यस्य सः वशीकृतराजमण्डलः तपसः सुतो धर्म्मपुत्त्रः । तपश्चान्द्रायणादौ स्याद्धर्म्मे लोकान्तरेऽपि चेति विश्वः। अस्मद्विना अस्माभिर्विनापीत्यर्थः। पृथग्विनानेत्यादिना तृतीयाविकल्पात्पञ्चमी । इज्यायै यागाय । यजेर्भावे क्यप् वचिस्वपीत्यादिना सम्प्रसारणं नमः स्वस्तीत्यादिना चतुर्थी। अलं समर्थोभूष्णुर्भवनशीलः। भूष्णुर्भविष्णुर्भवितेत्यमरः। ग्लाजिस्थश्च

ततः सपत्नापनयस्मरणानुशयस्फुरा ।
ओष्ठेन रामोरामौष्ठबिम्बचुम्बनचुञ्चुना ॥१४ ॥
विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृताम् ।
प्रापयन्पवनव्याधेर्गिरमुत्तरपक्षताम् ॥ १५ ॥

विरराम तूष्णीमास । व्याङ्परिभ्योरमइति परस्मैपदम् । तथाहि । महीयांसः उत्तमाः प्रकृत्या मितभाषिणः । हृथालाप निषेधादिति भावः । पूर्व्ववदलङ्कारः ॥ १३ ॥

अथाष्टभिः कुलकेन रामं वर्णयंस्तद्वाक्यमवतारयति । तत इति । ततोरामोजगादेत्युत्तरेणान्वयः । सपत्नोरिपुः । रिपौवैरि सपत्नारीत्यमरः । तस्यापनयोऽपकारः तस्य स्मरणेन योऽनुशयः पश्चात्तापः । भवेदनुशयोद्वेषे पश्चात्तापानुबन्धयोरिति विश्वः । तेन स्फुरतीति अनुशयस्फुः तेन स्फुरा ओष्ठोबिम्बमिवेत्युपमित समासः । रामायाः ओष्ठबिम्बस्य चुम्बनेन वित्तोरामौष्ठबिम्बचुम्बन चुञ्चुस्तेन वित्तस्चुञ्चप् चणपाविति चुञ्चप्प्रत्ययः ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम् । तेनौष्ठेनोपलक्षितः समरसुरतयोः समरसइति भावः । उपमानुप्रासयोः संसृष्टिः ॥ १४ ॥

विवक्षितामिति । विवक्षितां हृद्गताभिमानादये वक्तुमिष्टां । वचेर्ब्रूञोवा सन्नन्तात्कर्म्मणि क्तः । तत्क्षणे विवक्षाक्षणे एव तूर्णं विलम्बोक्तिः प्रतिसंहृतां रामानुरोधादनुरुद्धां अर्थविदः कार्य्यज्ञस्य अतएव पवनव्याधेरुद्धवस्य गिरमुत्तरपक्षतां सिद्धान्तपक्षतां प्रापयन् स्वयमप्यत्पक्षावलम्बित्वादिति भावः । अनेन रामस्य व्ययता उक्ता ॥ १५ ॥

घूर्णयन्मदिरास्वादमदपाटलितद्युती ।
रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ ॥ १६ ॥
आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीम् ।
म्लापयन्नभिमानोष्णैर्वनमालां मुखानिलैः ॥ १७ ॥
दधत्सन्ध्यारुणव्योमस्फुरत्तारानुकारिणीः ।
द्विषद्द्वेषोपरक्ताङ्गसङ्गिनीः स्वेदविप्रुषः ॥ १८ ॥

घूर्णयन्निति । पुनः मदिरास्वादेन मद्यपानेन यो मदस्तेन पाटलिता ईषद्रक्तीकृता द्युतिर्ययोस्ते रेवत्या देव्याः वदने यदुच्छिष्टं मद्यलेपताम्बूलादि अतिचुम्बनसङ्क्रान्तमिति भावः । तेन परिपूते शुद्धे पुटे ययोस्ते दृशौ घूर्णयन् भ्रामयन्निति मद्यविकारोक्तिः । उच्छिष्टपरिपूतेत्यत्र । रतिकाले मुखं स्त्रीणां शुद्धमाखेटके शुनामिति स्मरणात् । उच्छिष्टस्य पावित्र्यजनकत्व विरोधस्याभासत्वाद्विरोधाभासोऽलङ्कारः । आभासत्वे विरोधस्य विरोधाभास उच्यत इति लक्षणात् ॥ १६ ॥

आश्लेषेति । पुनराश्लेषलोलुपाया आलिङ्गनलुब्धाया वध्वाः स्तनयोः कार्कश्यस्य काठिन्यस्य साक्षिणीं उपद्रष्टीं नित्यं पीड्यमानामिति भावः । साक्षाद्द्रष्टरि संज्ञायामिति साक्षाच्छब्दादिनि प्रत्ययः । वनमालामभिमानोष्णैरहङ्कारतप्तैर्मुखानिलैः निश्वासमारुतैर्म्लापयन् म्लापयन् । म्लायतेर्ण्यन्तात् लटः शत्रादेशः आदेच इत्यात्वे पुगागमः । अम्लाने म्लानसम्बन्धादतिशयोक्तिः ॥ १७ ॥

· दधदिति । पुनः सन्ध्यायामरुणे व्योम्नि स्फुरन्तीस्तारा अनुकुर्वन्तीति तथोक्ताः कुतः द्विषतः शत्रोर्द्वेषेण क्रोधेनोपरक्ते अङ्गे

प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा ।
कृष्णोत्तरासङ्गरुचं विदधच्चौतपल्लवीम् ॥ १९ ॥
ककुद्मिकन्यावक्त्रान्तर्वासलब्धाधिवासया ।
मुखामोदं मदिरया कृतानुव्याधमुद्वमन् ॥ २० ॥

वपुषि सक्तिनीः सक्ताः स्वेदविप्रुषः स्वेदविन्दून् । पृषन्ति विन्दु पृषताः पुमांसोविप्रुषः स्त्रियइत्यमरः । दधद्धानः । नाभ्यस्ता च्छतुरिति नुमभावः । उपमालङ्कारः ॥ १८ ॥

प्रोल्लसदिति । पुनः प्रकर्षेणोल्लसतां कुण्डलयोः प्रोतानां स्यूतानां पद्मरागदलानां माणिक्यशकलानां त्विषा कान्त्या । प्रोतेति प्रपूर्व्वाद्देञः कर्म्मणि क्तः यजादित्वात्सम्प्रसारणं । कृष्णोत्तरासङ्गोनीलोत्तरीयम् । द्वौ प्रावारोत्तरासङ्गौ समौ वृहतिका तथा संव्यानमुत्तरीयञ्चेत्यमरः । तस्य रुचं चूतपल्लवस्येमां चौतपल्लवीं विदधत् कृष्णलोहितमिश्रवर्णचूतपल्लववद्धूम्रां कुर्व्वन्नित्यर्थः । धूम्र धूमलौ कृष्णलोहितइत्यमरवचनात् । अत्रान्यरुचोऽन्यदीयत्वा योगात्सादृश्यापेक्षोनिदर्शनालङ्कारः ॥ १९ ॥

ककुद्मीति । पुनः ककुद्मिकन्यायाः रेवत्यावक्त्रस्यान्तः अभ्यन्तरे वासेन स्थित्या लब्धोऽधिवासोवासना यया तया तन्मुख सौरभवासितयेत्यर्थः । संस्कारोगन्धमाल्याद्यैरधिवासनमुच्यते । मदिरया कृतानुव्याधं कृतसंसर्ग्गम्प्रियागण्डूषगन्धिनमित्यर्थः । व्यधजपोरनुपसर्ग्गइत्यनुपसृष्टादप्प्रत्ययविधानादुपसृष्टाद्व्यधेर्घञ् प्रत्ययः । मुखामोदं स्वमुखगन्धविशेषं । आमोदः सोऽति निर्हारीत्यमरः । उद्वमन् उद्गिरन् । अत्र मदिरायाममख

जगाद वदनच्छद्मपद्मपर्य्यन्तपातिनः ।
नयन् मधुलिहः श्वैत्यमुदग्रदशनांशुभिः ॥ २१ ॥
॥ कुलकम् ॥

यद्वासुदेवेनादीनमनादीनवमीरितम् ।
वचसस्तस्य सपदि क्रिया केवलमुत्तरम् ॥ २२ ॥

गन्धयोः स्वगन्धतिरोधानेन रामामुखतद्गण्डूषमद्यगन्धस्वीकारा त्तद्गुणयोस्तयोरन्तरस्यात्मविशेषकत्वेन पूर्व्वसापेक्षत्वादङ्गाङ्गिभावेन सङ्करः । तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिरिति लक्षणात् ॥ २० ॥

जगादेति । वदनमेव छद्म कपटं यस्य तत् पद्मं वदनमेव पद्ममित्यर्थः । छद्मशब्देनासत्यत्वप्रतिपादनरूपोऽपह्नवः । तस्य पर्य्यन्तपातिनः प्रान्तसञ्चारिणः । मधु लिहन्तीति मधुलिहस्तान् मधुपान् क्विप् । उदग्रैः उन्नतैः दशनांशुभिः श्वैत्यं धावल्यं नयन् एवं जगाद । तद्गुणालङ्कारः तस्य मधुपसन्निधापकवदना पह्नवसापेक्षत्वात्तेन सङ्करः ॥ २१ ॥

रामोऽजगादेत्युक्तं किं तदित्याकाङ्क्षायामाह । यदिति । वासुदेवेन न दीनमित्यदीनं अकातरं नादीनवोऽस्येत्यनादीनवं निर्द्दोषं । दोषआदीनवोमतइत्यमरः । यद्वचः ईरितं उक्तिष्ठमानस्तु परइत्यादिपद्यमाश्रित्य यदुक्तमित्यर्थः । तस्य वचसः सपदि क्रिया केवलं सद्योऽनुष्ठानमेवोत्तरं विद्वान्नवक्तोत्तमादिति भावः ॥ २२ ॥

नैतल्लघ्वपि भूयस्या वचो वाचातिशय्यते ।
इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् ॥ २३ ॥
संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः ।
सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे ॥ २४ ॥

अथ तदेव प्रतिपादयिष्यन् अनन्यातिशयतयोपस्करोति । नैतदिति । लघु संक्षिप्तमप्येतद्वचो भूयस्या बहुतरया विस्तृतयापीत्यर्थः । द्विवचनविभज्येत्यादिना ईयसुनि बहोर्लोपो भू च बहोरितीकारलोपो बहोश्च भूरादेशः । वाचा नातिशय्यते नातिरिच्यते गुर्वर्थत्वादिति भावः । शीङः कर्म्मणि लटि यक् अयङ्यि क्ङितीति अयङादेशः । तथाहि इन्धनौघान् दहतीति इन्धनौघधक् काष्ठराशिदाहकः भूयानपीत्यर्थः । क्विपि घत्वधत्वे भष्भावः अग्निस्त्विषा प्रभया पूषणं सूर्य्यमल्पीयांसमपीति भावः । न अत्येति नातिक्रामति तेजसः प्रभावत्त्वमिव वचसोऽर्थवत्त्वमलङ्घ्यत्वहेतुरित्यर्थः । अत्र समानधर्म्मबिम्बविम्बिततया दृष्टान्तालङ्कारः ॥ २३ ॥

यदि हरिवचो नातिशय्यते अलं तर्हि तवापि वागारम्भैरत आह । संक्षिप्तस्येति । अतो हरिवचसोऽनतिशयनीयत्वादेव सुविस्तरतराः प्रपञ्चतराः । प्रथने वावशब्द इति घञः प्रतिषेधे ऋदोरवित्यप् । मे वाचः संक्षिप्तस्याऽल्पाक्षरस्याप्यर्थेन गरीयसः सूत्रकल्पस्येत्यर्थः । अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखं । अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुरिति लक्षणात् । अस्यैव नान्यस्य भाष्यभूताः भाष्यैः समाः । नित्यसमासः । क्ष्मादौ जन्तौ भूतं क्लीवं समेऽतीतेऽपिरे त्रिष्विति वैजयन्ती । व्याख्यानरूपा भवन्त्वित्यर्थः ।

विरोधिवचसो मूकान्वागीशानपि कुर्वते ।
जडानप्यनुलोमार्थान् प्रवाचः कृतिनां गिरः ॥२५॥

सूत्रव्याख्यानविशेषो भाष्यं । सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति । यथा तु तदेव विशेषप्रकाशनाय व्याख्यायते न त्वतिशयाय प्रत्याख्यायते इत्यदोषइत्यर्थः । उपमालङ्कारः ॥ २४ ॥

इत्थं यानं विद्रावयित्वा तचोद्धवप्रतिरोधं हृदि निधाय त्रिभिः प्रत्याचष्टे । विरोधीति । कृतिनां कुशलानां गिरः कर्त्र्यः विरोधिवचसः प्रतिकूलवादिनो वागीशान्वाक्पतीनपि । वागीशो वाक्पतिः समावित्यमरः । मूकान्निर्वाचः कुर्वते जडयन्तीत्यर्थः अनुलोमोऽनुकूलोऽर्थोऽभिधेयं येषान्तेऽनुलोमार्थाः अनुकूलवादिनः तान् जडानज्ञानपि प्रवाचः प्रगल्भवाचः कुर्वते अतोऽस्मद्गिरः प्रवाच्यादिति भावः । अत्र वागीशानां मूकीकरणाज्जडानां प्रवाक्करणाच्च शक्यवस्तुकरणरूपो विशेषोऽलङ्कारः असम्बन्धे सम्बन्धातिशयोक्तिप्रतिभोत्थापितइति सङ्करः ॥ २५ ॥

नन्वात्मनीनेन स्वामिना वृद्धैः फलमनायद्दति न्यायेन शास्त्रप्रवचनं प्रतिकूलमपि ग्राह्यमेवेत्याशङ्क्याह । पठितेति । दुष्टा मेधा येषां ते दुर्मेधसः मन्दबुद्धयोऽपि । नित्यमसिच् प्रजामेधयोरिति समासान्तोऽसिच्प्रत्ययः । ग्रन्थानौशनसादीनधीत्य पठित्वा गुणाः सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः षट् । शक्तयः प्रभुत्वमन्त्रोत्साहाख्यास्तिस्रः । सिद्धयः पूर्वोक्तशक्तित्रयसाध्याः शुद्धार्थलाभात्मिकाः ताश्च तिस्रः प्रभुसिद्धिर्मन्त्रसिद्धिरुत्साहसिद्धि

षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः ।
ग्रन्थानधीत्य व्याकर्त्तुमिति दुर्म्मेधसोऽप्यलम् ॥२६॥
अनिर्लोडितकार्य्यस्य वाग्जालं वाग्मिनो वृथा ।
निमित्तादपराद्धेषोर्द्धानुष्कस्येव वल्गितम् ॥२७॥

स्रेति । उदयाः वृद्धिक्षयावस्थानानि क्षत्रियन्यायेनोदयाउच्यन्ते । तत्र वृद्धिक्षयौ स्वशक्तिसिद्ध्योः पूर्व्वावस्थानादुपचयापचयौ स्थानं ते च त्रयइति व्याकर्त्तुं व्याख्यातुमलं समर्थाः । पर्य्याप्तिवचनेष्वलमर्थेष्विति तुमुन् पञ्चाङ्गनिर्णयशक्तिविकलानां सन्ध्यादिरूपसङ्ख्यामात्रपाठकानां अशास्त्रज्ञत्वादुद्भवादयोऽन वाग्मिवचनादित्यभिसन्धिः । अत्रामरः । सन्धिर्ना विग्रहोयानमासनं द्वैधमाश्रयः । षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः । क्षयः स्थानं च वृद्धिश्च त्रिवर्गोनीतिवेदिनामिति । तत्रारिविजिगीष्वोर्व्यवस्थाकरणमैक्यं सन्धिः विरोधोविग्रहः विजिगीषोररिम्प्रति यात्रा यानं तयोर्मिथः प्रतिषद्धशक्त्योः कालप्रतीक्षया तूष्णीमवस्थानमासनं । दुर्व्बलप्रबलयोर्वाचिकमात्मसमर्प्पणं द्वैधीभावः। अरिणा पीड्यमानस्य बलवदाश्रयणं संश्रयः कोषदण्डोत्थं तेजः प्रभावः कर्त्तव्यार्थेषु स्थेयान् प्रयत्नउत्साहः षड्गुणचिन्तनं मन्त्रः गतमन्यदिति सङ्क्षेपः ॥ २६ ॥

ननु शास्त्रोक्तार्थव्याख्यातैव शास्त्रज्ञः सएव वाग्मिवचनस्येत्याशङ्क्याह । अनिर्लोडितेति । अनिर्लोडितं नालोकितं कार्य्यं येन तस्य कार्य्याकार्य्यमजानतइत्यर्थः । वाचोऽस्य सन्तीति वाग्मी वावदूकः । वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरीत्यमरः । वाचोग्मिनिरिति ग्मिनिप्रत्ययः । तस्य वाग्जालं वागाडम्बरो

सर्व्वकार्य्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्
॥ २८ ॥

निमित्तात् लक्ष्यात्। वेध्यं लक्ष्यं निमित्तं च शरव्यं च समं विदुरिति वैजयन्ती। अपराद्धेषोः स्खलितबाणस्य धनुः प्रहरणमस्येति धानुष्कोधन्वी। प्रहरणमिति ठक् इसुसुक्तान्तात्कः। अपराद्धपृषत्कोऽसौ लक्ष्याच्च्युतसायकः। धन्वी धनुष्मान् धानुष्कइत्यमरः। तस्य वल्गितमिव वृथा निष्फलं। कार्य्यज्ञस्य वचोग्राह्यं नतु वाचालस्येति भावः॥ २७॥

षाड्गुण्यादिपाठमात्रं न मन्त्रइति सिद्धं सम्प्रति स्वयं मन्त्रस्वरूपमाह। सर्व्वेति। कार्य्याणि सन्ध्यादीनि शरीराणीव इत्युपमितसमासः। सौगतानामिवेति लिङ्गात्तेषु सर्व्वकार्य्यशरीरेषु सर्व्वेषु शरीरेष्विव सर्व्वकार्य्येष्वित्यर्थः अङ्गानि स्कन्धाइवेत्युपमितसमासः। तेषां पञ्चकं मुक्त्वा स्कन्धपञ्चकमिवाङ्गपञ्चकं हित्वेत्यर्थः। पञ्च परिमाणमस्येति पञ्चकं। सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विति कप्रत्ययः। सुगतोभक्तिर्भजनो येषां सौगताः बौद्धाः। भक्तिरित्यण्प्रत्ययः। तेषामन्यआत्मेव महीभृतामन्योमन्त्रोनास्ति। कर्म्मणामारम्भोपायः पुरुषद्रव्यसम्पत् देशकालविभागः विपत्तिप्रतीकारः कार्य्यसिद्धिश्चेति पञ्चाङ्गानि। यथाह कामन्दकः। सहायाः साधनोपायाविभागोदेशकालयोः। विपत्तेश्च प्रतीकारः सिद्धिः पञ्चाङ्गमिष्यतइति। रूपवेदनाविज्ञानसंज्ञासंस्काराः पञ्च स्कन्धाः। तत्र विषयप्रपञ्चोरूपस्कन्धः

मन्त्रो योध इवाधीरः सर्व्वाङ्गैः संवृतैरपि ।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥ २९ ॥

तज्ज्ञानप्रपञ्चो वेदनास्कन्धः । आलयविज्ञानसन्तानो विज्ञानस्कन्धः । नामप्रपञ्चः संज्ञास्कन्धः । वासनाप्रपञ्चः संस्कारस्कन्धः । एवं पञ्चधा परिवर्त्तमानो ज्ञानसन्तान एवात्मा इति बौद्धाः । एवं यथा बौद्धानां सर्व्वेषु शरीरेषु स्कन्धपञ्चकातिरिक्त आत्मा नास्ति तथा राज्ञामङ्गपञ्चकातिरिक्तो मन्त्रो नास्तीत्युपमालङ्कारः तथास्माकं समयमेवेत्ययमेव याचाकाल इति भावः ॥ २८ ॥

अथ मन्त्रितार्थक्रियाविलम्बे दोषमाह । मन्त्र इति । संवृतैर्गुप्तैः सर्व्वाङ्गैः पूर्व्वोक्तैरुपायादिभिरुरःस्थलादिभिश्च उपलक्षितोऽपि सर्व्वाङ्गसंवृतोऽपीत्यर्थः मन्त्रो विचारः अधीरो भीरुः युध्यत इति योधो भट इव । पचाद्यच् । परेभ्योऽन्येभ्योऽरिभ्यश्च । परं दूरान्यमुख्येषु परोऽरिपरमात्मनोरिति वैजयन्ती । भेदो विदारणं इतोयगामित्वं च तस्य शङ्कया चिरं स्थातुं विलम्बितुमित्यर्थः न सहते न क्षमः । शकधृषेत्यादिना तुमुन्प्रत्ययः । अतो न विलम्बितव्यमन्यथा मन्त्रभेदे कार्य्यहानिः स्यादिति भावः ॥ २९ ॥

किञ्च नीतिसर्व्वस्वपर्य्यालोचनयापि न विलम्बः कार्य्य इत्यभिप्रेत्याह आत्मोदय इति । आत्मन उदयो वृद्धिः परस्य शत्रोर्ज्यानिर्हानिः । वीज्याज्वरिभ्यो निरित्यौणादिको निःप्रत्ययः । इति इयं इदं परिमाणमस्या इति इयती एतावती ।

आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती ।
तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते ॥ ३० ॥
तृप्तियोगः परेणापि महिम्ना न महात्मनाम् ।
पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः ॥ ३१ ॥

किमिदं भवां वोयदूति वतुपोवस्य घश्च वगितस्येति कोप् । नीतिः नीति शब्दः एतद्द्वयातिरिक्तोन कश्चिन्नीतिपदार्थोऽस्तीत्यर्थः । यदन्यत् षाड्गुण्यादिवर्णनं तत्सर्व्वमस्यैव प्रपञ्चइत्याह । तदिति । तद्द्वयमूरीकृत्याङ्गीकृत्य ऊरीकृतमुररीकृतमङ्गीकृतमित्यमरः । ऊर्य्यादिच्विडाचश्चेति गतिसंज्ञायां कुगतिप्रादयद्दूति समासे ल्यप् । कृतिभिः कुशलैः वाचस्पत्यं वाग्मित्वं । कस्कादित्वादलुक् षष्ठ्याः पतिपुत्रेत्यादिना सत्वमिति स्वामी तस्य तस्य छन्दो विषयत्वात् ब्राह्मणादित्वात भावे ष्यञ्प्रत्ययः । प्रतायते विस्तार्यते कर्म्मणि लट् तनोतेर्यकीत्यात्वं । तस्मादात्मोदयार्थिभिः शत्रुः उच्छेत्तव्यः तत्रान्तरीयत्वात्तस्येति भावः ॥ ३० ॥

ननु स्वाभ्युदयस्य किं परोच्छित्त्येत्यत्राह । तृप्तियोगइति । महीयसां महात्मनां परेणापि प्रभूतेनापि महिम्ना ऐश्वर्येण तृप्तियोगः सन्तोषलाभोन अत एव भावे पूर्णः सन् चन्द्रोदयाकाङ्क्षी वृद्ध्यर्थमिति भावः । महार्णवोऽत्र दृष्टान्तः दृष्टः अन्तोनिश्चयोऽस्मिन् दृष्टान्तोनिदर्शनमुपमानमिति यावत् राज्ञा वृद्धावलम्बुद्धिर्न कार्य्या । असन्तुष्टादिजानष्टाः सन्तुष्टाश्च महीभुजः । सलज्जा गणिका नष्टा निर्लज्जा च कुलाङ्गनेति न्यायादिति भावः । नायं दृष्टान्तालङ्कारः बिम्बप्रतिबिम्बभावेनौपम्यस्य गम्यते तस्यो

सम्पदा सुस्थिरम्मन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम् ॥ ३२ ॥
समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः ।
प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः ॥ ३३ ॥

त्यानात् । किन्तु दृष्टान्तशब्देन तस्याभिधानादुपमालङ्कारः । अतएव दृष्टान्तोदाहरणनिदर्शनरूपा. शब्दान प्रयोक्तव्याः पौन रुक्त्यापत्तेरित्येकावल्यलङ्कारः ॥ ३१ ॥

तथापि सन्तोषे दोषमाह । सम्पदेति । यः स्वल्पयापि सम्पदा सुस्थिरमात्मानं मन्यतइति सुस्थिरम्मन्यः स्वस्थमानी भवति । आत्ममाने खश्चेति खश्प्रत्यये मुमागमः । तस्याल्प सन्तुष्टस्य तां स्वल्पसम्पदं कृतकृत्यस्तावतैव कृतार्थः विधिर्दैवमपि न वर्द्धयति अहमिति मन्ये पौरुषहीनाद्दैवमपि जुगुप्सते तत्प्रवृत्तेः परमर्द्धिप्राप्तिरिति भावः ॥ ३२ ॥

किञ्च पराक्रमलभ्य एवोदयो नान्यइत्याह । समूलेति । मानिनः अभिमानिनः परान् शत्रून् समूलं हत्वा समूलघातं । अघ्नन्तः । अनुन्मूलयन्तइत्यर्थः । समूलाकृतजीवेषु हन्कृञ्ग्रहइति णमुल् प्रत्ययः कषादिषु यथाविध्यनुप्रयोगइति हन्ते रनुप्रयोगः । नोद्यन्ति किन्तु हत्वैवोद्यन्तीत्यर्थः । तत्र हत्वैवोदये अन्धयतीत्यन्धं गाढं तमोऽन्धतमसं । ध्वान्ते गाढे ऽन्धतमसमित्यमरः । अवसमन्धेभ्यस्तमसइत्यच्प्रत्ययः । प्रध्वंसितमन्धतमसं येन सः उदयात्प्रागिति भावः । रविरुदाहरणं दृष्टान्तः अत्रापि दृष्टान्तोऽत्र मद्वाक्यवदतिवदुपमालङ्कारो न तु दृष्टान्तइति द्रष्टव्यम् ॥ ३३ ॥

विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥ ३४ ॥
ध्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखम् ।
पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ॥ ३५ ॥

किञ्चानुच्छिन्नशत्रोः प्रतिष्ठैव दुर्घटेत्याह । विपक्षमिति । विपक्षं शत्रुमखिलीकृत्य । खिलमुत्सन्नमकृत्वा अनुन्मूल्येत्यर्थः प्रतिष्ठा दुर्लभा खलु । तथाहि उदकं कर्तृ धूलिं स्वपरिभाविनीमिति भावः । पङ्कतामनीत्वा नाधःकृत्येत्यर्थः नावतिष्ठते किन्तु नीत्वैव तिष्ठतीत्यर्थः । समवप्रविभ्यः स्थ इत्यात्मनेपदम् । वाक्यभेदेन प्रतिबिम्बनापेक्षो दृष्टान्तालङ्कारः ॥ ३४ ॥

नन्वयं शिशुपाल एकाकी नः किं करिष्यतीत्याशङ्क्याह । ध्रियत इति । एकोऽपि रिपुर्यावत् ध्रियते अवतिष्ठते । धृङ् अवस्थाने इति धातोस्तौदादिकात्कर्त्तरि लट् रिङ्शयग्लिङ्क्षु इति रिङादेशः । तावत्तदवधि सुखं । कुतः यावत्तावच्च साकल्येऽवधावित्यमरः । तथाहि सिंहिकाया अपत्यं पुमान् सैंहिकेयो राहुः । तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुद इत्यमरः । स्त्रीभ्यो ढक् । असुरद्रुहां देवानां पुरः अग्रे सोमं क्लिश्नाति बाधते । प्राचुर्यात्सोमग्रहणं सूर्य्यं चेति भावः । तस्मादेकोऽपि शत्रुरुच्छेत्तव्य इति भावः । अग्नेः शेषमृणाच्छेषं शत्रोः शेषं न शेषयेदिति तात्पर्य्यं । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३५ ॥

सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः ।
स्यातामित्रे मित्रौ च सहजप्राकृतावपि ॥ ३६ ॥
उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ ३७ ॥

ननु क्षुद्रोऽयं चैद्यः किं नः करिष्यतीत्याशङ्क्य तस्य बलवत्तां वक्तुं मित्रामित्रबलाबलविवेकं तावत्करोति । सखेति । क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः । "ड्वितः क्त्रिः" "क्त्रेर्म्मन्नित्यम्" । सखा सुहृत् शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिममित्रशत्रू कार्य्यतः उपकारापकाररूपकार्य्य वशात् निर्वृत्ताविति शेषः । उक्तकार्य्योपाधेयावज्जीवमनपाया दनयोर्मित्रामित्रभावोऽपि अनपायीति गरीयांस्त्वमिति भावः । सहजप्राकृतौ तु नैवमित्याह । स्यातामिति । सहजातः सहजः एकशरीरावयवत्वात् तत्र सहजं मित्रं मातृष्वसेयपितृष्वसेयादि सहजशत्रुस्तु पितृव्यतत्पुत्रादिः प्रकृत्या सिद्धः प्राकृतः पूर्व्वोक्त सहजकृत्रिमलक्षणरहितइत्यर्थः । तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतं मित्रं अपि लर्थे तौ सहजप्राकृतौ शत्रु मित्रे च स्यातां तावात्मकार्य्यवशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमः शत्रुः शत्रुरेव मित्रं च मित्रमेवेति कृत्रिमावेवमित्रामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृता वित्यर्थः अनेन कृत्रिमत्वं सर्व्वापवादीति सिद्धम् ॥ ३६ ॥

एवं चेदस्माकं पैतृष्वसेयः शिशुपालः सहजमित्रत्वात्सन्धा तव्योन तु यातव्यइत्यतआह । उपकर्त्रेति । उपकर्त्रा उपकार

त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे ।
बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ॥ ३८ ॥

कारिणा अरिणापि सहजेन प्राकृतेन चेति शेषः सन्धिः कार्य्यः अरित्वापवादेन कृत्रिममित्रतायाबलीयस्त्वाद्यावज्जीवभाविन्या स्वत्रोत्पन्नत्वादिति भावः । एवमपकारिणा मित्रेणापि सहजेन प्राकृतेन वेति शेषः सन्धिर्न कार्य्यः मित्रत्वापवादेन कृत्रिमशत्रुतायाबलीयस्त्वाद्यावज्जीवभाविन्यास्तत्रोत्पन्नत्वादिति भावः । ननु साक्षादरिणा सन्दध्यात् मित्रेण कथं विरुन्ध्यादित्याशङ्क्य क्रियया तयोर्वैपरीत्याददोष इत्याह । हि यस्मादुपकारापकारावेव तयोर्मित्रामित्रयोर्लक्षणं स्वरूपं लक्ष्यं द्रष्टव्यम् । उपकर्त्तैव मित्रं अपकर्त्तैव शत्रुरित्यर्थः । तस्मात्सहजमित्रत्वेऽपि चैद्यः क्रियया शत्रुत्वात् यातव्यएवेति भावः ॥ ३७ ॥

अथ चैद्यस्य कृत्रिमशत्रुत्वं चतुर्भिराह । त्वयेति । हे हरे रुक्मिणीं हरता बन्धुभिस्तस्मै प्रदत्तां राक्षसधर्मेणोढवतेत्यर्थः । राक्षसो युद्धहरणादिति याज्ञवल्क्यः । गान्धर्वोराक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृताविति मनुः । त्वया चैद्योविप्रकृतः तथाहि बद्धमूलस्य रूढमूलस्य वैरतरोः स्त्रियोमहत् प्रधानं मूलं हि निश्चये। रूपकसंसृष्टोयम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३८ ॥

अथ तेनापि त्वं विप्रकृतइत्याह । त्वयीति । त्वयि भूमेरपत्यं पुमांसं भौमं नरकासुरं जेतुं गते सति स चैद्यइमां पुरीं द्वारकां प्रोषितोऽर्य्यमा सूर्य्योयस्यास्तां मेरोस्तटीं सानुमन्धकारइवारौ

त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमाम् ।
प्रोषितार्य्यमणं मेरोरन्धकारस्तटीमिव ॥ ३९ ॥
आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् ।
कथापि खलु पापानामलमश्रेयसे यतः ॥ ४० ॥
विराद्धएवं भवता विराद्धा बहुधा च नः ।
निर्वर्त्त्यतेऽरिः क्रियया सः श्रुतश्रवसः सुतः ॥४१॥

त्सीत् रुरोध । रुधेरनिटोलुङि रूपम् । उपमालङ्कारः ॥ ३९ ॥

अपकारान्तरमाह । आलप्येति । स चैद्योबभ्रोर्यादवभेदस्य दारान् भार्य्याम् । भार्य्या जायाथ पुं भूम्नि दाराः स्यात्तु कुटुम्बिनीत्यमरः । अपाहरत् इति यदिदं दारापहरणं आलप्योचार्य्यालं नालपनीयमित्यर्थः । अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा इति क्त्वा प्रत्यये समासे ल्यबादेशः । यतः पापानां पाप्मनां कथनमुच्चारणमपि । चिन्तिपूजिकथिकुंबीत्यप्रत्ययः । अश्रेयसेऽनर्थायालं समर्थम् । नमःस्वस्तीत्यादिना चतुर्थी । अत्र निषिध्यमानालपननिषेधनसमर्थनात्कार्य्येण कारणसमर्थकोर्थान्तरन्यासः ॥ ४० ॥

फलितमाह । विराद्धइति । एवं भवता विराद्धः विप्रकृतः । राधेरनिटः कर्म्मणि क्तः । बहुधा नोऽस्माकं च विराद्धाविप्रकर्त्ता श्रुतश्रवा नामहरेः पितृष्वसा तस्याः सुतः पैतृष्वसेयत्वात्सहजमित्रमपीति भावः । स चैद्यः क्रियया पूर्व्वोक्तान्योन्यापक्रियया अरिर्निर्वर्त्यते कृत्रिमः शत्रुः क्रियते अतोबलीयस्त्वादनुपेक्ष्यइति भावः ॥ ४१ ॥

विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्च्चिषं कक्षे शेरते तेऽभिमारुतम् ॥ ४२ ॥
मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी ।
क्रियासमभिहारेण विराध्यन्तं क्षमेत कः ॥ ४३ ॥

अत्राप्युपेक्षायां दोषमाह । विधायेति । येनरः पुमांसः । स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषानरइत्यमरः । सामर्षे प्रागेव सरोषे अरौ वैरं विधाय स्वयञ्चापकृत्येत्यर्थः उदासते उपेक्षन्ते ते नरः कक्षे गुल्मे । कक्षस्तु गुल्मे दोर्मूले पापे जीर्णवने तृणइति वैजयन्ती । उदर्च्चिषं अग्निं प्रक्षिप्य अभिमारुतं । आभिमुख्येऽव्ययीभावः । शेरते स्वपति तद्वन्नाशहेतुरित्यर्थः । शीङोरुङिति रुडागमः अत्र ये उदासते ते शेरते इति विशिष्टो दासीन्यशयनयोर्वाक्यार्थयोर्निर्दिष्टैकत्वासम्भवात्सादृश्यलक्षणाया मसम्भवद्वस्तुसम्बन्धोवाक्यार्थनिर्वृत्तिरिति निदर्शनाभेदः न चायं दृष्टान्तः वाक्यभेदेन प्रतिविम्बकारणाक्षेपे तस्योत्थानात् । अत्र तु वाक्यार्थे वाक्यार्थसमारोपाद्वाक्यैकवाक्यतायां तदभावइत्य लङ्कारसर्व्वस्वकारः ॥ ४२ ॥

तथापि बान्धवत्वात् सोढव्यइत्याशङ्क्याह । मनागिति यः क्षमी क्षमनः । शमित्यष्टाभ्योघिनुन् इति घिनुन् प्रत्ययः । स सोढा मनागल्पं अभ्यावृत्तावपीति भावः अनभ्यावृत्त्या सकृद्वा अन ल्पत्वेऽपीति भावः विराध्यन्तमपकुर्व्वाणं कामं स्पृशं क्षाम्यतु क्षम्यतां । सम्भावनायां लोट् । शमामष्टानां दीर्घः । क्रियासमभिहारेण स्पृशं पौनःपुन्येन चेत्यर्थः । न च पुंवाक्येष्वनेकार्थत्वं दोषाय ।

अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥ ४४ ॥
माजीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ।
तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥ ४५ ॥

विराध्यन्तं कः क्षमेत सहेत सोढुं शक्नुयात् न कोऽपीत्यर्थः । शकि लिङिति शक्यार्थे लिङ् क्षमूष्सहने दैवादिकोभौवादिकश्च ॥ ४३ ॥

ननु सर्व्वदा क्षमैव पुंसोभूषणं अतोऽपराधेऽपि क्षन्तव्यमत आह । अन्यदेति । अन्यदा सुरतव्यतिरिक्ते काले योषितोलज्जेव पुंसोऽन्यदा अपरिभवे क्षमा शमोभूषणं परिभवे तु योषितः सुरतेषु वैयात्यं धार्ष्ट्यमिव । धृष्टे धृष्णुर्वियातश्चेत्यमरः । पराक्रमः पौरुषं भूष्यतेऽनेनेति भूषणं आभरणं एवं च क्रियावचनत्वा विरोधइति वल्लभोक्तं प्रत्युक्तम् ॥ ४४ ॥

अथ परिभवेऽप्यपाक्रमे त्रिभिर्निन्दामाह । मा जीवन्निति । यः परस्यापकर्त्तुरवज्ञया अमानेन यद्दुःखन्तेन दग्धस्तप्तोऽतएव मा जीवन् गर्हितजीवी सन् । माङ्याक्रोश इति लटः शत्रादेशः । जीवति प्राणान्धारयति जनन्याः क्लेशकारिणः गर्भधारणप्रसवादि वेदनाकारिणस्तद्व्यतिरिक्तार्थक्रियाहीनस्येत्यर्थः तस्याजननमजननि रनुत्पत्तिरेवास्तु । जननीक्लेशनिवृत्त्यर्थमिति भावः । आक्रोशे नञ् अनिरिति नञ्पूर्व्वाज्जनिधातोरनिप्रत्ययः ॥ ४५ ॥

पादेति । यद्रजोधूलिः पादेनाहतं सत् उत्थायोद्गीय मूर्द्धान माहन्तुरेव शिरोऽधिरोहति आक्रमति तद्रजः अचेतनमपीति

पादाहतं यदुत्थाय मूर्द्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥ ४६ ॥
असम्पादयतः कञ्चिदर्थं जातिक्रियागुणैः ।
यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥ ४७ ॥

भावः । अवमाने सत्यपि स्वस्थात्सन्तुष्टाद्देहिनः चेतनाद्वरं श्रेष्ठं । व्यतिरेकालङ्कारः ॥ ४६ ॥

असम्पादयतइति । किञ्च जातिः ब्राह्मणत्वादिः क्रिया इज्याध्ययनादिः गुणः शौर्य्यादिः तैः साधनैः । करणे तृतीया । कञ्चिदर्थं सुकृतकीर्त्त्यादिपौरुषार्थमन्यत्र गोत्वपाचकत्वशौक्ल्यादिभिः स्वाभिधेयभूतैः करणैः कञ्चिदर्थं व्यवहाररूपं प्रयोजनमसम्पादयतः उभयत्र तादृग्जात्याद्यसम्भवादिति भावः । पुंसो जन्म सत्तालाभः यदृच्छाशब्दवत् इच्छाप्रकल्पितस्य जात्यादिप्रवृत्तिनिमित्तशून्यस्य डित्थादिशब्दस्येव । तत्र तस्येवेति वति प्रत्ययः । स्वेच्छा यदृच्छा स्वच्छन्दः स्वैरता चेति ते समाः इति केशवः । संज्ञायै केवलं संज्ञार्थमेव एकत्र पारिभाषिकं किञ्चिन्नाममात्रं अनुभवितुं अन्यत्र तादृक्तामनुभवितुमित्यर्थः ॥ ४७ ॥

एवमपौरुषं दूषयित्वा पौरुषं भूषयति । तुङ्गत्वमिति । अद्रौ पर्व्वते तुङ्गत्वमौन्नत्यमस्तीति शेषः । अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्तीत्यादिभाष्यात् भवन्ती पूर्व्वाचार्य्याणां लटः संज्ञा । इतरा अगाधता नास्ति सिन्धौ समुद्रे अगाधता गम्भीरतास्ति इदं तुङ्गत्वं नास्ति मनस्विनि वीरे तु असम्भोग्यताहेतु

तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता।
अलङ्घनीयताहेतुरुभयन्तन्मनस्विनि ॥ ४८ ॥
तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत्।
हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ॥४९॥

रलङ्घ्यत्वकारणं तदुभयं तुङ्गत्वमगाधता च। तस्मादद्रिसिन्धुभ्या मधिकोमनस्वीति व्यतिरेकालङ्कारः ॥ ४८ ॥

सम्प्रति शत्रौ मार्द्दवमनर्थायेत्याह। तुल्यइति। स्वर्भानुः राहुः अपराधे तुल्येऽपि भानुमन्तं सूर्य्यं चिरेण ग्रसते हिमांशुं चन्द्रमाशु शीघ्रं ग्रसिते गिलतीति यत्। ग्रसते गिलिते गीर्णमित्य भिधानात्। तत् म्रदिम्नो मार्द्दवस्य फलं स्फुटम्। पृथ्वादिभ्य इमनिच् इतीमनिच्प्रत्ययः। तद्विपक्षे तीव्रेण भवितव्यं अन्यथा मृदुः सर्व्वत्र बाध्यतइति भावः। एतच्च प्रस्तुतमप्रस्तुता र्केन्दुकथनेन सारूप्यात्प्रतीयते इत्यप्रस्तुतप्रशंसाभेदोऽयम्। अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते। अप्रस्तुतप्रशंसेयं सारूप्या द्विनियम्यितेति लक्षणात् ॥ ४९ ॥

एतदेव भङ्ग्यन्तरेणाह। स्वयमिति। असाराणां दुर्व्वलानां निदर्शनं दृष्टान्तः अतएव ईषदसमाप्तं तृणं बहुतृणं तृण वाल्पमित्यर्थः। विभाषा सुपोबहुच् पुरस्तादिति बहुच्प्रत्ययः प्रकृतेः पूर्व्वं च भवति। स्यादीषदसमाप्तौ तु बहुच् प्रकृति लिङ्गकइति वचनात् प्रकृतिलिङ्गता। लघुर्निष्पौरुषोनरोऽल्पेऽपि परोवायुरिवेत्युपमितसमासः। बहुतृणमिति स्पष्टोपमासाहचर्य्या त्कल्पबदेश्यदेशीयदेश्यादिति दण्डिना कल्पवादीनामौपम्य

स्वयं प्रणमतेऽल्पेऽपि परवायावुपेयुषि ।
निदर्शनमसाराणां लघुर्बहुतृणं नरः ॥ ५० ॥
तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥ ५१ ॥

वाचकेष्वभिधानात् । तस्मिन्नुपेयुषि प्राप्ते सति स्वयं प्रणमते स्वयमेव प्रह्वीभवति। कर्मवत्कर्मणा तुल्यक्रिय इति कर्मवद्भावात्। भावकर्मणोरित्यात्मनेपदं न दुहस्नुनमां यक् चिणाविति यक् प्रतिषेधः । वायुना तृणमिवाल्पीयसापि रिपुणा लघुरल्पोऽत्र परिभूयत इत्यर्थः । उपमालङ्कारः ॥ ५० ॥

पुनः पौरुषे गुणमाह । तेजस्वीति । दवीयानपि दूरस्थोऽपि । स्थूलदूरेत्यादिना पूर्वगुणयणादिपरलोपौ । तेजस्वी तेजस्विनां मध्ये गण्यते सङ्ख्यायते तथाहि पञ्चाग्निसाध्यं तपो यस्य स तथा तस्य पञ्चतपसः पञ्चाग्निमध्ये तपस्यतः तपनोऽर्को जातवेदसामग्नीनां पञ्चमः पञ्चानां पूरणः पञ्चमो जातवेदा भवतीत्यर्थः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५१ ॥

गुणान्तरस्य व्यतिरेकेणाह । अकृत्वेति । उच्चैरुन्नतेषु विद्विषां मूर्द्धसु हेलया पादमकृत्वा अनिधाय । अनञ्पूर्व इति निषेधात्समासेऽपि न ल्यबादेशः । कीर्त्तिः कथङ्कारं कथ मित्यर्थः । अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेदित्यनर्थकाद्देव करोतेः कथम्पूर्वाणमुल् । अनालम्बा निराधारा कीर्त्तिर्द्यां दिवमधिरोहति न कथञ्चिदित्यर्थः किञ्चिन्निःश्रेण्यादिकमना

अज्ञात्वा हेलया पादमुच्चैर्मूर्द्धसु विद्विषाम् ।
कथङ्कारमनालम्ब्य कीर्त्तिर्द्यामधिरोहति ॥५२॥
अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः ।
केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥ ५३ ॥

कर्म्योपसौधस्य दुरारोहत्वादिति भावः । तस्मात्कीर्त्तिमिच्छतः पौरुषमेवाश्रयणीयं इति श्लोकतात्पर्य्यम् । कीर्त्तितद्वतोरभेदोपचारात्समानकर्तृतानिर्व्वाहः । अत्र प्रस्तुतायाः कीर्त्तेर्विषयमहिम्ना अप्रस्तुतप्रासादारोहणस्त्रीव्यवहारप्रतीतेः समासोक्तिः ॥ ५२ ॥

पौरुषमेवाश्रयणीयमित्यत्रान्वयव्यतिरेकदृष्टान्तावाचष्टे । अङ्केति । अङ्कमुत्सङ्गमधिरोपितोमृगोयेन स चन्द्रमाः मृगलाञ्छनः मृगाङ्कः तथा निष्ठुरं यथा तथा क्षिप्ताहतोमृगयूथोमृगसमूहो येन स केसरी सिंहोमृगाधिपः उभयत्रापि ख्यातइति शेषः तस्माच्छत्रौ मार्दवं दुष्कीर्त्तये पौरुषं तु कीर्त्तये इति भावः । अत्राप्रस्तुतकथनात् प्रस्तुतार्थप्रतीतेरप्रस्तुतप्रशंसा ॥ ५३ ॥

ननु सामादिसुकरोपायमपेक्ष्य किं पाक्षिकसिद्धिना दण्डेन यथाह मनुः । साम्ना भेदेन दानेन समस्तैरुत वा पृथक् । विजेतुं प्रयतेतारीन्न युद्धेन कदाचनेति । तस्मात्सान्त्वमेव युक्तमित्याशङ्क्य द्वाभ्यां निराचष्टे । चतुर्थोपायेति । चतुर्थोपायसाध्ये दण्डसाध्ये रिपौ सान्त्वं साम । सामसान्त्वमुभे समे इत्यमरः । अपक्रिया अपकारः तथा हि खेद्यं खेदार्हं खेदनकार्य्यमित्यर्थः । खेदस्तु खेदने घर्माइति विश्वः । आमज्वरमपक्वज्वरमाप्य । आमोरोगे रोगभेदे आमोऽपक्वे तु वाच्यवदिति विश्वः । कः प्राज्ञः पण्डितः

चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया।
स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति ॥५४॥
सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः।
प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ॥ ५५ ॥
गुणानामायथातथ्यादर्थं विप्लावयन्ति ये।
अमात्यव्यञ्जना राज्ञां दूष्यास्ते शत्रुसंज्ञिताः ॥५६॥

अम्भसा जलेन परिषिञ्चति न कोऽपीत्यर्थः । ज्वरितस्याम्भस्सेकवत् क्रुद्धस्य सान्त्वमुद्दीपकरं स्यात् अतो दण्ड एवेति भावः । वाक्यभेदेन प्रतिबिम्बकरणापेक्षो दृष्टान्तालङ्कारः ॥ ५४ ॥

सामेति । सकोपस्य रूढवैरस्य तस्य चैद्यस्य सामवादाः प्रियोक्तयः सहसा प्रतप्तस्य क्वथितस्य सर्पिषो घृतस्य तोयबिन्दव इव प्रत्युत वैपरीत्येन दीपकाः प्रज्वलनकारिणः न तु शान्तिकरा इत्यर्थः तस्माद्दण्ड एव सः । मनुवचनन्त्वप्ररूढवैरविषयमिति भावः ॥ ५५ ॥

एवं स्थिते केचिदुद्धवादयः प्रत्याचक्षीरन् तान् प्रत्याह । गुणानामिति । सन्ध्यादीनां गुणानामायथातथ्यात् यथातथात्वमनतिक्रम्य यथातथं यथायोग्यं इति यावत् । यथार्थे तु यथातथमित्यमरः। यथार्थेऽव्ययीभावः स नपुंसकमिति नपुंसकत्वं ह्रस्वो नपुंसके इति ह्रस्वत्वं । ततो नञ्समासे अयथातथं तस्य भावः आयथातथ्यं ब्राह्मणादित्वात् ष्यञ् प्रत्ययः यथातथयथापुरयोः पर्यायेणेति विकल्पान्नञः पूर्वपदवृद्धिः । तस्मादायथातथ्यादयथायोग्यत्वादन्यकालेऽन्यप्रयोगादित्यर्थः । अर्थम्प्रयोजनं विप्लावयन्ति

स्वशक्त्युपचये केचित्परस्य व्यसनेऽपरे ।
यानमाहुस्तदासीनं त्वामुत्थापयति द्वयम् ॥ ५७ ॥

निघ्नन्ति कार्य्यहानिं कुर्व्वन्तीत्यर्थः । अमात्यानां व्यञ्जनं चिह्नं येषां ते तथोक्तास्तद्वेषधारिणइत्यर्थः । अवर्ज्योबहुव्रीहिर्व्यधिकरणोजन्माद्युत्तरपदइति वामनः । वस्तुतस्तु शत्रुरिति संज्ञा एषां सञ्जाता शत्रुसंज्ञिताः शत्रवएव ते कूटमन्त्रिणोराज्ञां

दूषयितुमर्हाः दूष्यागार्ह्याः त्याज्याइति यावत् । कृत्यानां कर्त्तरि वेति कर्त्तरि षष्ठी । अतः स्वोक्तं न प्रतिरोद्धव्यमिति भावः ॥ ५६ ॥

ननु यातव्योऽपि काल्ल यातव्यइत्याशङ्कायामेव कालइत्याह स्वेति । केचिद्वृद्धाः स्वस्य शक्त्युपचय सामर्थ्यातिरेके यानं यात्रामाहुः । यथाह कामन्दकः प्रायेण सन्तोव्यसने रिपूणां यातव्यमित्येव समादिशन्ति । तथा विपक्षे व्यसनानपेक्षो घमोद्विषन्तं मुदितः प्रतीयादिति । अपरे वृद्धाः परस्य शत्रोर्व्यसने विपदि । व्यसनं विपदि भ्रंशइत्यमरः। यानमाहुः ।अत्र मनुः। तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोरिति । तद्द्वयमुक्तपक्षद्वयं कर्त्तृ आसीनमनुद्युञ्जानं । ईदासइति शानजाकारस्येकारादेशः । त्वामुत्थापयति प्रेरयति । तदुभयलाभादीदृक् कालोन कदापि लभ्यतइत्यर्थः ॥ ५७ ॥

तत्र स्वशक्त्युपचयं तावल्लक्षयति । लिलङ्घयिषतइति । लोकान् लङ्घयितुमिच्छतोलिलङ्घयिषतः । लङ्घयतेः सन्नन्ताल्लटः शतरि षष् अलङ्घ्यान् स्वयं दुर्लङ्घ्यान् कुतः अलघीयसः अतिगुरून्

ललङ्घयिषतो लोकानलङ्घ्यानलघीयसः ।
यादवाम्भोनिधीन् रुन्धे वेलेव भवतः क्षमा ॥ ५८ ॥
विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् ।
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि ॥ ५९ ॥

अत एव यादवाम्भोनिधय इवेत्युपमितसमासः तान् यादवाम्भोनिधीन् भवतः क्षमा तितिक्षा वेलेव कूलमिव । वेला कूलेऽपि वारिधेरिति विश्वः । रुन्धे प्रतिबध्नाति अन्यथा प्रागेव सर्व्वं संहरेयुरिति भावः ॥ ५८ ॥

अभ्युदयस्त्वाधीनपरः यदक्लेशेनैव ते विजयलाभ इत्याह । विजय इति । सेनायाः कर्त्र्या विजयः साक्षिमात्रे उदासीने एव फलभाजि त्वयि समीक्ष्योक्ते साङ्ख्योक्ते । साङ्ख्यं समीक्ष्यमिति त्रिकाण्डः । आत्मनि बुद्धेर्महत्तत्त्वस्य मूलप्रकृतेः प्रथमविकारस्य कर्त्र्याः भोगः सुखदुःखानुभव इवापदिश्यतां व्यवह्रियतां भृत्यजयपराजययोः स्वामिगम्यत्वादिति भावः । साङ्ख्याश्चाहुः । कर्त्तैव भवत्युदासीन इति सर्व्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिरिति च ॥ ५९ ॥

अथ परस्य व्यसनमाह । हत इति । हिडिम्बरिपुणा भीमेन द्वयोर्मात्रोरपत्यं पुमान् द्वैमातुरः मातुरुत्सङ्ख्यासम्भद्रपूर्व्वाया इत्यण् प्रत्ययः उकारश्चान्तादेशो रेफपरः । तस्मिन् राज्ञि जरासन्धे संहिताभ्यां पत्नीभ्यां अर्द्धशः प्रसूतो जरया नाम पिशाच्या सन्धित इति कथयन्ति । युधि हते सति चिरस्य चिरकालेन । चिराय चिररात्राय चिरस्याद्याश्चिरार्थका इत्यमरः । मित्रव्यसनी मित्र

हते हिडिम्बरिपुणा राज्ञि द्वैमातुरे युधि ।
चिरस्य मित्रव्यसनी सुदमो दमघोषजः ॥ ६० ॥
नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये ।
विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ॥ ६१ ॥

व्यसनवान् मित्रभ्रंशवानिति यावत् । व्यसनं विपदि भ्रंश इत्यमरः । दमघोषाज्जातो दमघोषजश्चैद्यः सुखेन दम्यत इति सुदमः एकाकित्वात्सुसाध्य इत्यर्थः ॥ ६० ॥

कष्टश्चायं पचोऽभ्युपेत्यवादेनोक्तो वस्तुतस्तु शूराणां अग्रिमपच एव दृष्टः शास्त्रसंवादी । यथाह कामन्दकः यदा समस्तं प्रसभं निहन्तुम्पराक्रमादूर्जितमप्यमित्रं । तदाभियायादहितानि कुर्व्वन्नुपान्ततः कर्षणपीडनानीतीत्यभिप्रेत्याह । नीतिरिति । परः शत्रुः आपदि गम्योगमनार्हः नीतिरिति यत्तदापदि गमनं मानिनः शौर्य्याभिमानिनः ह्रिये लज्जाकरमित्यर्थः । किन्तु पूर्ण उपचितगात्रः स शत्रुस्तस्य मानिनः विधुश्चन्द्रः विधुं तुदति हिनस्तीति विधुन्तुदो राहुः । विध्वरुषोस्तुद इति खश् प्रत्यये मुमागमः । तस्येवोत्सवाय अतएव बलिना बलवानेव यातव्यः बलिनस्तु वयमिति भावः ॥ ६१ ॥

तर्हि पूर्व्वोदाहृतमन्वादिशास्त्रविरोधः स्यादित्याशङ्क्याह । अन्यदिति । अन्यदुच्छृङ्खलमनर्गलं प्रसह्य पीडनचममिति भावः सत्त्वं बलं अन्यत् शास्त्रेण मन्वादिशास्त्रेण नियन्त्रितं उदाहृतं पर-व्यसनकाले सत्त्वमन्यत् तयोः सापेक्षत्वनिरपेक्षत्वाभ्यां मिथोविरोधा-न्नैकशास्त्रत्वं सम्भवतीत्यर्थः । अत्र दृष्टान्तमाह । तेजस्तिमिरयोः

अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥६२॥
इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः ।
आस्माकदन्तिसान्निध्याद्वामनीभूतभूरुहः ॥ ६३ ॥

समानमधिकरणं ययोस्तयोर्भावः सामानाधिकरण्यं एकाश्रयत्वं कुतः न कुतश्चित् तयोः सहावस्थानविरोधादिति भावः । तस्मादुभयोरुदितानुदितहोमवद्भिन्नविषयत्वादितरेतरशास्त्रविरोधोन बाधकइति भावः ॥ ६२ ॥

तर्हि नः किमिदानीं कार्य्यमतआह । इन्द्रप्रस्थेति । इन्द्रप्रस्थस्य पार्थनगरस्य गमोगमनं । ग्रहवृदृनिश्चिगमश्चेत्यप्प्रत्ययः । मा कारि तावन्न क्रियतामेवेत्यर्थः । यावत्तावत्परिच्छेदे कार्त्स्न्ये मानावधारणे इति विश्वः । कृञः कर्म्मणि लुङ् माङि लुङित्याशीरर्थे न माङ्योगइत्यट्प्रतिषेधः । किन्तु चेदयः चेदिदेशाः अस्माकमिमे आस्माकाः । युष्मदस्मदोरन्यतरस्यां खञ् चेति विकल्पादण् प्रत्ययः तस्मिन्नणि च युष्माकास्माकावित्यस्माकादेशः । सन्निधिरेव सान्निध्यं । स्वार्थे ष्यञ् प्रत्ययः । आस्माकानां दन्तिनां सान्निध्यात् वामनीभूताः शाखाभङ्गात् खर्व्वीभूताभूरुहोवृक्षायेषां ते तथोक्ताः सन्तु चेदियात्रैव क्रियतामित्यर्थः । सा च प्रस्तुता प्रस्तुतेनैव स्वकार्य्येण गम्यतइति पर्य्यायोक्तालङ्कारः । कारणं गम्यते यत्र प्रस्तुतात् कार्य्यवर्णनात् । प्रस्तुतत्वेन सम्बन्धात्पर्य्यायोक्तः स उच्यतइति लक्षणात् ॥ ६३ ॥

निरुद्धवीवधासारप्रसारा गा इव व्रजम् ।
उपरुन्धन्तु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥६४॥
यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः ।
वयं हनाम द्विषतः सर्व्वः स्वार्थं समीहते ॥ ६५ ॥

निरुद्धेति । किञ्च दाशार्हाः यादवाः वीवधो धान्यादिप्राप्तिः आसारः सुहृद्बलं प्रसारस्तृणकाष्ठादेः प्रवेशः। धान्यादेर्वीवधः प्राप्तिरासारस्तु सुहृद्बलं प्रसारस्तृणकाष्ठादेः प्रवेश इति वैजयन्ती । ते निरुद्धा यैस्ते तथोक्ताः अन्यत्र निरुद्धौ वीवधानां पर्य्याहारापरनाम्नां स्कन्धवाह्यक्षीराद्याहरणसाधनभारविशेषाणां आसारप्रसरौ प्रवेशनिर्गमौ यैस्ते तथोक्ताः । विवधो वीवधो भारे पर्य्याहाराध्वनोरपीति हेमचन्द्रः । व्रजं गोष्ठं । व्रजः स्याद्गोकुलं गोष्ठमिति वैजयन्ती । गा इव माहिष्मतीं पुरीं द्विषोऽरीनुपरुन्धन्तु व्रजे गा इव माहिष्मत्यामरीन् आवृण्वन्त्वित्यर्थः । दुहियाचिरुधीति द्विकर्म्मकत्वं तत्र पुरीं व्रजावकथितं कर्म्म अन्यदीप्सितं कर्म्म ॥ ६४ ॥

तर्हि पार्थप्रार्थनायाः का गतिरित्याशङ्क्य उपेक्षैव गतिरित्याह यजतामिति । पाण्डवो युधिष्ठिरो यजतां यागं करोतु इन्द्रः स्वर्गमवतु रक्षतु इनोऽर्कः । इनः पत्यौ नृपार्कयोरिति मेदिनी । तपतु प्रकाशतां वयं द्विषोऽरीन् हनाम मारयाम । आडुत्तमस्य पिच्चेत्याडागमः सर्व्वत्र प्राप्तकाले लोट् । तथाहि सर्व्वो जनः स्वार्थं स्वप्रयोजनं समीहते अनुसन्धत्ते । इन्द्रादिसमानयोगक्षेमोऽनः पार्थ इत्यर्थः । अर्थान्तरन्यासः ॥ ६५ ॥

प्राप्यतां विद्युतां सम्पत्सम्पर्कादर्करोचिषाम् ।
शस्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः ॥ ६६ ॥

इति संरम्भिणो वाणीर्बलस्यालेख्यदेवताः ।
सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ॥ ६७ ॥

निशम्य ताः शेषगवीरभिधातुमधोक्षजः ।
शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा ॥ ६८ ॥

प्राप्यतामिति । किञ्च द्विषतां शिरश्छेदेन प्रोच्छलता उच्छलता शोणितेनोक्षितैः सिक्तैः शस्त्रैरर्करोचिषां सम्पर्काद्विद्युतां सम्पत् लक्ष्मीः प्राप्यतामिति निदर्शनालङ्कारः ॥ ६६ ॥

इतीति । इतीत्थं संरम्भिणः क्षुभितस्य बलभद्रस्य वाणीरालेख्यदेवताश्चित्रलिखितदेवताः सभायाः सदोगृहस्य भित्तीनां प्रतिध्वानैः प्रतिध्वनिव्याजेनेत्यर्थः । भयादन्ववदन् अन्वमोदयन्निवेत्युत्प्रेक्षा ॥ ६७ ॥

निशम्येति । अधः कृतमक्षजमिन्द्रियजं ज्ञानं येन सोऽधोक्षजो हरिः ताः शेषस्य शेषावतारस्य बलभद्रस्य गाः वाचः शेषगवीः । गोरतद्धितलुकीति टच् टित्वान्ङीप् । निशम्य श्रुत्वा । निशाम्यतीति श्रवणे तथा निशमयत्यपीति भट्टमल्लः । तत्र शाम्यतेरिदं रूपं अन्यथा निशमय्येति स्यात् । अतएव वामनः निशम्य निशमय्यशब्दौ प्रकृतिभेदादिति । बृहतां वाचां पत्युः बृहस्पतेस्तस्य शिष्याय उद्धवायाभिधातुं वक्तुं दृशा दृक्संज्ञया प्रस्तावं अवसरमदिशत् अतिसृष्टवान् । प्रस्तावः स्यादवसर इत्यमरः ॥ ६८ ॥

भारतीमाहितभरामथानुद्धतमुद्धवः ।
तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजम् ॥६९॥
सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुसलपाणिना ।
निर्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम् ॥७०॥

भारतीमिति। अथ कृष्णानुज्ञानन्तरं उद्धवः आहिताभरोऽर्थगौरवं यस्यां सा तां तथ्यां यथार्थां भारतीं वाचं अनुद्धतमगर्व्वितं यथा तथा गदस्याग्रजं कृष्णं अग्रे पुरतइति प्रागल्भ्योक्तिः । उतथ्यस्य महर्षेरनुजोऽन्हस्पतिः । उतथ्यावरजोजीवइति विश्वः । तद्वत्तेन तुल्यं जगाद । तेन तुल्यं क्रिया चेद्वतिरिति वतिः । तद्धितगेयमुपमा ॥ ६९ ॥

किं जगादेत्याह । सम्प्रतीति । सम्प्रति मुसलपाणिना बलभद्रेण केवलं पूरुरेणेति ध्वनिः । उक्ते सति वक्तुमसाम्प्रतं अयुक्तं । असाधूक्तवादभ्याससमानयोगक्षेमप्रसङ्गादिति ध्वनिः । साम्प्रतशब्दस्यार्हार्थत्वात्तद्योगे शकधृषेत्यादिना तुमुन् । तथा हि लेखेन पत्रेणार्थे वाच्ये निर्धारिते निर्णीते सति वाचिकं व्याहृतार्थां वाचं सन्देशवचनमित्यर्थः । सन्देशवाग्वाचिकं स्यादित्यमरः । वाचोव्याहृतार्थायामिति ठक् । उक्त्वा खलु न वाच्यं खल्वित्यर्थः । खलुशब्दः प्रतिषेधे अन्योक्त्या लङ्कारे । निषेधवाक्यालङ्कारे जिज्ञासानुनये खलु इत्युभयत्राप्यमरः । अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वा प्रत्ययः । इह न पादादौ खल्वादयइति निषेधस्योद्देजकाभिप्रायत्वात् । नञर्थखलुशब्दस्यानुद्वेजकत्वात् नञ्वदेव पादादौ प्रयोगे न

तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवम् ।
तत्प्रयोजककर्तृत्वमुपैति मम जल्पतः ॥ ७१ ॥
वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव ।
अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता ॥ ७२ ॥

दूष्यतीत्यनुसन्धेयम् । लिखितार्थे वाचिकमिव बलोक्ते मदुक्ति रनवकाशेति वाक्यार्थप्रतिबिम्बकरणात् स्पष्टस्तावद्दृष्टान्तः स्तुति व्याजेन निन्दावगमात् व्याजस्तुतिश्च लक्षणं चाग्रे वक्ष्यते ॥ ७० ॥

तर्हि किं तूष्णीम्भूतेन भाव्यं नेत्याह । तथापीति । तथापि बलेन निर्ज्जितेऽपि ते तव मय्यपि बलभद्र इवेत्यपिशब्दार्थः । गुरुरित्येव यद्गौरवमादरः तद्गौरवं जल्पतः जल्पने प्रयोज्य कर्म्मणो मे प्रयोजककर्तृत्वं प्रेरकत्वमुपैति अतो वक्ष्यामीत्यर्थः । न हि पण्डितैः सादरं पृष्टस्य विशेषज्ञस्य अज्ञवत्तूष्णींभावो युक्त इति भावः ॥ ७१ ॥

ननु रामेणैव सर्व्वं प्रपञ्चेनोक्तं सम्प्रति किन्ते वाच्यमस्तीत्या शङ्क्य तथा प्रपञ्चोऽयमिति हृदि निधाय स्तुवन्नाह । वर्णैरित्यादि चयेण । कतिपयैः परिमितैर्वर्णैः पञ्चाशतैव मातृकाक्षरैः कतिपयैः सप्तभिरेव स्वरैर्निषादादिभिः ग्रथितस्य गुम्फितस्य वाङ्मयस्य शब्दजालस्य । एकाचोऽपि नित्यं मयटमिच्छन्ति इति स्वार्थे मयट् । गीयत इति गेयं तस्य गानस्येव विचित्रता रचना भेदादनन्ता अपरिमिता भवतीत्यर्थः अहो अतस्तेन साधूक्तेऽपि विशेषानन्त्यात् ममापि वक्तव्यमस्तीत्येको भावः । तस्य दुरुक्तत्वान्ममैवास्तीत्यन्यः । प्रत्यवयवमिवोपादानादनेकेवेय मुपमा ॥ ७२ ॥

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते ।
अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः ॥ ७३ ॥
म्रदीयसीमपि घनामनल्पगुणकल्पिताम् ।
प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव ॥ ७४ ॥

बह्वपीति । स्वेच्छया स्वप्रतिभानुसारेण प्रकीर्णमसङ्गतं बह्वपि कामं यथेष्टमभिधीयते किंतु अनुज्झितोऽर्थसम्बन्धः पदार्थसङ्गतिर्यस्मिन् स प्रबन्धः सन्दर्भः दुरुदाहरो दुर्वचः । हरतेः खल् प्रत्ययः । रामेण तु सङ्गतमेवोक्तमिति स्तुतिः असङ्गतमेवोक्तमिति निन्दा च गम्यते ॥ ७३ ॥

म्रदीयसीमिति । कुशलाः वक्तारो म्रदीयसीमतिसुकुमाराक्षरां श्लक्ष्णतरां च तथापि घनामर्थगुर्वीं अन्यत्र सान्द्रां कदलीदलकल्पामित्यर्थः । अनल्पैर्बहुभिर्गुणैः श्लेषादिभिस्तन्तुभिश्च कल्पितां रचितां निर्मितां च चित्रां शब्दादिविचित्रां विचित्ररूपां च वाचं पटीं शाटीमिव प्रसारयन्ति रामवागप्येवंविधेति स्तुतिः रामवाक् तु नैवंविधेति निन्दा च गम्यते । अत्र श्लेषस्य शुद्धविषयासम्भवेन सर्वालङ्कारबाधकत्वादुपमाप्रतिभोत्थापितः प्रकृताप्रकृतश्लेषोऽयमित्यलङ्कारसर्वस्वकारः । एवञ्च पूर्णोपमाया निर्विषयत्वप्रसङ्गात् श्लेषप्रतिभोत्थापितेयमुपमैवेत्यन्ये ॥ ७४ ॥

अथोद्धवः स्वसिद्धान्तं दर्शयिष्यन् स्तुत्या गर्वम्परिहरन् हरिमभिमुखीकरोति । विशेषेति । विशेषं वेत्ति विशेषविद्वान् तस्य विशेषविदुषो विशेषज्ञस्य । गतिगम्यादिपाठात् द्वितीयासमासः । तव पुरोऽग्रे शास्त्रं नीतिशास्त्रमुद्ग्राह्यते उपन्यस्यत इति यत् ।

विशेषविदुषः शास्त्रं यत्त्वोद्ग्राह्यते पुरः ।
हेतुः परिचयस्थैर्य्ये वक्तुर्गुणनिकैव सा ॥ ७५ ॥
प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि ।
तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसम्पदः ॥ ७६ ॥

उद्ग्राहितमुपन्यस्तमिति वैजयन्ती । सा तदुद्ग्रहणमित्यर्थः । विधेय प्राधान्यात् स्त्रीलिङ्गत्वं । वक्तुः उद्ग्राहयितुः परिचयस्थैर्य्ये अभ्यास दार्ढ्ये हेतुर्गुणनिका आम्रेडितमेवेति यावत् न तु वैदुष्यप्रकटन मिति भावः । गुण आमेडने चौरादिकात् ण्यासश्रन्थोयुजिति युच् ततः संज्ञायां कन् कात्पूर्व्वस्येकारः ॥ ७५ ॥

स्वमतं स्वमतमुपन्यस्यति । प्रज्ञेति । अतोऽस्मात्कारणात् स्वमस्यास्तीति स्वामी प्रभुः । स्वामिन्नैश्वर्य्य इति निपातः । प्रज्ञो त्साहौ मन्त्रोत्साहशक्ती आत्मनि स्वस्मिन्नाधातुं सम्पादयितुं यतेत स्वयमुभयशक्तिमान् भवेदित्यर्थः । कुतः हि यस्मात् तौ प्रज्ञोत्साहौ उदेष्यन्त्यावर्त्स्यन्त्याः जिगीषोरात्मनः सम्पदः प्रभुशक्ते र्मूलं निदानं । अत्रोत्साहग्रहणं दृष्टान्तार्थम् । यथोत्साहस्तथा मन्त्रोऽपि ग्राह्यो न तु केवलोत्साह इति बलभद्रापवादः ॥ ७६ ॥

उत्साहवत्प्रज्ञापि ग्राह्या इत्युक्तं तस्याः प्रयोजनमाह । सोप धानामिति । ये धीराः धीमन्तः सोपधानां सविशेषां युक्तियुक्ता मित्यर्थः अन्यत्र सगेन्दुकां सोपवर्हामित्यर्थः । उपधानं विशेषे स्याद्गेन्दुके प्रणयेऽपि चेति विश्वः । स्थेयसीं स्थिरतरां अचपलां दृढीयसीं च । स्थिरस्फादीयसुनि प्रियस्थिरेत्यादिना स्थादेशः । धियं खट्वयन्ति खट्वां पर्यङ्कं कुर्वन्त्याश्रयन्तीत्यर्थः । शयनं मञ्च

सोपधानान्धियन्धीराः स्थेयसीं खट्वयन्ति ये।
तत्रानिशं निषण्णास्ते जानते जातु न श्रमम् ॥७७॥
स्पृशन्ति शरवत्तीक्ष्णास्तोकमन्तर्विशन्ति च।
बहुस्पृशापि स्थूलेन स्थीयते बहिरश्मवत् ॥ ७८ ॥

पर्य्यङ्कपल्यङ्काः खट्वया समाः इत्यमरः। तत्करोति तदाचष्टइति णिच्। धीरास्तत्र धीखट्वायामनिशं अश्रान्तं निषण्णाः विश्रान्ताः सन्तोजातु कदाचिदपि श्रमं खेदं न जानते न विदन्ति। श्रमः खेदोरत्यादेरिति लक्षणं। धीपूर्व्वकएवोत्साहः सेव्योन केवलइति सर्व्वथा धीराश्रयणीयेत्यर्थः। अत्र धियत्रारोप्य माणायाः प्रकृतश्रमापनोदरूपोपकारपर्य्यन्ततया परिणामालङ्कारः। आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामइति लक्षणात् ॥ ७७ ॥

अथ प्राज्ञाप्राज्ञयोर्द्वाभ्यां वैषम्यमाह। स्पृशन्तीति। तीक्ष्णाः निशिताः प्राज्ञाः शरवच्छरेण तुल्यं स्तोकमल्पमेव स्पृशन्ति अन्तः कार्य्यस्य चान्तरं विशन्ति अल्पायासेन बहुकार्य्यं साधयन्ती त्यर्थः। बहुस्पृशा व्यापिना स्थूलेन मन्देन बृहता चाश्मना उपलेन तुल्यमश्मवत्। तेन तुल्यं क्रिया चेद्वतिः। बहिरेव कार्य्यस्या कार्य्यस्य चेति भावः स्थीयते स्थितिः क्रियते। मूढोहि अल्पस्य हेतो बहुप्रयासं करोति मूषकग्रहणाय शिखरिखननं परिहासास्पदं भवतीति भावः। तद्धितगतेयमुपमा ॥ ७८ ॥

आरभन्तइति। किञ्चाज्ञाअल्पं तुच्छमेवारभन्ते प्रक्रमन्ते काममत्यन्तं व्यग्राः त्वरितास्च भवन्ति न च पारकुर्वन्तीति

आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च ।
महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥७९॥
उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः ।
हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान् ॥८०॥

भावः । कृतधियः शिक्षितबुद्धयस्तु महारम्भा महोद्योगा भवन्ति निराकुला अव्यग्राश्च भवन्ति पारङ्गच्छन्तीति भावः ॥ ७९ ॥

अथ प्रज्ञावानपि न प्रमाद्येदित्याह । उपायमिति । उपायमास्थितस्य प्राप्तस्यापि उपायेनैव कार्य्यं साधयतोऽपीत्यर्थः । किमुत व्यग्रतयेति भावः । प्रमाद्यतोऽनवधानस्य । प्रमादोऽनवधानतेत्यमरः । अर्थाः प्रयोजनानि नश्यन्ति । तथा हि शयालुर्निद्रालुः । आलुचि शीङो वक्तव्यत्वादालुच् । मृगान् यातीति मृगयुर्व्याधः । मृगय्वादयश्चेत्यौणादिकः कुप्रत्ययान्तो निपातः । व्याधो मृगवधाजीवो मृगयुर्लुब्धकश्च सइत्यमरः । उपशेरतेऽस्मिन्नित्युपशयो मृगमार्गस्थायिनो व्याधस्यात्मगुप्तिस्थानं गर्त्तविशेषः । एरजित्यच् प्रत्ययः । तत्र तिष्ठतीत्युपशयस्थोऽपि मृगान् न हन्ति विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८० ॥

एवं प्रज्ञाया आवश्यकत्वमुक्तं तथोत्साहस्याप्याह । उदेतुमिति । जेतुमिच्छुर्जिगीषुरेक एव द्वादशस्वपि राजसु मध्ये द्वादशस्वादित्येषु दिनकृद्दिनकरणे व्याप्रियमाण आदित्यः स इवेहामुत्साहमत्यजन् प्रयुञ्जान एव न तु निरुद्योग इति भावः उदेतुं कल्पते उदयाय प्रभवति उत्साहशक्तिरेव प्रभुशक्तेरपि मूलमित्यर्थः । नानालिङ्गत्वादृतूनां नानासूर्य्यत्वमिति श्रुतेः प्रतिमासमादित्य

उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि ।
जिगीषुरेको दिनकृदादित्येष्विव कल्पते ॥ ८१ ॥
बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकञ्चुकः ।
चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ॥ ८२ ॥

भेदात् द्वादशत्वं तच्चैकस्यैव द्वादशात्मकत्वं द्वादशात्मा दिवाकर इत्यभिधानात्। ते चार्य्यमादयः पुराणोक्ता द्रष्टव्याः। राजानस्तु अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परं। तथारिमित्रमित्रं च विजिगीषोः पुरस्सराः। पञ्चेति शेषः। पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरं। आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः। पार्ष्णिग्राहासार आक्रन्दासारश्चेत्यर्थः। अत्र चत्वार इति शेषः। एवं नव भवन्ति विजिगीषुर्दशमः। अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः। अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वधे। मण्डलाद्बहिरेतेषामुदासीनो बलाधिक इति मध्यमोदासीनाभ्यां सह द्वादश वेदितव्याः। पूर्णोपमा ॥ ८१ ॥

उपायमास्थितस्येत्यत्र राजा न प्रमाद्येदित्युक्तं अप्रमादप्रकारमाह। बुद्धिशस्त्र इति। बुद्धिरेव शस्त्रं यस्य स बुद्धिशस्त्रः अमोघपातित्वात्तस्या इति भावः। प्रकृतयः स्वाम्यादिराज्याङ्गानि। राज्याङ्गानि प्रकृतय इत्यमरः। ता एवाङ्गानि यस्य सः तद्वैकल्ये राज्ञो वैकल्यं स्यादिति भावः। घना दुर्भेदा संवृतिर्मन्त्रगुप्तिरेव कञ्चुकः कवचो यस्य स तथोक्तः मन्त्रभेदे राज्यभेदादिति भावः। चरतीति चरः। पचाद्यच्। स एव चारो गूढपुरुषः। प्रज्ञादित्वात् स्वार्थिकोऽण् प्रत्ययः। चारश्च गूढपुरुष इत्यमरः। स एवेक्षणं चक्षुर्यस्य स

तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः ।
नैकमोजः प्रसादो वा रसभावविदः कवेः ॥ ८३ ॥

चारेक्षणः अन्यथा स्वपरमण्डलवृत्तान्तादर्शनादन्धस्येवान्धस्यास्य विनिपातः पदे पदे इति भावः । दूतः सन्देशहरः । स्यात्सन्देशहरोदूतइत्यमरः । सएव मुखं वाग्व्यापारो यस्य स दूतमुखः अन्यथा मूकस्येव वाग्व्यवहारासिद्धौ तत्साध्यासाध्यकार्य्यप्रतिबन्धः स्यादिति भावः एवम्भूतः पार्थिवः कोऽपि पुरुषः अन्यएवायं लोकविलक्षणः पुमानित्यर्थः अतोराज्ञा बुद्ध्यादिसम्पन्नेन भवितव्यं । एतदेवास्य मत्तत्वं अन्यथा स्वरूपहानिः स्यादिति भावः । अत्र कोऽपीति लोकसम्बन्धेऽपि तदसम्बन्धोक्त्या तद्रूपातिशयोक्तिः । सा च बुद्धिशस्त्रइत्यादिरूपकनिर्व्यूढेति तेन सहाङ्गाङ्गिभावेन सङ्करः ॥ ८२ ॥

चतुर्थोपायसाध्यइत्यादिना यत् क्षात्रमेव कर्त्तव्यमुक्तं तत्रोत्तरमाह । तेजइति । कालं जानातीति कालज्ञः तस्य अर्थकालइति विदुषइत्यर्थः । आतोऽनुपसर्गे कः नलिगुपधेत्यादिना कविधिः समासे कर्म्मोपपदस्येव बलवत्त्वभाषणात् । तस्य महीपतेस्तेजः क्षात्रमेवेति वा क्षमैव वा एकान्तं नियमोनास्ति किन्तु यथाकालमुभयमप्याश्रयणीयमित्यर्थः । तथा हि रसान् शृङ्गारादीन् भावान् निर्वेदादींश्च वेत्ति यस्तस्य रसभावविदः भावग्रहणं सम्पातायातं । कवेः कवितुरेकं केवलमोजः प्रौढप्रबन्धत्वं वा एकः प्रसादः सुकुमारप्रबन्धत्वं वा न किं तु तत्र हि रसानुगुण्येन यथायोग्यमुभयमप्युपादेयम् । दृष्टान्तालङ्कारः ॥ ८३ ॥

कृतापचारोऽपि परैरनाविष्कृतविक्रियः ।
असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा ॥८४॥
मृदुव्यवहितं तेजो भोक्तुमर्थान् प्रकल्पते ।
प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया ॥८५॥

यदुक्तं क्रियासमभिहारेण विराध्यन्तं क्षमेत कः इति तत्रोत्तरमाह । कृतापचार इति । परैः शत्रुभिः कृतः अपचारोऽपथ्यं च यस्य सः तथापि अनाविष्कृतविक्रियः अन्तर्गूढविकारः अतएवासाध्योऽप्रतिसमाधेयः सन् गदो यथा रोग इव । इववद्वा यथा शब्द इति दण्डी । काले बलक्षयावसरे प्राप्ते सति कोपं कुरुते प्रकुप्यतीत्यर्थः । तदुक्तं वहेदमित्रं स्कन्धेन यावत्कालविपर्य्ययः । तमेव चागते काले भिन्द्याद्घटमिवाश्मनेति ॥ ८४ ॥

इतश्च क्षन्तव्यमिदानीमित्याह । मृद्विति । मृदुना मृदुवस्तुना व्यवहितमन्तर्हितं तेजः अर्थान् भोक्तुं प्रकल्पते प्रभवति । तथाहि प्रदीपोऽभ्यन्तरस्थया मध्यस्थया दशया वर्त्या । दशा वर्त्ताववस्थायां स्नेहस्तैलादिके रस इति विश्वः । स्नेहं तैलादिकमथ मादत्ते अन्यथा स्वयमेव निर्व्वायादिति ततः क्षान्तिपूर्व्वमेव क्षात्रं फलतीति सर्व्वथा प्रथमं क्षन्तव्यमिति भावः विशेषणसामान्य समर्थनादर्थान्तरन्यासः ॥ ८५ ॥

तर्हि पौरुषं मा भूदित्थं क्षममाणस्य दैवमेव श्रेयोविधास्यतीत्याशङ्क्याह । नालम्बत इति । विद्वानभिज्ञः दिष्टे मतिर्यस्येति दैष्टिकः दैवप्रमाणक इत्यर्थः । दैवं दिष्टं भागधेयमित्यमरः । अस्ति नास्ति दिष्टं मतिरिति ठक् । तज्ज्ञात्वं दैष्टिकतामेव नालम्बते

नालम्बते दैष्टिकतां न निषीदति पौरुषे ।
शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥ ८६ ॥
स्थायिनोऽर्थे प्रवर्त्तन्ते भावाः सञ्चारिणो यथा ।
रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥ ८७ ॥

सर्व्वथा यत्नविघ्नस्य विनाशादिति भावः । तथा पौरुषे केवलपुरुषकारेऽपि । युवादित्वादण्प्रत्ययः । न निषीदति न तिष्ठति दैवप्रातिकूल्ये तस्य वैफल्यादिति भावः । किन्तु सत्कविः सत्कविता शब्दार्थाविव । तयोः काव्यशरीरत्वादिति भावः । यथाह वामनः । अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यमिति । द्वयं पौरुषं दैवं चापेक्षते अतः पौरुषमप्यावश्यकं किन्तु काले कर्त्तव्यमिति विशेषः । पौरुषादृष्टयोः परस्परसापेक्षत्वादिति भावः ॥ ८६ ॥

अथ शान्तेः फलमाह । स्थायिन इति । रस्यते स्वाद्यते इति रसः शृङ्गारादिः । रसतेः स्वादनार्थत्वाद्रस्यन्त इति ते रसा इति निर्वचनात् । तस्य रसस्य रसीभवतः स्थायिभावस्य रत्यादेः । रतिर्हासश्च क्रोधश्च शोकोत्साहभयानि च । जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्त्तिता इत्युक्तत्वात् एकस्यैवार्थे स्वादभावरूपे प्रयोजने भूयांसः सञ्चारिणो व्यभिचारिणो भावा निर्वेदादयः विभावादीनामुपलक्षणमेतत् यथा प्रवर्त्तन्ते । तदुक्तं विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । आनीयमानः स्वादुत्वं स्थायिभावो रसः स्मृत इति । तथा स्थायिनः स्थिरस्य क्षाम्या कालं प्रतीक्षमाणस्येत्यर्थः एकस्यैव नेतुर्विजिगीषोर्नायकस्यार्थे प्रयोजने भूयांसो महीभृतो राजानः प्रवर्त्तन्ते स्वयमेवास्य कार्य्यं

तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता ।
सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः ॥ ८८ ॥
करप्रचेयामुत्तुङ्गः प्रभुशक्तिं प्रथीयसीम् ।
प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः ॥ ८९ ॥

साधयन्तीत्यर्थः । ततः चन्तव्यमिति भावः । केचित्तु भावपदस्यापि रसपरत्वमाश्रित्य यथा सञ्चारिणः प्रसङ्गादागन्तुकाः अन्ये रसाः स्थायिनः स्थिरस्यैकस्य मुख्यस्यार्थे प्रवर्त्तन्ते । यथा स्मिन्नेव काव्ये वीरस्य शृङ्गारादयइति व्याचक्षते । उपमालङ्कारः ॥ ८७ ॥

चान्तिपक्षएव गुणान्तरमाह । तन्त्रेति । तन्त्रावापौ स्वपरराष्ट्रचिन्तनं अन्यत्र तन्त्रावापं शास्त्रौषधप्रयोगञ्च वेत्ति यस्तेन तन्त्रावापविदा । तन्त्रः स्वराष्ट्रचिन्तायामावापः परचिन्तने शास्त्रौषधान्तमुख्येषु तन्त्रमिति वैजयन्ती । योगैः सामाद्युपायैः अन्यत्र देवताध्यानैश्च । योगः संहननोपायध्यानसङ्गतियुक्तिष्वित्यमरः । मण्डलानि स्वपरराष्ट्राणि माहेन्द्रादिदेवतायतनानि च अधितिष्ठता अतिक्रमता नरेन्द्रेण राज्ञा विषवैद्येन च । नरेन्द्रोवार्त्तिके राज्ञि विषवैद्ये च कथ्यतइति विश्वः । शत्रवः फणीन्द्राइव सुनिग्रहाः सुखेन निग्राह्याः । एवञ्च प्रकृताप्रकृतविषयः श्लेषः । उपमैवेति केचित् ॥ ८८ ॥

प्रज्ञोत्साहावतः स्वामीत्यत्रैव ताविव प्रभुशक्तेर्मूलमित्युक्तन्तदेव व्यनक्ति । करेति । उत्तुङ्गोमहोन्नतः प्रज्ञाबलं मन्त्रशक्तिरेव बृहत्प्रधानं मूलं यस्य सः उत्साहएव पादपः करेण बलिना

अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः ।
विजिगीषोर्नृपतयः प्रयान्ति परिवारताम् ॥ ९० ॥
अप्यनारभमाणस्य विभोरुत्पादिताः परैः ।
व्रजन्ति गुणतामर्थाः शब्दाइव विहायसः ॥९१॥

प्रत्येयां वर्द्धनीयां हस्तग्राह्यां च । बलिहस्तांशवः कराइत्यमरः । प्रथीयसीं पृथुतरां । रऋतोर्हलादेरिति रेफादेशः । प्रभुशक्तिं तेजोविशेषम् । स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजमित्यमरः । फलति प्रसूतइत्यर्थः । फलनिष्पत्तौ मन्त्रपूर्व्वकएवोत्साहः स्यात् विपरीतस्तु छिन्नमूलोवृक्षइव शुष्यतीति भावः । रूपकालङ्कारः ॥ ८९ ॥

विमृष्यकारिणस्तु विश्वमपि विधेयं स्यादिति श्लोकद्वयेनाह । अनल्पत्वादिति । अनल्पत्वात्प्रज्ञोत्साहाधिकत्वादतएव प्रधानत्वान्मण्डलाभिज्ञत्वादन्यत्रानल्पत्वादुच्चैस्स्वरत्वात् प्रधानत्वान्नायकस्वरत्वाच्च वंशस्य वंशवाद्यस्वरस्य इतरे स्वरावीणागानादिशब्दाइव । अथवा आश्रयत्वाद्वंशइव वंशस्तत्कालविहितः स्वर उच्यते तस्य स्वरस्येतराः षड्जादयः विजिगीषोर्नृपतयः अन्ये मण्डलपरिवर्त्तिनोराजानः परिवारतां पोष्यतां प्रयान्ति तत्कार्य्यमेव साधयन्तीत्यर्थः । तस्माद्विमृष्य कर्त्तव्यमित्यर्थः ॥ ९० ॥

अपीति । किञ्च अनारभमाणस्य स्वयमकिञ्चित्कुर्वाणस्यापि विभोः प्रभोः व्यापकस्य च परैरन्यैर्नृपतिभिः शङ्खभेर्य्यादिभिश्च उत्पादिताः सम्पादिताः जनितास्वार्थाः प्रयोजनानि विहायसः आकाशस्य शब्दाइव गुणतां विशेषणतां कारणता

यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः ।
एकार्थतन्तुप्रोतायां नायको नायकायते ॥ ९२ ॥

गुणत्वं व्रजन्ति । शक्तोहि राजा स्वयं उदासीनएवा काशवत् स्वमहिम्नैव कार्य्यदेशं व्याप्नुवन् शब्दानिव सर्व्वार्थानपि स्वकीयतां नयतीत्यर्थः । गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्य तन्तुष्विति वैजयन्ती ॥ ९१ ॥

यातव्येति । किञ्च एकार्थएकप्रयोजनं सएव तन्तुः सूत्रं तत्र प्रोतायां एकाभीष्टाभिलाषिण्यामित्यर्थः । प्रपूर्व्वादेञः कर्म्मणि क्तः वचिस्वपीत्यादिना सम्प्रसारणं । यातव्योऽभि षेणयितव्यः अरिः पार्ष्णिङ्गृह्णातीति पार्ष्णिग्राहः पृष्ठानुधावी। कर्म्म ण्यण् । तावादी येषान्ते पूर्व्वोक्ताः पङ्क्तिशः स्थिताः तएव माला रत्नमालिका तस्यामधिकद्युतिर्महातेजाः नायकः शक्तिसम्पन्नो जिगीषुर्नायकायते मध्यमणिरिवाचरति स्वयमेव सर्व्वोत्कर्षेण वर्त्तते इत्यर्थः । तस्माद्विग्रहस्य कर्त्तव्यमिति भावः । नायको नेतरि श्रेष्ठे हारमध्यमणावपीति विश्वः। उपमानादाचारइति क्यच् अकृत्सार्व्वधातुकेति दीर्घः । नायकायते इत्युपमा अन्यथा नुशासनविरोधात् एकार्थतन्त्वित्यत्र तु रूपकमधिष्ठानतिरो धानेन आरोप्यमाणतन्तुत्वस्यैवोद्भटत्वात् प्रोतत्वसिद्धेस्तदेव युक्तम्। तद्वलात्पार्ष्णिग्राहादिमालायामित्यत्रापि रूपकमेव । तदनु प्राणिता चेयमुपमेत्यङ्गाङ्गिभावेन तयोः सङ्करः ॥ ९२ ॥

अथ विग्रहकरणप्रकारमाह । षाड्गुण्यमिति । शक्ति प्रभावादित्रयं बलं चापेक्षते इति शक्त्यपेक्षः सन्। पचाद्यच् ।

षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षं रसायनम्।
भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च ॥९३ ॥
स्थाने शमवतां शक्त्या व्यायामे वृद्धिरङ्गिनाम्।
अयथाबलमारम्भो निदानं क्षयसम्पदः ॥ ९४ ॥

शक्तिर्बले प्रभावाद्याविति विश्वः। षड्गुणा एव षाड्गुण्यं सन्धिविग्रहादिषट्कं। चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्रत्ययः। तदेव रसायनमौषधविशेषमुपयुञ्जीत सेवेत। रसायनं विहङ्गेऽपि जराव्याधिभिदौषधइति विश्वः। एवं सत्यस्य प्रयोक्तुरङ्गानि स्वाम्यादीनि गात्राणि च स्थास्नूनि स्थिराणि कालान्तरक्षमाणीत्यर्थः। ग्लाजिस्थश्चेति ग्स्नुः। बलवन्ति च परपीडाक्षमाणि च भवन्ति। श्लिष्टपरम्परितरूपकं ॥ ९३ ॥

स्थाने इति। किञ्च स्थाने शक्यविषये शमवतां क्षमावतामङ्गिनां सप्ताङ्गिनां राज्ञां शरीरिणाञ्च शक्त्या प्रभावाद्यनुसारेण बलेन च व्यायामे व्यापारे षाड्गुण्यप्रयोगे गमनादौ च सतीत्यर्थः वृद्धिरुपचयः राज्यस्य शरीरस्य चेति भावः। विपक्षे बाधकमाह। अयथाबलं शक्त्यतिक्रमेण। यथासादृश्यइत्यव्ययीभावे नञ्समासः। आरम्भो व्यायामः क्षयसम्पदोऽत्यन्तक्षयस्य निदानमादिकारणं अङ्गानामिति भावः। तस्मादस्माकमकस्मात्त्वैद्यास्कन्दनमश्रेयस्करमिति भावः। अत्र विशेषस्यापि श्लिष्टत्वात् शब्दशक्तिमूलो वस्तुना वस्तुध्वनिः। अतोद्यायामङ्गिनामौषधस्य गम्यते इति सङ्क्षेपः ॥ ९४ ॥

तदीशितारं चेदीनां भवांस्तमवमंस्त मा ।
निहन्त्यरीनेकपदे य उदात्तः स्वरानिव ॥ ९५ ॥
मा वेदि यदसावेको जेतव्यश्चेदिराडिति ।
राजयक्ष्मेव रोगाणां समूहस्स महीभृताम् ॥ ९६ ॥

फलितमाह । तदिति । तत्तस्मादुक्तार्थकार्य्यत्वात्तं चेदीनामीशितारं शिशुपालं भवान् मावमंस्त मावमन्यस्व । मन्यतेर्माङि लुङ् अनुदात्तत्वान्नेडागमः । कुतो यस्त्वैद्यः उदात्तः स्वरान् अनुदात्तानिवारीनेकपदे एकस्मिन्पदन्यासे सुप्तिङन्त लक्षणे च निहन्ति हिनस्ति नीचैः करोति च अतिशूरत्वात् अनुदात्तं पदमेकवर्जमिति परिभाषाबलाच्चेति भावः ॥ ९५ ॥

न चायमेकाकी किं नः करिष्यतीति मन्तव्यमित्याह । मा वेदीति । असौ चेदिराट् एकः एकाकी अतो जेतव्यः सुजय इति मा वेदि मा ज्ञायि । वेत्तेः कर्म्मणि माङि लुङ् । यद्यस्मात्स चेदिराट् राज्ञश्चन्द्रस्य यक्ष्मा राजा चासौ यक्ष्मेति वा राजयक्ष्मा क्षयरोगो रोगाणामिव महीभृतां समूहः समष्टिरूपः । तथाह वाग्भटः । अनेकरोगानुगतो बहुरोगपुरःसरः । राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः । नक्षत्राणां द्विजानां च राज्ञोभूद्यदयं पुरा । यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मत इति । अतो दुर्जेय इति भावः । एतेन चिरस्य मित्रव्यसनी सुदमोदमघोषज इति निरस्तम् ॥ ९६ ॥

अथास्य सर्व्वराजसमष्टितामेव द्वाभ्यां व्याचष्टे । सम्पादितेति । सम्पादितं फलं आभीषणारं च यस्य सः । फलं लाभशरायो

सम्पादितफलस्तेन सपक्षः परभेदनः ।
कार्मुकेणेव गुणिना बाणस्सन्धानमेष्यति ॥ ९७ ॥
ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयः ।
तमःस्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ॥ ९८ ॥

रिति शाश्वतः । सपक्षः ससुहृत्कङ्कादिपत्रयुतश्च परेषाम्भेदकः शत्रुविदारणः बाणोबाणासुरः शरश्च । गुणिना शौर्यादिगुणवता अधिज्येन च तेन चैद्येन कर्मणे प्रभवतीति कार्मुकं । कर्मण उकञ् । तेनैव सन्धानं सन्धिमेष्यति अतोनैकाकीति भावः । अत्राप्युपमा श्लेषोवा मतभेदात् ॥ ९७ ॥

ये चेति । ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयोराजानः तमःस्वभावाः तमोगुणात्मकाः अतएव तेऽपि प्रदोषं प्रकृष्टदोषं । प्रदोषोदुष्टरात्र्यंशाविति वैजयन्ती । तामसमेवेनं चैद्यमनुयायिनः अनुयास्यन्ति साहाय्यादिति भावः । भविष्यति गम्यादय इति णिनिर्भविष्यदर्थे अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रतिषेधात् द्वितीया । यथा ध्वान्तं रजनीमुखमनुयाति तद्वत् इति वस्तुना अलङ्कारध्वनिः ॥ ९८ ॥

ननु बाणादयोऽस्माभिः कृतसन्धानादिदानीम् विराध्यन्तीत्यत आह । उपेति । तेन चैद्येन कृतोऽल्पोऽपि उपजापोभेदः । भेदोपजापावित्यमरः । तथ्याकोपवतस्तान् बाणादीन् अनिलः वायुः एधांसिइन्धनानीव । काष्ठं दार्विन्धनं त्वेधइध्ममेधः समित् स्त्रियामित्यमरः । आशु दीपयिता सद्यः प्रज्वलयिष्यति

उपजापः कृतस्तेन तानाकोपवतस्त्वयि।
आशु दीपयिताल्पोऽपि साग्नीनेधानिवानिलः॥९९॥
बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥ १०० ॥
तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः ।
अभियुक्तं त्वयैनं ते गन्तारस्त्वामतः परे ॥ १०१ ॥

दीपेर्ण्यन्तात्तृन् । अन्तर्वैराः संहिताश्चापदि सति रन्ध्रे सद्यो विश्लिष्यन्तीति भावः ॥ ९९ ॥

ततः किमतआह। बृहदिति । बृहत्सहायोमहासहायवान् क्षोदीयान् क्षुद्रतरोऽपि । स्थूलदूरेत्यादिना यणादिपरलोपः पूर्व्वगुणश्च। कार्य्यस्यान्तं पारङ्गच्छति। तथा हि अपां समूहआपं। तस्य समूहइत्यण् । तेन गच्छतीत्यापगा नगापगा गिरिनदी महानद्या गङ्गादिकया सम्भूय मिलित्वा अम्भोधिमभ्येति । क्षुद्रोऽप्येवं तादृक् महावीरश्चैद्यस्तु किमु वक्तव्यइत्यपिशब्दार्थः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ १०० ॥

किञ्च न केवलं शत्रोरसाध्यत्वं मित्रविरोधस्त्वधिकोऽनर्थकर इत्याह। तस्येत्यादिद्वयेन। ये च तस्य चैद्यस्य मित्राणि नृपा ये च ते तवामित्रान्नृपाः ते उभये त्वयाभियुक्तमभियातमेनं चैद्यं गन्तारो गमिष्यन्ति । गमेः कर्त्तरि लुट् । अतः परे उक्तो भयव्यतिरिक्तास्तव मित्राणि तस्यामित्राइत्यर्थः त्वां गन्तारः ॥ १०१ ॥

मखविघ्नाय सकलमित्थमुत्थाप्य राजकम् ।
हन्त जातमजातारेः प्रथमेन त्वयारिणा ॥ १०२ ॥
सम्भाव्य त्वामतिभरक्षमस्कन्धं स बान्धवः ।
सहायमध्वरधुरां धर्मराजो विवक्षते ॥ १०३ ॥

ततः किमत आह । मखेति । इत्थमनेन प्रकारेण । इदमस्थमुरिति थमुप्रत्ययः । मखविघ्नाय मखविघाताय सकलं राजकं राजसमूहं । गोत्रोक्षेत्यादिना वुञ् । उत्थाप्य क्षोभयित्वा हन्त इति खेदे अजातारेः अजातशत्रोर्युधिष्ठिरस्य त्वया प्रथमेनारिणा जातमजनि । नपुंसके भावे क्तः ॥ १०२ ॥

अस्तु सोऽपि शत्रुः कोदोषस्तत्राह । सम्भाव्येति । बन्धुरेव बान्धवः स धर्मराजः अतिभरस्य क्षमः स्कन्धोयस्य स तं त्वां सहायं सम्भाव्याभिसन्धाय अध्वरस्य धुरमध्वरधुरां । ऋक्पूरित्यादिना समासान्तोऽप्रत्ययः । समासान्तानां प्रकृतिलिङ्गत्वात्तत्पुरुषे परवल्लिङ्गत्वे टाप् । विवक्षते वोढुमिच्छति । वहतेः स्वरितेतः सन्नन्ताल्लट् । तथा हि विरोधे विश्वासघातोबन्धुद्रोहश्च स्यातामिति भावः ॥ १०३ ॥

ननु प्रतिश्रुत्याकरणे दोषः प्रागेव परिहारे तु कोदोष इत्यत आह । महात्मानइति । महात्मानोभजमानान् शरणागतान् रिपूनप्यनुगृह्णन्ति किमुत बन्धूनिति भावः । अर्थान्तरन्यस्यति । सिन्धवोमहानद्यः समानएकः पतिर्यासां ताः सपत्नीः । नित्यं सपत्न्यादिष्विति ङीप् नकारस्य । नगनिम्नगाः गिरिनिर्झरिणीः

महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि ।
सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः ॥१०४॥

चिरादपि बलात्कारो बलिनः सिद्धयेऽरिषु ।
छन्दानुवृत्तिदुःसाध्याः सुहृदो विमनीकृताः ॥१०५॥

अब्धिं प्रापयन्ति सौभाग्यं ताभ्यः प्रयच्छन्तीति भावः । अतः परिहारोऽप्यनर्थ इति भावः ॥ १०४ ॥

तर्हि मम्प्रत्युपेक्षायामपि पश्चात्प्रार्थनया पार्थमार्जवयेयमित्यत आह । चिरादिति । बलिनः स्वयं बलवतोऽप्यरिषु विषये बलात्कारो हठः चिराच्चिरकालेनापि सद्यो मा भूदिति भावः सिद्धये वशंवदत्वसिद्धये भवतीति शेषः । अविमनसो विमनसः सम्पद्यमानाः कृता विमनीकृताः वैमनस्यं प्रापिता इत्यर्थः । अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्चेति च्विप्रत्ययसलोपौ अस्य च्वाविती कारः । शोभनं हृदयं येषां ते सुहृदो मित्राणि तु । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः । छन्दस्याभिप्रायस्यानुवृत्त्या चित्तानुरोधेनापि दुःसाध्याः आर्जवयितुमशक्या इत्यर्थः । अभिप्रायश्छन्द आशय इत्यमरः । शनैः शत्रुर्दण्डेनापि वशो भवति मित्रं वैमनस्ये न साध्यापोति भावः ॥ १०५ ॥

ननु सुहृत्कार्य्यात् सुरकार्य्यं बलीय इत्यत्राह । मन्यसे इति । नाकिनां देवानां प्रीतयेऽरिवधः श्रेयान् प्रशस्ततरः । प्रशस्यस्य श्र इति आदेशः । इति मन्यसे चेत् तर्हि पुरोडाशभुजां हविर्भोजिनां अतएव नाकिनामिष्टमभीप्सितं कर्त्तुं । इषेः कर्म्मणि क्तः । इष्टं इष्टिः याग इति यावत् । यजेर्भावे क्तः वचिस्वपीत्यादिना

मन्यसेऽरिवधः श्रेयान् प्रीतये नाकिनामिति।
पुरोडाशभुजामिष्टमिष्टं कर्त्तुमलन्तराम् ॥१०६॥
अमृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति।
शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥१०७॥

सम्पादयितुं। अलन्तरामतिपर्याप्तम्। अव्ययात्तरप्प्रत्ययआम्वागमश्च। शत्रुबधादतिप्रियकरो याग एव नाकिनां भुक्ताऽपि शत्रुबधस्य सुकरत्वादिति भावः ॥ १०६ ॥

तथापि अमृताशिनामेषां देवानां किमेभिः पिष्टभक्षणप्रलोभनैरत आह। अमृतमिति। अमृतं नाम सन्तो विद्वांसः मन्त्रा एव जिह्वा येषां तेषु मन्त्रजिह्वेष्वग्निषु। मन्त्रजिह्वः सप्तजिह्वः सुजिह्वो हव्यवाहनइति वैजयन्ती। यत्पुरोडाशादिकं जुह्वति तदेवेति शेषः यत्तदोर्नित्यसम्बन्धात्। मन्दरएव क्षुब्धो मन्थनदण्डः। क्षुब्धस्वान्तेत्यादिनास्मिन्नर्थे निपातनात्सिद्धं। तेन क्षुभितस्य मथितस्य अम्भोधेर्वर्णना शोभैव अलङ्कारएव। अब्धिमन्थनेनामृतमुत्पादितमिति यतः कीर्त्तिमात्रं अतोऽन्नमेवामृतमिति भावः। वाक्यार्थयोर्हेतुहेतुमद्भावादवाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ १०७ ॥

याचायाः प्रतिबन्धः कश्चिद्दुस्तरस्तवास्तीत्याह। सहिष्यइति। प्रतीक्ष्यायै पूज्यायै। पूज्यः प्रतीक्ष्यइत्यमरः। पितृष्वस्रे पितृभगिन्यै। विभाषा स्वसृपत्योरिति विकल्पादलुगभावः। मातृपितृभ्यां स्वसेति षत्वं। ते तव सूनोः शतमागांस्यपराधान्। आगोऽपराधे। मन्तुश्चेत्यमरः। सहिष्ये वोढास्मि इति यत्त्वया प्रतिश्रुतं प्रतिज्ञातं

सह्यिष्ये शतमागांसि सूनोस्तइति यत्त्वया।
प्रतीक्ष्यन्तत्प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम्॥१०८॥
तीक्ष्णा नारुन्तुदा बुद्धिः कर्म्म शान्तं प्रतापवत्।
नोपतापि मनः सोष्म वागेका वाग्मिनस्सुतः॥१०९॥

तत्प्रतीक्ष्यं प्रतिपालनीयं अन्यथा महादोषस्मरणादिति भावः ॥ १०८ ॥

सत्यमस्ति प्रतिश्रुतं किन्त्वस्योन्मत्तवदौद्धत्यात्तदपि जिहासित मतश्राह। तीक्ष्णेति। सतः सत्पुरुषस्य बुद्धिस्तीक्ष्णा निशिता स्यादिति विद्धीत्यध्याहारः एवमुत्तरत्रापि तथाप्यरुन्तुदतीत्य रुन्तुदा शस्त्रवन्मर्म्मच्छेदिनी न भवेत्। अहिंसयैव परं पीडयेदित्यर्थः। कर्म्म व्यापारः प्रतापवत् तेजस्वि भयदं स्यात् तथापि शान्तं स्यात् न तु सिंहादिवत् हिंस्रं भवेदित्यर्थः। मन श्चित्तं सोष्म अभिमानोष्णं स्यात्तथापि उपतापयतीत्युपतापि अग्न्यादिवत् परसन्तापि न स्यात् वाग्मिनः वक्तुः वागेका एकरूपा स्यात् वाग्मी सत्यमेव वदेदित्यर्थः अतः सत्यसन्धस्य प्रतिश्रुतार्थहानिरनर्हेति भावः। अत्र प्रकृतायावाचोऽप्रकृतानां बुद्धिकर्म्ममनसां च तुल्यधर्म्मादौपम्यावगमाद्दीपकालङ्कारः। प्रकृता प्रकृतानां च साम्ये तु तुल्यधर्म्मतः। औपम्यङ्गम्यते यत्र दीपकं तन्निगद्यतइति लक्षणात्। बुद्ध्यादीनां शस्त्रादिव्यतिरेकोव्यज्यते ॥ १०९ ॥

अथकथाकाले चैद्यवधइत्याह। स्वयमिति। किञ्च अह्नो भानुमानिव स्वयं कृतः प्रसादोऽनुग्रहः प्रकाशश्च यस्य तस्य

स्वयङ्कृतप्रसादस्य तस्याह्नोभानुमानिव ।
समयावधिमप्राप्य नान्तायालम्भवानपि ॥ ११०॥
कृत्वा कृत्यविदस्तीर्थैष्वन्तः प्रणिधयः पदम् ।
विदाङ्कुर्व्वन्तु महतस्तलं विद्विषदम्भसः ॥ १११ ॥

चैद्यस्यान्ताय समयावधिं नियतकालावसानं अप्राप्य भवानपि नालं शक्तोन तथा च त्वयाप कीर्त्तिरेवान्यत्र किञ्चित् फलं स्यादिति भावः ॥ ११० ॥

तर्हि किमयमुपेक्ष्यएव नेत्याह । कृत्वेति । किन्तु कृत्यविदः कार्य्यज्ञाः विधिज्ञास्च प्रणिधीयन्तइति प्रणिधयोगूढचारिणः । प्रणिधिर्गूढपुरुषइति हलायुधः । तदन्त्येभिरिति तीर्थानि मन्त्र्याद्यष्टादशस्थानानि जलावताराश्च । योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादिति हलायुधः । तेष्वन्तः पदं स्थानं पादप्रक्षेपं च कृत्वा महतोदुरवगाहस्य पूज्यस्य च विद्विषन् शत्रुरेवाम्भः तस्य तलं स्वरूपं प्रमाणमिति यावत् । अधःस्वरूपयोरस्त्री तलमित्यमरः । विदांकुर्वन्तु विदन्तु ! विद ज्ञाने लोट् । विदांकुर्वन्त्वित्यन्यतरस्यामिति विकल्पादाम्प्रत्ययनिपातः । अम्भसइव शत्रोः कृततीर्थस्य सुप्रवेशत्वात् प्रागन्तः प्रविश्य परीक्ष्यइत्यर्थः । श्लिष्टपरम्परितरूपकम् ॥ १११ ॥

आवश्यकं चैतदित्याह । अनुदिति । उत्सूत्रउत्क्रान्तोनीतिशास्त्रविरुद्धः पदन्यासः एकपदप्रक्षेपोऽपि स्वल्पव्यवहारोऽपीति यावत् स नास्ति यस्यां सा अनुत्सूत्रपदन्यासा नीतिपूर्व्वक

अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥११२॥

सर्व्वव्यवहारेत्यर्थः। अन्यत्रानुत्सूत्रपदन्यासा अनुत्सृष्टसूत्रा सरहस्युपसङ्ख्याननैरपेक्ष्येण सूत्राचरैरेव सर्व्वार्थप्रतिपादको न्यासोवृत्तिव्याख्यानग्रन्थविशेषो यस्यां सा तथोक्ता तथा सती यथार्थं कल्पनया शोभना वृत्तिर्भृत्यामात्यादीनामाजीविका यस्यां सा सद्वृत्तिः अन्यत्र सती वृत्तिः काशिकाख्यसूत्रव्याख्यानग्रन्थविशेषो यस्यां सा। वृत्तिर्ग्रन्थजीवनयोरिति वैजयन्ती। सन्ति निबन्धनानि अनुजीव्यादीनां क्रियावसानेषु दत्तानि गोहिरण्यादिशाश्वत पारितोषिकदानानि यस्यां सा एतच दत्वा भूमिनिबन्धनश्चेत्येतद्वचन व्याख्याने मिताक्षरायां द्रष्टव्यं। अन्यत्र सन्निबन्धनं भाष्यग्रन्थोयस्यां सा एवं भूतापि राजनीतिः राजवृत्तिः अपगतः स्पशः चारोयस्याः सा अपस्पशा चेत्। यथार्थवर्णे मन्त्रज्ञः स्पशोहरकउच्यतइति हलायुधः। अन्यत्र अविद्यमानः पस्पशः शास्त्रारम्भसमर्थक उपोद्घात सन्दर्भग्रन्थोयस्याः सा अपस्पशा शब्दविद्या व्याकरण विद्येव नो भाति न शोभते तस्माच्चारप्रेषणमावश्यकं तद्रहितस्य राज्ञोऽन्धप्रायत्वादिति भावः। अत्रापस्पशेत्यत्र जतुकाष्ठवच्छब्दयोरेव श्लिष्टत्वाच्छब्दश्लेषः सद्वृत्तिः सन्निबन्धनेत्यत्रैकवृन्तावलम्बिफलद्वयवदर्थश्लेषः। अनुत्सूत्रपदन्यासेत्यत्र तूभयसम्भवादुभय श्लेषः। शब्दविद्येवेति पूर्णोपमा व्यक्तैव तयोः सापेक्षत्वात्सङ्करः ॥ ११२ ॥

अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः ।
भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः ॥ ११३ ॥
उपेयिवांसि कर्त्तारः पुरीमाजातशात्रवीम् ।
राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ॥ ११४ ॥

न केवलञ्चारमुखेन वृत्तान्तज्ञानमपि तु उपजापश्च कर्त्तव्य इत्याह । अज्ञातेति । किञ्चाज्ञातदोषैः परैरज्ञातस्वकर्मभिर्दोषज्ञैः स्वयं परमर्म्मज्ञैः अभिव्यक्तानि भेद्यस्याग्रे प्रकटितानि शासनानि तदमात्याद्यविश्वासकराणि कूटलिखितानि येषान्तैः उभय वेतनैः उभयत्र भेद्ये स्वामिनि च वेतनं भृतिर्येषां तैः उभय जीविकाग्राहिभिः भेद्यनगरवास्तव्यैश्चरैरित्यर्थः । भृतयो भर्म्म वेतनमित्यमरः । शत्रोः सम्बन्धिनः समवायं समवयन्ति इति सामवायिकाः सङ्घमुख्याः सचिवादयः । समवायान्समवैतीति ठक् । उद्दूष्य द्विषामेते दत्तहस्ताः अस्माभिरेषां लिखितान्येव गृहीतानि इत्युच्चैर्दूषयित्वा भेद्याः विघट्टनीयाः ॥ ११३ ॥

उपेयिवांसीति । किञ्च उपायज्ञैः कार्य्यसाधनकुशलैः तव चरन्तीति चरैर्गूढचारिभिः । पचाद्यच् । एकार्थानि त्वया सहैकप्रयोजनानि राजन्यानां समूहाः राजन्यकानि । गोत्रोक्षेत्यादिना वुञ् । अजातशत्रोरिमामाजातशात्रवीं पुरीं इन्द्रप्रस्थमुपेयिवांसि प्राप्नुवन्ति । उपेयिवानित्यादिना क्वसुप्रत्ययान्तो निपातः । कर्त्तारः करिष्यन्ते । कृञः कर्म्मणि लुट् । इन्द्रप्रस्थेऽस्माकं महत्कार्य्यं भविष्यति तदध्वरयात्राव्याजेन सकलैरागन्तव्यमिति गूढं सन्दिश्य तत्र सर्व्वे मेलयितव्या इत्यर्थः ॥ ११४ ॥

सविशेषं सुते पाण्डोर्भक्तिम्भवति तन्वति ।
वैरायितारस्तरलाः स्वयन्मत्सरिणः परे ॥ ११५ ॥

यद्द्वात्मविदो विपक्षमध्ये
सह संवृद्धियुजोऽपि भूभुजः स्युः ।
बलिपुष्टकुलादिवान्यपुष्टैः
पृथगस्मादचिरेण भाविता तैः ॥ ११६ ॥

ननु तत्राध्वरकर्म्मणि कोयुद्धावकाश इत्याशङ्क्य तत्रैव महत्कलह बीजं सम्पादयति । सविशेषमिति । पाण्डोः सुते युधिष्ठिरे भवति पूज्ये त्वयि सविशेषं यथा तथा भक्तिं तन्वति सति तरलाश्चपला मत्सरिणो द्वेषवन्तः परे शत्रवः स्वयमेव वैरायितारः वैरं कर्त्तारः । शब्दवैरकलहेत्यादिना क्यङ् ततः कर्त्तरि लुट ॥ ११५ ॥

किन्तेऽपि सर्वे वैरायिष्यन्ते नेत्याह । यद्वेति । ये इह विपक्ष मध्ये शत्रुमध्ये सह संवृद्धियुजोऽपि चैद्येन सहैश्वर्ययुक्ता अपि । सत्सूद्विषेत्यादिना क्विप् । ये भूभुजो राजानः आत्मविदः स्वाभि जनवेदिनः स्युस्तैर्भूभुग्भिः बलिपुष्टकुलात् काककुलात् । काके तु करटारिष्टबलिपुष्टसकृत्प्रजा इत्यमरः । अन्यपुष्टैः परभृतैरिवा चिरेण सद्योऽस्मात् विपक्षमध्यात् । अन्यारादित्यत्रान्यशब्दस्यार्थ परत्वात्पृथगादिप्रयोगेऽपि पञ्चमी । पृथग्भाविता पृथग्भविष्यते । भावे लुट् । स्यसिच्सीयुट्तासिषु भावकर्मणोरित्यादिना चिण्वदिटि वृद्धिः । तेष्वपि केचिदस्माभिः सङ्गच्छन्ते इत्यर्थः । औपच्छन्दसिकं वृत्तं ॥ ११६ ॥

सहजचापलदोषसमुद्धत
स्खलितदुर्बलपक्षपरिग्रहः ।
तव दुरासदवीर्य्यविभावसौ
शलभतां लभतामसुहृद्गणः ॥ ११७ ॥

अथ फलितं निगमयन्नाशिषं प्रयुङ्क्ते । सहजेति । सहजं स्वाभाविकं चापलं दुर्विनीतत्वं अनवस्थितत्वं च । चपलः पारदे शीघ्रे दुर्विनीतेऽनवस्थितइति वैजयन्ती । तेनैव दोषेण समुद्धता दृप्ताः पक्षः सहायोगरुच । पक्षः पार्श्वगरुत्साध्यसहायबलभित्ति ष्विति वैजयन्ती । स्खलितोऽस्थिरोदुर्बलपक्षपरिग्रहोयस्य सः असुहृद्गणः शत्रुवर्गः तव दुरासदवीर्य्यविभावसौ दुस्सहतेजो वह्नौ । वीर्य्यं शुक्रे प्रभावे च तेजस्सामर्थ्ययोरपि । सूर्य्य वह्नी विभावसू इति विश्वामरौ । शलभतां पतङ्गत्वं । समौ पतङ्ग शलभावित्यमरः । भावे तल् । लभतां गच्छतु । रूपकालङ्कारः । द्रुतविलम्बितं वृत्तम् ॥ ११७ ॥

इतीति । स हरिः इत्थं विशकलितार्थां विवेचितार्थां अनुगत नयमार्गां नीतिमार्गानुसारिणीं दुर्नयस्य बलभद्राद्युक्तस्येत्यर्थः । अर्गलां निवारयित्रीं इति वैधर्म्यरूपकालङ्कारः । तद्विष्कम्भोऽर्गलं न नेत्यमरः । अतएव जनितमुदं हरेः कृतानन्दां उच्छ्रिते उन्नते उरःस्थले नियतं निषण्णया अविश्रान्तमाश्रितया श्रिया श्रुतां मान्य यति मन्त्रगुप्तिः उद्धवस्येमामौद्धवीं एनां पूर्व्वोक्तां वाचं शुश्रुवान् श्रुतवान् । भाषायां सदवसश्रुवइति क्वसुः । उच्चैरेवोच्चकैरुन्नतः सन् । अव्ययसर्व्वनाम्नामकच् प्राक् टेरित्यकच् प्रत्ययः । उदस्था

इति विशकलितार्थामौद्धवीं वाचमेना
मनुगतनयमार्गामर्गलां दुर्नयस्य।
जनितमुदमुदस्थादुच्चकैरुच्छ्रितोरः
स्थलनियतनिषण्णश्रीश्रुतां शुश्रुवान् सः॥११८॥
इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
द्वितीयः सर्गः॥ २ ॥

दासनादुत्थितवान्। उदोऽनूर्ध्वकर्मणि इत्यस्य प्रत्युदाहरणमेतत्। रूपकानुप्रासालङ्कारौ। मालिनी वृत्तम्॥ ११८॥

इति श्रीमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये द्वितीयः सर्गः॥ २ ॥

कौबेरदिग्भागमपास्य मार्ग-
मागस्त्यमुष्णांशुरिवावतीर्णः ।
अपेतयुद्धाभिनिवेशसौम्यो
हरिर्हरिप्रस्थमथ प्रतस्थे ॥ १ ॥

जगत्पवित्रैरपि तन्न पादै-
स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः ।
यतो बृहत्पार्वणचन्द्रचारु
तस्यातपत्रं बिभरांबभूवे ॥ २ ॥

कौबेरेति । अथोद्धववाक्यश्रवणानन्तरमपेतो युद्धे अभिनिवेश आग्रहो यस्य सः शान्तक्रोध इत्यर्थः अतएव सौम्यः प्रसन्नः अतएव कौबेर्या दिशो भागमुत्तरायणमित्यर्थः । स्त्रियाः पुंवदित्यादिना पुंवद्भावः । तमपास्यागस्त्यस्येममागस्त्यं मार्गमवतीर्णो दक्षिणायनगत इत्यर्थः उष्णांशुरिव स्थितः । अनेन हरेः क्रोधः कार्य्यवशादाकालमन्तःस्तम्भितो न लेकान्ततो निवृत्त इति सूचितं हरिः कृष्णः हरिप्रस्थमिन्द्रप्रस्थं प्रतस्थे प्रचचाल । इन्द्रोदुश्च्यवनो हरिरिति हलायुधः । समवप्रविभ्यः स्थ इत्यात्मनेपदम् । देशकालाध्वगन्तव्याः कर्म्मसंज्ञा ह्यकर्म्मणामिति गन्तव्यकर्म्मत्वम् । उपमालङ्कारः ॥ सर्गेऽस्मिन्निन्द्रोपेन्द्रवज्रामिश्रणादुपजातिवृत्तं । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति लक्षणात् ॥ १ ॥

अथास्य प्रस्थानसमये वर्णयन्नादौ छत्रधारणमाह । जगदिति । अर्को जगत्पूज्यं तं हरिं अतएव जगत्पवित्रैरपि पादै-

मृणालसूत्रामलमन्तरेण
स्थितश्चलच्चामरयोर्द्वयं सः।
भेजेऽभितः पातुकसिद्धसिन्धो
रभूतपूर्व्वां रुचमम्बुराशेः ॥ ३ ॥

अरुणैः किरणैश्च स्प्रष्टुं नायुज्यत नार्हत । युजेर्देवादिकात्कर्त्तरि लङ् । अतः तस्य हरेः वृहद्विपुलं पार्व्वणचन्द्रचारु पूर्णेन्दु सुन्दरमित्युपमालङ्कारः आतपात्त्रायतइत्यातपत्रं छत्रं । सुपीति योगविभागात् कः । बिभरांबभूवे दध्रे । भृञः कर्म्मणि लिट् भीह्रीभृहुवामिति विकल्पादाम्प्रत्ययः। आतपत्रान्तर्हितस्य इयैरपि पादैः स्प्रष्टुमशक्यत्वादित्यर्थः । जगत्पूज्यस्य हरेः पादेन स्पर्शनिषेधादिति भावः ॥ २ ॥

अथ चामरधारणमाह । मृणालेति । मृणालसूत्रामलं विमलन्तद्विशदमित्युपमा।चलन्ती च ते चामरे च चलच्चामरे योजना दिति भावः। तयोर्द्वयमन्तरेण स्थितः द्वयस्य मध्ये स्थितइत्यर्थः। अन्तरान्तरेण युक्तइति द्वितीया। स हरिरभितः पातुका उभयतः पातिनी सिद्धसिन्धुराकाशगङ्गा यस्य स तथोक्तः । पर्य्यभिभ्यां चेति तसिल्प्रत्ययः सर्व्वोभयार्थवर्त्तमानाभ्यामिष्यतइत्युभयार्थत्वं सुप्सुपेति समासः। पातुकेति लषपतेत्यादिना उकञ् प्रत्ययः। तस्याम्बुराशेः समुद्रस्य अभूतपूर्व्वां पूर्व्वमभूतां। सुप्सुपेति समासः। रुचं कान्तिं भेजे । अतएव निदर्शना सा चाम्बुराशेः सम्भावना मात्रोक्त्या अभितःपातुकसिद्धसिन्धुसम्बन्धमूलया असम्बन्धे सम्बन्ध रूपातिशयोक्त्या स्वोपजीवकसंयोगेन सङ्कीर्य्यतइति सङ्क्षेपः॥ ३ ॥

चित्राभिरस्योपरि मौलिभाजां
भाभिर्मणीनामनणीयसीभिः ।
अनेकधातुच्छुरिताश्मराशे
र्गोवर्द्धनस्याकृतिरन्वकारि ॥ ४ ॥

तस्योल्लसत्काञ्चनकुण्डलाग्र
प्रत्युप्तगारुत्मतरत्नभासा ।
अवाप बाल्योचितनीलकण्ठ
पिच्छावचूडाकलनामिवोरः ॥ ५ ॥

अथाष्टभिरस्य प्रसाधनविधिं वर्णयन् मुकुटधारणमाह । चित्राभिरिति । अस्य हरेरुपरि ऊर्ध्वदेशे मौलिभाग मौलिभाजां मुकुटगतानां मणीनामनणीयसीभिर्महतीभिश्चित्राभिरनेकवर्णाभिर्भाभिः प्रभाभिः कर्त्रीभिः । स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयइत्यमरः। सान्तपक्षे भोभगोइत्यादिना रोर्यकारे तस्य हलि सर्वेषामिति लोपः । अनेकैर्धातुभिर्गैरिकादिभिश्छुरितानां रूषितानां अश्मनां मणीनां राशिः समूहोयस्य तस्य गोवर्द्धनाख्यपर्वतस्याकृतिरन्वकारि अनुकृता तत्सादृश्यमभाजीत्यर्थः । पूर्वोपमेयम् ॥ ४ ॥

कुण्डले च धृते इत्याह । तस्येति । तस्य हरेरुरः उरस्थलमुल्लसन्त्या काञ्चनकुण्डलाग्रयोः प्रत्युप्तानां खचितानां गारुत्मतरत्नानां मरकतमणीनां भासा दीप्त्या उरसि प्रसरन्त्येति भावः । बाल्यं शैशवं । ब्राह्मणादित्वात् ष्यञ् । तत्रोचितमभ्यस्तं यन्नीलकण्ठपिच्छं मयूरबर्हम् । अभ्यस्तेऽप्युचितं न्याय्ये इति यादवः ।

तमङ्गदे मन्दरकूटकोटि
व्याघट्टनोत्तेजनया मणीनाम् ।
बंहीयसा दीप्तिवितानकेन
चकासयामासतुरुल्लसन्ती ॥ ६ ॥

पिच्छं बर्हे नपुंसके इत्यमरः । तेन निर्मितावचूडा मालिका तस्याः कलनामामोचनमवमोचनं वा अवापेवेत्युत्प्रेक्षा । यत्रान्यधर्मसम्बन्धादन्यदेवोपतर्कितं । प्रकृते हि भवेत्प्राज्ञास्तामुत्प्रेक्षां प्रचक्षत इति लक्षणात् ॥ ५ ॥

तमङ्गदे इति । तं हरिं मन्दरकूटकोटिव्याघट्टनं मन्दराचलशिखराग्रसङ्घर्षणं सैवोत्तेजना शाणोल्लेखना तया बंहीयसा बहुतरेण । प्रियस्थिरेत्यादिना बहुशब्दस्येयसुनि बंहादेशः । मणीनां दीप्तिवितानकेन प्रभापटलेन उल्लसन्ती दीप्यमाने । आच्छीनद्योर्नुमिति नुमागमः । अङ्गदे केयूरे । केयूरमङ्गदं तुल्ये इत्यमरः । चकासयामासतुः शोभयाञ्चक्रतुः अङ्गदे धृतवानित्यर्थः । चकास्तेर्ण्यन्ताल्लिटि आम्प्रत्यये ऽस्तेरनुप्रयोगः । अत्राङ्गदयोः प्राग्भवीयाङ्गदभेदेऽप्यभेदोक्तिमुत्प्रेक्ष्य तयोर्मन्दरकूटकोट्यसम्बन्धेऽपि सम्बन्धोक्त्या द्वयोरतिशयोक्त्योः सङ्करः ॥ ६ ॥

निसर्गेति । असौ हरिर्निसर्गरक्तैः स्वभावलोहितैः किञ्च वलये कटके । कटकं वलयोऽस्त्रियामित्यमरः । तयोरवलग्नानां प्रत्युप्तानां ताम्राश्मनां पद्मरागाणां रश्मिभिः स्फुरितैः अतएवाद्यापि मुरारेर्हिरण्यकशिपोः वक्षसो विक्षोभेण विदारणेन जाता या असृक् तया लपितैः सिक्तैरिव स्थितैरित्युत्प्रेक्षा । जाते

निसर्गरक्तैर्वलयावलम्ब
ताम्राश्मरश्मिच्छुरितैर्नखाग्रैः ।
व्यद्योततायापि सुरारिवक्षो
विक्षोभजासृक्स्नपितैरिवासौ ॥ ७ ॥

उभौ यदि व्योम्नि पृथक् प्रवाहा
वाकाशगङ्गापयसः पतेताम् ।
तेनोपमीयेत तमालनील
मामुक्तमुक्तालतमस्य वक्षः ॥ ८ ॥

पर्यन्तात् ताः अर्त्तिह्रीत्यादिना पुगागमः मितां ह्रस्वः । नखाग्रैर्व्यद्योतत । कटके च धृतवानित्यर्थः ॥ ७ ॥

उभाविति । तमालवन्नीलं आमुक्ते आसञ्जिते मुक्तालते लता दीर्घत्वसाम्येन मौक्तिकहारौ यस्मिन् तदस्य हरेर्वक्षः आकाशगङ्गायाः पयसः उभौ प्रवाहौ व्योम्नि यदि पृथक् पतेतां प्रवर्त्तेतां चेत् । सम्भावनायां लिङ् । तेन व्योम्नोपमीयेत समीक्रियेत नास्योपमानं किञ्चित्पश्याम इति भावः । मुक्ताहारं धृतवानित्यर्थः । अत्र व्योम्नि गङ्गाप्रवाहद्वयासम्बन्धेऽपि सम्भावनायां सम्बन्धकथनादतिशयोक्तिः । तदेतत् पुष्पं प्रवालोपहितं यदि स्यादित्याद्युदाहृत्यालङ्कार सर्व्वस्वकारः स्पष्टीचकार ॥ ८ ॥

तेनेति । तेन हरिणा दीधितिभिर्दीपिताः आशायेन सः दिगन्तविश्रान्ततेजा इत्यर्थः । पयोधेरम्भसां सारस्य विकारः सारमयः मणिः समुद्रमन्थनोत्थः कौस्तुभाख्य इत्यर्थः । इभे धतः

तेनाम्भसां सारमयः पयोधे
र्दध्रे मणिर्दीधितिदीपिताशः ।
अन्तर्वसन् विम्बगतस्तदङ्गे
साक्षादिवालक्ष्यत यत्र लोकः ॥ ९ ॥

मुक्तामयं सारसनावलम्बि
भाति स्म दामाप्रपदीनमस्य ।
अङ्गुष्ठनिष्ठ्यूतमिवोर्द्धमुच्चै
स्त्रिस्रोतसः सन्ततधारमम्भः ॥ १० ॥

धञ् धारणे कर्म्मणि लिट् । यत्र मणौ विम्बगतः प्रतिविम्बगतो लोकः वाह्यप्रपञ्चः तदङ्गे तस्य हरेः शरीरे साक्षात् वहिःप्रत्यक्षेण लक्ष्यमाण इत्यर्थः । अन्तर्वसन् अन्तर्गतो लोक इवा लक्ष्यत यच मणौ प्रतिविम्बितो वाह्यलोकः तदङ्ग एव नैर्म्मल्याद्बहिः प्रतिफलितः कुक्षिस्थलोक इवालक्ष्यत इत्युत्प्रेक्षा ॥ ९ ॥

मुक्तेति । अस्य हरेर्मुक्तामयं मुक्ताप्रचुरं । तत्प्रकृतवचने मयट् । सारसने कटिसूत्रेऽवलम्बते इति सारसनावलम्बि । क्लीवे सारसनं चाथ पुंस्कट्यां शृङ्खलं त्रिष्वित्यमरः । आप्रपदीनं आसमन्तात्प्रपदं प्राप्नोतीति खञ्प्रत्ययः । पादाग्रं प्रपदं पाद इत्यमरः । दाम मुक्ताहारः अङ्गुष्ठेन निष्ठ्यूतं विसृष्ट मित्यर्थः । गौणार्थत्वादग्राम्यत्वं यथाह दण्डी । निष्ठ्यूतोद्गीर्ण वान्तादि गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहत इति । ऊर्द्ध ऊर्द्धप्रवाहमुच्चैरुन्नतस्त्रिस्रोतसो मन्दाकिन्याः सन्ततधारमविच्छिन्नसम्पातमम्भ इव भाति स्मेत्युत्प्रेक्षा ॥ १० ॥

स इन्द्रनीलस्थलनीलमूर्त्ति
रराज कर्च्चूरपिशङ्गवासाः ।
विसृत्वरैरम्बुरुहां रजोभि
र्य्यमस्वसुश्चित्र इवोदभारः ॥ ११ ॥

प्रसाधितस्यास्य मधुद्विषोऽभू
दन्यैव लक्ष्मीरिति युक्तमेतत् ।
वपुष्यशेषेऽखिललोककान्ता
सानन्यकान्ता ह्युरसीतरा तु ॥ १२ ॥

स इति । इन्द्रनीलस्थलमिव नीलमूर्त्तिः श्यामाङ्गः । संहितायां रोरीति रेफलोपः ढ्रलोपे पूर्व्वस्येति दीर्घः । कर्च्चूरं हरितालमिव पिशङ्गं वासोयस्य सः पीताम्बरोहरिः । हरितालन्तु कर्च्चूरमिति वैजयन्ती । स हरिर्विसृत्वरैः विसृमरैः । इण्नशजिसर्त्तिभ्यः क्करप् । अम्बुरुहां अम्बुजानां । रुहेः क्विप् । रजोभिः परागैश्चित्रश्चित्रवर्णः यमस्वसुर्यमुनायाः उदकस्य भारः पूरः उदभारः स इव रराज । मन्थोदनेत्यादिना उदकस्योदादेशः ॥ ११ ॥

प्रसाधितस्येति । प्रसाधितस्यालङ्कृतस्यास्य मधुद्विषः हरेः अन्यैवा सदृशी विभिन्ना च । अन्यौ विभिन्नासदृशाविति वैजयन्ती । लक्ष्मीः शोभा पद्मा च । शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरपि गद्यते इति विश्वः । अभूदित्येतद्युक्तं । कुतः हि यस्मात् सा प्रसाधनरूपा लक्ष्मीरशेषे वपुषि वसतीति शेषः । किञ्चाखिललोकस्य

कपाटविस्तीर्णमनोरमोरः
स्थलस्थितश्रीललनस्य तस्य।
आनन्दिताशेषजना बभूव
सर्व्वाङ्गसङ्गिन्यपरैव लक्ष्मीः॥ १२ ॥

कान्ता प्रिया इतरा नित्या तु अन्यस्य कान्ता प्रिया न भवतीत्यन्यकान्ता किन्तु तस्यैवेत्यर्थः । उरसि उरस्येव वसतीत्यर्थः अत्र हरेः प्रसाधनादसाधारणी शोभा जातेति पारमार्थिको वाक्यार्थः । अत्र लक्ष्मीशब्देन श्लेषमहिम्ना वाच्यायाः शोभायाः प्रतीयमानायाः श्रीदेव्या सहाभेदाध्यवसायादियमन्यैव लक्ष्मीरित्यभेदे भेदरूपातिशयोक्तिरलङ्कारः॥ १२ ॥

अथैनमेवार्थम्भङ्ग्यन्तरेणाह । कपाटेति । कपाटवद्विस्तीर्णे मनोरमे चोरःस्थले स्थिता श्रीरिति ललना कान्ता यस्य तस्य हरेरानन्दिताशेषजना सर्वाङ्गसङ्गिनी अतएवापरैवासाधारण्येव श्रीदेव्या अन्यैव लक्ष्मीः शोभा रमा च बभूव । स एवालङ्कारः । प्रायेणैकार्थमप्यनेकं श्लोकमुक्तिविशेषलाभाल्लिखन्ति कवयः । यथाह नैषधे आदावेव निपीयेत्यादि श्लोकद्वयं तथा स्वकेलिलेशेत्यादि श्लोकद्वयञ्चेति ॥ १२ ॥

अथ देवीसहचरस्यैवास्य यात्रेति सूचयन् प्रसाधनविधेः फलमाह । प्राणेति । भूषणतामुपेयुषां न तु प्रहरणतामिति भावः । दैत्यपतेः हिरण्यकशिपोः प्राणच्छिदां प्राणमुषां प्राणापहारिणां वज्रादपि कठोराणामित्यर्थः नखानां चतेन व्रणेन प्रकाशोव्यक्तः कार्कश्यमेव गुणोययोस्तौ स्तनौ स्तनानित्यर्थः ।

प्राणच्छिदां दैत्यपतेर्नखाना
मुपेयुषां भूषणतां क्षतेन।
प्रकाशकार्कश्यगुणौ दधानाः
स्तनौ तरुण्यः परिवव्रुरेनम्॥१४॥
आकर्षतेवोर्द्धमतिक्रशीया
नत्युन्नतत्वात्कुचमण्डलेन।
ननाम मध्योऽतिगुरुत्वभाजा
नितान्तमाक्रान्त इवाङ्गनानाम्॥१५॥

जातावेकवचने प्राप्ते जातिभूयस्त्व स्तनादिषु जातेर्द्वित्वविशिष्टत्वात् द्विवचनं। यथाह वामनः स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेणेति। दधानास्तरुण्यो युवतयः। वयसि प्रथमे इति ङीप्। एनं हरिं परिवव्रुः। अत्र हरिनखानां नरहरिनखभेदेऽप्यभेदोक्त्या स्तनयोश्च तादृक्काठिन्यासम्बन्धेऽपि तत् सम्बन्धोक्त्यातिशयोक्ती तयोश्च सापेक्षत्वात्सङ्करः॥१४॥

आकर्षतेति। अत्युन्नतत्वाद्धेतोः ऊर्द्धमाकर्षतेव समस्तं मध्यमुन्नमयतेव स्थितेनेत्युत्प्रेक्षा। अतिगुरुत्वमतिभारत्वं अतिप्रवृद्धत्वञ्च भजतीति भाक्। भजो ण्विः। तेनाङ्गनानां कुचमण्डलेनातिक्रशीयान् अत्यन्तकृशतरः तनीयान् क्षीणश्च। रऋतोहलादेर्लघोरिति रेफादेशः। मध्यो नितान्तमाक्रान्तः पीडित इव ननाम नतः प्रणतश्च। अत्र मध्यकुचमण्डलयोर्विशेषणसाम्याद्दरिविजिगीषु राजप्रतीतेः समासोक्तिः तथा वाच्ययोः प्रतीयमाना भेदेना

यां यां प्रियः प्रैक्षत कातराक्षी
सा सा ह्रिया नम्रमुखी बभूव ।
निःशङ्कमन्याः सममाहितेर्ष्या
स्तत्रान्तरे जघ्नुरमुं कटाक्षैः ॥ १६ ॥

क्रमणक्रियाकर्म्मकर्त्तृभावसम्बन्धाविति यं नमनस्याक्रमणहेतुकत्वोत्प्रेक्षा इत्यनयोः सङ्करः उत्प्रेक्षयोस्तु नैरपेक्ष्यात्संसृष्टिरेवेति विवेकः ॥ १५ ॥

यां यामिति । प्रियो हरिर्यां यामङ्गनां । नित्यवीप्सयोरिति वीप्सायां द्विर्भावः एकपदं । प्रैक्षतालोकयत सा सा । पूर्व्ववत् द्विर्भावः । कातराक्षी साध्वसाञ्चितलोचना सती ह्रिया नम्रमुखी बभूव । एतेन कार्य्यद्वारा लज्जासाध्वसभावोदय उक्तः । अन्यासा मीर्ष्याभावोदयमाह । अन्याः अप्रेक्षिताङ्गना आहितेर्ष्याः कृता क्षमाः सत्यः । परोत्कर्षाक्षमेर्ष्या स्यादिति लक्षणात् । तत्रान्तरे तस्मिन्नवीक्षणावसरे । क्लीवेऽन्तरमवकाशे तादर्थ्येऽवसरेऽवधाविति वैजयन्ती । निःशङ्कं तदनीक्षणादेव विस्रब्धं यथा तथा समं युगपत् कटाक्षैरमुं हरिं जघ्नुः प्रजह्रुः सरोषमद्राक्षुः ॥ १६ ॥

अथास्य पञ्चभिर्दिव्यास्त्रसन्निधानमाह । तस्येत्यादि । अत सीकुसुमेन क्षुमाकुसुमेन समानभासः तुल्यकान्तेः स्निग्धश्यामस्येत्यर्थः । अतसी स्यादुमा क्षुमेत्यमरः । तस्य हरेरेकबाहुः भ्राम्यदावर्त्तमानं मयूखावलीनां मण्डलं चक्रवालं यस्य तेन चक्रेण सुदर्शनेन स्फुरन्महानावर्त्तोभ्रमो यस्य सः । स्यादावर्त्तो

तस्यानसीहनसमानभासो
भ्राम्यन्मयूखावलिमण्डलेन ।
चक्रेण रेजे यमुनाजलौघः
स्फुरन्महावर्त्त इवैकबाहुः ॥१७॥
विरोधिनां विग्रहभेददक्षा
मूर्त्तेव शक्तिः क्वचिदस्खलन्ती ।
नित्यं हरेः सन्निहिता निकामं
कौमोदकी मोदयति स्म चेतः ॥ १८ ॥

ऽभसाभ्रमइत्यमरः । यमुनाजलानामोघः पूरइव रेजे चक्रमध्या वित्यर्थः ॥ १७ ॥

विरोधिनामिति । विरोधिनां वैरिणां विग्रहभेदे शरीर विदारणे दक्षाः । शरीरं वर्ष्म विग्रहइत्यमरः । क्वचित् क्वापि अस्खलन्ती सर्व्वत्राप्रतिहतवृत्तिरित्यर्थः नित्यं सन्निहिता अन पायिनी अतएव मूर्त्ता मूर्त्तिमती शक्तिः सामर्थ्यमिव स्थितेत्युत्प्रेक्षा कौमोदकी गदा हरेश्चेतोनिकामं मोदयति स्म सन्निधानेनेति भावः ॥ १८ ॥

न केवलमिति । अन्यस्य साधारणोन भवतीत्यनन्यसाधारण स्तस्य भावस्तत्ता तान्दधानः तथापि योनन्दकः खड्गः स तथा केवलं शत्रुगणाश्वादिवत् खलेनैव मुरारेर्नन्दकोन किन्तु परेषां शत्रूणां ...त्यर्थमुद्वेजयिता भीषयिता सन् अतएव नाम्नापि चन्द्रादिव आनन्दयतीति नन्दकइत्यन्वर्थसंज्ञावत्त्वेनापि नन्दयितृत्वेनापीति

न केवलं यः स्वतया मुरारे
रनन्यसाधारणतान्दधानः ।
अत्यर्थमुद्वेजयिता परेषां
नाम्नापि तस्यैव स नन्दकोऽभूत् ॥ १९ ॥

न नीतमन्येन नतिङ्कदाचित्
कर्णान्तिकप्राप्तगुणं क्रियासु ।
विधेयमस्याभवदन्तिकस्थं
शार्ङ्गन्धनुर्मित्रमिव द्रढीयः ॥ २० ॥

यावत् । तस्यैव तदीयएव योऽनन्यसाधारणत्वात्परोद्वेजकत्वाच्च तस्यैव नन्दकोनन्दयिता चेत्यर्थः । स नन्दकोनन्दकाख्यः खड्गोऽभूत् सन्निहितोभूदित्यर्थः । सत्तन्मात्रानुवादेन सन्निधानमेवात्र विधेयं प्रकरणात् अत्रानन्यसाधारणत्वपरोद्वेजकत्वपदार्थाभ्यां विशेषणगत्या नन्दकस्य तदीयतासमर्थनात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ १९ ॥

न नीतमिति । अन्येन पुरुषान्तरेण नतिमाकर्षणं भेदेन स्वानुकूल्यं च न नीतं न प्रापितं क्रियासु रणकर्मसु हिताहितकृत्येषु च कर्णान्तिकं कर्णगोचरं प्राप्तोगुणोमौर्वी आप्ततादिधर्मश्च यस्य तद्विधेयं क्रियासु वश्यं द्रढीयः दृढतरं पीडासहतरमिति यावत् शृङ्गस्य विकारः शार्ङ्गन्नाम धनुः मित्रमिवास्य हरेरन्तिकस्थं सन्निहितमभवत् ॥ २० ॥

प्रहृद्धेति । धियं रातीति धीरोमनोहरः मन्द्रोगम्भीरोऽम्बुदस्य मेघस्येव धीरस्य नादः प्रहृद्धोयेन सः प्रहृद्धमन्द्राम्बुदधीरनाद

प्रवृद्धमन्द्राम्बुदधीरनादः
कृष्णार्णवाभ्यर्णचरैकहंसः ।
मन्दानिलापूरकृतन्दधानो
निध्वानमश्रूयत पाञ्चजन्यः ॥ २१ ॥
रराज सम्पादकमिष्टसिद्धेः
सर्व्वासु दिक्ष्वप्रतिषिद्धमार्ग्गम् ।
महारथः पुष्यरथं रथाङ्गी
क्षिप्रं क्षपानाथइवाधिरूढः ॥ २२ ॥

इत्युपमा । कृष्णएवार्णवः समुद्रस्तस्याभ्यर्णचरोऽन्तिकचरः । उपकण्ठान्तिकाभ्यर्णइत्यमरः । स चासावेकहंसश्चेति श्लिष्टपरम्परितरूपकं । मन्दानिलस्यापूर आपूरणन्तेन कृतं जनितं निध्वानन्दधानः अनाध्मातोऽपि मन्दमारुतप्रवेशादेव ध्वनतीति पाटवादतिशयोक्तिः ध्वन्यसम्बन्धेऽपि सम्बन्धकथनात् । पञ्चजनोनाम कश्चिदसुरस्तत्र भवः पाञ्चजन्योऽस्य शङ्खः । बहिर्देवपञ्चजनेभ्यश्च वक्तव्यमिति ञ्यप्रत्ययः। अश्रूयत श्रूयते स्म पाञ्चजन्योऽपि सन्निहितोऽभूदित्यर्थः । वीणा श्रूयते पुष्पाण्याघ्रायन्ते इत्यादिवद्धर्म्मधर्म्मिणोरभेदोपचारात् पाञ्चजन्यस्य श्रवणोक्तिः ॥ २१ ॥

रराजेति । महान् रथोयस्य स महारथो रथिकविशेषः । आत्मानं सारथिं चाश्वान् रक्षन् युध्येत योनरः । स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदाइति । रथाङ्गञ्चक्रमस्यास्तीति रथाङ्गी हरिः इष्टसिद्धेः सम्पादकं लक्षणवत्त्वात् । पुष्यः सर्व्वार्थसाधकइति शास्त्रादिति भावः । सर्व्वासु दिक्ष्वप्रतिषिद्धमार्ग्गं अनिषिद्ध

ध्वजाग्रधामा ददृशेऽथ शौरि
स्संक्रान्तमूर्त्तिर्मणिमेदिनीषु ।
फणावतस्त्रासयितुं रसाया
स्तलं विविक्षन्निव पन्नगारिः ॥ २३ ॥

गमनमित्यर्थः अधिष्ठानस्यर्क्षेर्नैरन्तर्य्यत्वात् । पुष्योहस्तोमैत्रमप्याश्विनश्च चत्वार्य्यृक्षः सर्व्वदिग्द्वारकाणीति शास्त्रादिति भावः । क्षिप्रं क्षिप्रगामिनं अन्यत्र क्षिप्रनामकं । क्षिप्रं चाश्विदिनेश पुष्यमिति शास्त्रात् । पुष्यरथं क्रीडारथं । असौ पुष्यरथः क्रीडार्थम न समराय यदित्यमरः । अधिरूढः सन् पुष्येरथइव तं पुष्यरथमधिरूढः पुष्यनक्षत्रगतः क्षपानाथश्चन्द्रइव रराज ॥२२॥

ध्वजेति । अथ रथारोहणानन्तरं शौरेः कृष्णस्य ध्वजाग्रं धाम स्थानं यस्य सः मणिमेदिनीषु मणिमयकुट्टिमेषु सङ्क्रान्तमूर्त्तिः प्रतिविम्बिताङ्गः सन् पन्नगारिर्गरुत्मान् फणावतः सर्प्पान् त्रासयितुं द्रावयितुं रसायास्तलं पातालं विविक्षन् प्रवेष्टुमिच्छन्निवेत्युत्प्रेक्षा । विशतेः सन्नन्ताल्लटः शत्रादेशः । ददृशे दृष्टः । सोऽपि सन्निहितोऽभूदित्यर्थः ॥ २३ ॥

यियासतइति । यातुमिच्छतो यियासतः । यातेः सन्नन्ताल्लटः शत्रादेशः । तस्य हरेः सम्बन्धी महीं धरन्तीति महीध्राः पर्व्वताः । मूलविभुजादित्वात्कइति वामनः । महीध्रादयोमूलविभुजादिदर्शनादिति । तेषां रन्ध्राणि विलानि तेषां भिदा भेदनं । षिद्भिदादिभ्योऽङ् । तस्यां पटीयान् समर्थतरः पटहप्रणादत्रानकघोषमहार्णवक्षोभः समुद्रस्य प्रवाहः अन्यानि जलानि जलान्तराणीव।

यियासतस्तस्य महीध्ररन्ध्र
भिदापटीयान् पटहप्रणादैः ।
जलान्तराणीव महार्णवौघः
शब्दान्तराण्यन्तरयाञ्चकार ॥ २४ ॥
यतः स भर्त्ता जगतां जगाम
धर्त्ता धरित्र्याः फणिना ततोऽधः ।
महाभराभुग्नशिरस्सहस्र
साहायकव्यग्रभुजं प्रसस्रे ॥ २५ ॥

सुप्सुपेति समासः । अन्यान् शब्दान् शब्दान्तराणि । पूर्व्ववत्समासः । अन्तरयाञ्चकार अन्तर्हितानि चकार छादयामासेत्यर्थः । अन्तरशब्दादन्तर्द्धानार्थात्करोतिर्ण्यन्ताल्लिट् । अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्यइत्युभयत्राप्यमरः ॥ २४ ॥

यतइति । जगताम्भर्त्ता धारयिता कुक्षिस्थाखिललोकइत्यर्थः । कर्त्तृकर्म्मणोः कृतीति कर्म्मणि षष्ठी । स हरिर्यतोयेन भूमार्ग्गेण जगाम ततस्तस्मिन्भूभागे अधः पाताले धरित्र्याः धरण्याः धर्त्ता धारयिता । पूर्व्ववत् षष्ठी । फणिना शेषेण महता भरेण आसमन्तादाभुग्नस्य कुञ्जीभूतस्य शिरःसहस्रस्य साहायके सहायकर्म्मणि । योपधाद्गुरूपोत्तमाद्वुञ् । व्यग्राः त्वरमाणाः भुजायस्मिन् तद्यथा तथा प्रसस्रे प्रसृतम् । भावे लिट् । हरिश्चचालेत्यर्थः । अत्र शेषस्य विशिष्टप्रसरणासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ २५ ॥

अथोच्चकैस्तोरणसङ्गभङ्ग
भयावनम्रीकृतकेतनानि ।
क्रियाफलानीव सुनीतिभाजं
सैन्यानि सोमान्वयमन्वयुस्तम् ॥ २६ ॥

श्यामारुणैर्वारणदानतोयै
रालोडिताः काञ्चनभूपरागाः ।
आनेमिमग्नैः शितिकण्ठपक्ष
क्षोदद्युतश्चुक्षुदिरे रथौघैः ॥ २७ ॥

अथेति । अथ हरिचलनानन्तरं उच्चकैरुन्नते तोरणे द्वार दारुणि सङ्गेन भङ्गस्तस्माद्भयेनावनम्रीकृतानि केतनानि येषानि सैन्यानि सोमस्यान्वयः सन्तानः तं सोमान्वयं हरिं सुनीतिभाजं सुष्ठुनीतिमन्तं क्रियाः सामाद्युपायप्रयोगास्तासां फलानि हिरण्य भूमिचादिलाभाइवान्वयुः अन्वगच्छन् । यातेर्लङः लङः शाकटायनस्यैति सेर्जुस् ॥ २६ ॥

श्यामेति । श्यामानि चारुणानि च तैः श्यामारुणैः कृष्णलो हितैः । वर्णोवर्णेनेति समासः । वारणदानतोयैर्गजमदोदकै रालोडिताः सम्मिलिताअतएव शितिकण्ठपिच्छक्षोदाः मयूरवर्हचूर्णा इव द्योतन्तइति तथोक्ताः । क्किप् । उपमालङ्कारः । काञ्चनस्य भूः काञ्चनभूस्तस्याः परागाः पांशवः आनेमि नेमिमभिव्याप्य । तस्यान्ते नेमिः स्त्रीत्यमरः । आङ् मर्य्यादाभिविध्योरित्यभिविधा वव्ययीभावः । मग्नैः रथौघैः चुक्षुदिरे पिष्टा इत्यर्थः । परागाणां

न लङ्घयामास महाजनानां
शिरांसि नैवोद्धतिमाजगाम।
अचेष्टताष्टापदभूमिरेणुः
पदाहतो यत्सदृशं गरिम्णः ॥ २८ ॥
निरुध्यमाना यदुभिः कथञ्चि
न्मुहुर्यदुच्चिक्षिपुरग्रपादान्।
ध्रुवं गुरून्मार्गरुधः करीन्द्रा
नुल्लङ्घ्य गन्तुं तुरगास्तदीषुः ॥ २९ ॥

विशिष्टपेषणासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः। तथा च महती गजरथसम्पत्तिर्व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ २७ ॥

नेति। अष्टसु धातुषु पदं प्रतिष्ठा अस्येति अष्टापदं सुवर्णं। रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामिति सुवर्णपर्यायेष्वमरः। तस्य भूमिस्तस्याः रेणुः काञ्चनभूरजः पदाहतो रथाश्वादिचरणताडितोऽपि सन्नित्यर्थः महाजनानां वृद्धजनानां पूज्यानाञ्च शिरांसि न लङ्घयामास नाक्रामति स्म किं बहुना उद्धतिमुत्पवनन्द्र्यंञ्च नैवाजगाम कुतः यद्यस्मात् गरिम्णो गुरुत्वगुणस्य माहात्म्यस्य च। प्रियस्थिरेत्यादिना गुरोर्गरादेशः। सदृशमनुरूपं यथा तथा अचेष्टत अलङ्घनव्यवहारे गुरुत्वस्योद्धत्यप्रतिबन्धकत्वादिति भावः। अत्रानौद्धत्यादिप्रस्तुतसुवर्णपरागविशेषणसाम्यादप्रस्तुतसुजनप्रतीतेः समासोक्तिरलङ्कारः ॥ २८ ॥

निरुध्यमानाइति। तुरगाः यदुभिरारूढैरिति भावः कथञ्चिदति प्रयत्नेन निरुध्यमानाबलाकर्षणेन वार्य्यमाणा अपि यद्यस्मादग्रपा

अवेक्षितानायतवल्गमग्रे
तुरङ्गिभिर्य्यत्ननिरुद्धवाहैः ।
प्रक्रीडितान्रेणुभिरेत्य तूर्ण
निन्युर्ज्जनन्यः पृथुकान्पथिभ्यः ॥ ३० ॥

श्च ते पादाश्च तानयपादान् । हस्त्यादयग्रहस्तादयो गुणगुणिनो रभेदभेदयोगादिति वामनः सामानाधिकरण्येन समासः । मुकुरश्चिविपुरस्त्विमवन्तः तत्तस्मान्मार्गं रुन्धन्तीति मार्गरुधः मन्दगमनेन मार्गरोधिनः । किञ्च । गुरून् महतः मूर्ध्वांश्चाल ङ्घ्यानपीति भावः । करीन्द्रानुल्लङ्घ्य गन्तुमीपुरिच्छन्ति स्म । ध्रुव मित्युत्प्रेक्षायां । गुरवोऽपि सन्मार्गरोधकाः परैरुल्लङ्घ्यन्तइति अलङ्कारेण वस्तुध्वनिः ॥ २९ ॥

अवेक्षितानिति । आयता आकृष्टा वल्गा मुखरज्जुर्यस्मिन् कर्म्मणि तद्यथा तथा यत्नेन दुर्वारवेगत्वात् अतिप्रयत्नेन निरुद्धा वाहावाजिनोयैस्तैः । वाजिवाहार्व्वगन्धर्व्वइत्यमरः । तुरङ्गिभिः रथ्वादिभिरग्रे पुरोदेशेऽवेक्षितानालोकितान् रेणुभिः प्रक्रीड न्तीति प्रक्रीडितान् पांशुक्रीडाकरान् । कर्त्तरि क्तः । पृथुकान् शिशून् । पृथुकः शावकः शिशुरित्यमरः । जनन्यस्तूर्ण मेत्य पथिभ्योनिन्युः अपसारयाञ्चक्रुरिति स्वभावोक्तिः ॥ ३० ॥

दिदृक्षमाणाइति । अनघमकलङ्कं मुरारिं दिदृक्षमाणाः द्रष्टु मिच्छन्तः । दृशेः सन्नन्तात्लटः शानजादेशः ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदं । अनोघारथ्यार्था रथ्यार्थं प्रतिरथ्यं यथार्थे

दिदृक्षमाणाः प्रतिरथ्यमीयु
र्मुरारिमारादनघं जनौघाः ।
अनेकशस्संस्तुतमप्यनल्पा
नवन्नवं प्रीतिरहो करोति ॥ ३१ ॥

उपेयुषो वर्त्म निरन्तराभि
रसौ निरुच्छ्वासमनीकिनीभिः ।
रथस्य तस्यां पुरि दत्तचक्षु
र्विद्वान् विदामास शनैर्न यातम् ॥ ३२ ॥

ऽव्ययीभावः । आरात्समीपं । आराद्दूरसमीपयोरित्यमरः ॥ ईयुर्जग्मुः । इणो लिट् दीर्घ इणः किती त्यभ्यासदीर्घः । ननु नित्यपरिचिते का दिदृक्षेत्याह । अनेकश इति । अनेकशोऽनेक वारमित्यर्थः । सङ्ख्यार्थाच्छकारकादन्यतरस्यामिति शस्प्रत्ययः । संस्तुतं परिचितमपि वस्तु जनेनेति शेषः । संस्तवः स्यात्परि चय इत्यमरः । अनल्पा अधिका प्रीतिः प्रेम कर्त्री नवंनवं । आभीक्ष्ण्येन नवं करोति । नित्यवीप्सयोरिति द्विर्भावः । अहोशब्दः पुराणस्यापि नूतनत्वमित्याश्चर्य्ये यथा परप्रेमास्पदं वस्तु नित्यदृष्टमपि अदृष्टचरमिव प्रतिक्षणं दिदृक्ष्यते भगवानपि तथैवेति भावः सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३१ ॥

उपेयुष इति । विद्वानभिज्ञः अतएव तस्यां पुरि नगर्य्यां दत्तचक्षुः निबद्धदृष्टिरसौ हरिर्निरन्तराभिर्नीरन्ध्राभि

मध्येसमुद्रं ककुभः पिशङ्गी
र्या कुर्वती काञ्चनवप्रभासा।
तुरङ्गकान्तामुखहव्यवाह
ज्वालेव भित्त्वा जलमुल्ललास ॥ ३३ ॥

रमीकिनीभिः सेनाभिर्निरुच्छ्वासं अतिसङ्कटं वर्त्म उपेयुषः प्राप्तस्य रथस्य शनैर्यातं सम्बन्धनिबन्धनं मन्दगमनं न विदामास न विवेद। उषविदजागृभ्योऽन्यतरस्यामिति आम्प्रत्ययः। व्यासङ्गा दसंवेदनं न तु तत्त्वाज्ञानादिति भावः। व्यासङ्गस्य पदार्थत्वात् पदार्थहेतुकं काव्यलिङ्गम् ॥ ३२ ॥

अथैकत्रिंशत् श्लोकैर्द्वारकां वर्णयति। मध्यइति। समुद्रस्य मध्ये मध्येसमुद्रं। पारे मध्ये षष्ठ्या चेति विकल्पादव्ययीभावः मध्यशब्दस्य तत्सन्नियोगादेकारान्तत्वं। काञ्चनवप्रभासा हेम प्राकारप्रभया ककुभो दिशः पिशङ्गीः पिङ्गलवर्णाः। गौरादित्वात् ङीष्। कुर्वती या पूः जलं समुद्रोदकं भित्त्वा उत्थितेति शेषः। तुरङ्गकान्तायाः वडवाया मुखे हव्यं वहतीति हव्यवाहो ऽग्निः। कर्मण्यण्प्रत्ययः। तस्य वाडवाग्नेः ज्वालेव उल्ललास उद्बभासे। अत्र समुद्रान्तर्लीनायां वडवानलज्वालायां कदाचि त्सम्भाव्यमानस्य मध्योल्लसनस्य पुरि दर्शनाभेदाध्यवसाये नास्याज्वालात्वमुत्प्रेक्ष्यते इवशब्दोऽयमुत्प्रेक्षाया एव व्यञ्जको नोपमाया ईदृग्ज्वालाया अप्रसिद्धत्वेनोपमानत्वायोगात्। मन्ये शङ्के ध्रुवं नूनं प्राय इत्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृश इत्याचार्यदण्डी ॥ ३३ ॥

कृतास्पदा भूमिभृतां सहस्रै-
रुदन्वदम्भःपरिवीतमूर्त्तिः ।
अनिर्विदा या विदधे विधात्रा
पृथ्वी पृथिव्याः प्रतियातनेव ॥ ३४ ॥

त्वष्टुः सदाभ्यासगृहीतशिल्प-
विज्ञानसम्पत्प्रसरस्य सीमा ।
अदृश्यतादर्शतलामलेषु
छायेव या स्वर्जलधेर्जलेषु ॥ ३५ ॥

कृतास्पदेति । भूमिभृतां राज्ञां गिरीणां च सहस्रैः कृतास्पदा कृताधिष्ठाना । आस्पदं प्रतिष्ठायामिति निपातः । उदकमस्यास्तीत्युदन्वानुदधिः । उदन्वानुदधिः सिन्धुरित्यमरः । उदन्वानुदकाचेति निपातनात्साधुः। तस्याम्भोभिः परिवीता परिवेष्टिता मूर्त्तिः स्वरूपं यस्याः सा पृथ्वी पृथुः । वोतो गुणवचनादिति ङीप् । एवम्भूता या पूः न निर्विद्यते न खिद्यते इत्यनिर्वित् । विदे र्ज्ञानार्थत्वान्निःपूर्वात्सत्सूद्विषेत्यादिना क्विप् । तेनानिर्विदा अखिन्नेन अन्यथा शिल्पसौष्ठवासिद्धेरिति भावः विधात्रा प्रथतइति पृथिवी भूः । प्रथेरौणादिकः षिवन् षिद्गौरादिभ्यश्चेति ङीष् । तस्याः प्रतियातना प्रतिकृतिरिव विदधे विहिता । प्रतियातना प्रतिच्छाया प्रतिकृतिरित्यमरः । भूप्रतिनिधित्वोत्प्रेक्षया पुरो वैचित्र्यविस्तारादि वस्तु व्यज्यते ॥ ३४ ॥

त्वष्टुरिति । त्वष्टुर्विश्वकर्मणः सदाभ्यासेन गृहीतोऽभ्यस्तो यः शिल्पविज्ञानसम्पदः प्रसरः प्रकर्षः तस्य सीमा अवधिरप्रतिमेतिः

रथाङ्गभर्त्रेऽभिनवं वराय
यस्याः पितेव प्रतिपादितायाः ।
प्रेम्णोपकण्ठं मुहुरङ्कभाजो
रत्नावलीरम्बुधिराबबन्ध ॥ ३६ ॥
यस्याश्चलद्वारिधिवारिवीचि
च्छटोच्छलच्छङ्खकुलाकुलेन ।
वप्रेण पर्य्यन्तचरोडुचक्रः
सुमेरुवप्रोऽन्वहमन्वकारि ॥ ३७ ॥

थावत् या पूरादर्शतलामलेषु दर्पणपृष्ठस्वच्छेषु । दर्पणे मुकुरादर्शावित्यमरः । जलधेर्जलेषु स्वः स्वर्गस्य । स्वरव्ययं स्वर्गनाकइत्यमरः । छाया प्रतिविम्बमिवादृश्यतइत्युत्प्रेक्षा । छायात्वनातपे कान्तौ प्रतिविम्बार्कजाययोरिति वैजयन्ती ॥ ३५ ॥

रथाङ्गेति । अम्बुधिः पितेव वराय श्रेष्ठाय जामात्रे च । वरो जामातरि श्रेष्ठइति विश्वः। रथाङ्गभर्त्रे चक्रधराय हरये अभिनवं यथा तथा प्रतिपादितायाः अङ्कः समीपउत्सङ्गश्च तद्भाजः । अङ्कः समीपउत्सङ्गे चिह्ने स्थानापराधयोरिति केशवः । यस्याः पुरउपकण्ठमन्तिके । अत्यन्तसंयोगे द्वितीया । अन्यत्र कण्ठे । विभक्त्यर्थेऽव्ययीभावः । मुहुः प्रेम्णा रत्नावलीराबबन्ध आसमन्ताद्बबन्ध । श्लेषानुप्राणितेयमुपमेति सङ्करः ॥ ३६ ॥

यस्या इति । चलन्तीनां वारिधिवारिवीचीनाञ्छटासु परम्परासु उच्छलद्भिरुत्पतद्भिः शङ्खानाङ्कुलैराकुलेन सङ्कीर्णेन यस्याः परोवप्रेण प्राकारेण पर्य्यन्ते चरतीति तत् तादृशं उडुचक्रं

वणिक्पथे पूगकृतानि यत्र
भ्रमागतैरम्बुभिरम्बुराशिः ।
लोलैरलोलद्युतिभाञ्जि मुष्णन्
रत्नानि रत्नाकरतामवाप ॥ ३८ ॥

मध्यमण्डलं यस्य सः सुमेरोर्वप्रः सानुः । सानुप्रकारयोर्वप्रमित्युभयत्रापि सज्जनः । अहन्यहनीत्यन्वहं । अव्ययं । विभक्तीत्यादिना याथार्थ्येऽव्ययीभावः अनश्च नपुंसकादन्यतरस्यामिति समासान्तो टच् । अन्वकारि अनुकृतः तत्साम्यं प्रापितइत्यर्थः । मेरूपमानाद्वप्रस्य तत्तुल्यमौन्नत्यं व्यज्यते ॥ २७ ॥

वणिक्पथइति । यत्र यस्यां पुरि वणिजां पथि वणिक्पथे आपणे अपूगाः पूगाः सम्पद्यमानानि कृतानि पूगकृतानि पुञ्जीकृतानि । श्रेण्यादयः कृतादिभिरिति समासः । श्रेण्यादिषुच्व्यर्थवचनमिति च्व्यर्थता । अलोलद्युतिभाञ्जि स्थिरप्रभावन्ति रत्नानि लोलैश्चलैः अतएव भ्रमागतैः जलनिर्गममार्गादागतैः । भ्रमाश्च जलनिर्गमाइत्यमरः । अम्बुभिर्मुष्णन् अपहरन् अम्बुराशिरर्णवः जलमात्रधारोऽपीति भावः रत्नाकरतामवाप प्राप न तु प्रागिति भावः । अम्बुराशेः प्राक् रत्नसम्बन्धेप्यसम्बन्धोक्तेरतिशयोक्तिः तया च पुर्य्याः समुद्रातिशायिनी रत्नसमृद्धिर्वस्तु व्यज्यते ॥ ३८ ॥

अम्भइति । यत्र पुरि अपांनिधिः समुद्रः अभ्रंलिहोत्तमित्तरम्भोत्थ ...च्युतोजलस्राविणः अतएव फेनैः पिनद्धभासः पिहितकान्तीन् । अपिपूर्वान्नह्यतेः कर्म्मणि क्तः वष्टि भागुरिरल्लोप

अम्भश्च्युतः कोमलरत्नराशी
नपांनिधिः फेनपिनद्धभासः।
यत्रातपे दातुमिवाधितल्पं
विस्तारयामास तरङ्गहस्तैः ॥ ३९ ॥

यच्छालमुत्तुङ्गतया विजेतुं
दूरादुदस्थीयत सागरस्य।
महोर्मिभिर्व्याहतवाञ्छितार्थै
र्व्रीडादिवाभ्यासगतैर्विलिल्ये ॥ ४० ॥

मवाप्योरुपसर्गयोरित्यपेरकारलोपः। कोमलाननुत्कृष्टान् रत्नराशीनातपे दातुं शोषणार्थं निधातुमिवेति फलोत्प्रेक्षा तल्पेष्वट्टेषु अधितल्पं। तल्पं शय्याट्टदारेष्वित्यमरः। विभक्त्यर्थेऽव्ययीभावः। तरङ्गैरेव हस्तैर्विस्तारयामास प्रसारितवान्। अत्रातपदानस्य तरङ्गहस्तसाध्यत्वेनोत्प्रेक्षारूपकयोः सङ्करः॥ ३९ ॥

यच्छालमिति। सागरस्य महोर्मिभिः कर्तृभिर्यच्छालं यस्याः प्राकारं। प्राकारो वरणः शालइत्यमरः। उत्तुङ्गतया औन्नत्यगुणेन जेतुमिवेत्यर्थः। फलोत्प्रेक्षेयं व्यञ्जकाप्रयोगाद्गम्या। दूरादुदस्थीयत उत्थितम्। भावे लङ्। अभ्यासगतैः समीपगतैः। समीपनिकटाभ्याससन्निकृष्टसनीडवदित्यमरः। व्याहतोवाञ्छितार्थः शालविजयरूपो येषां तैर्विजयाक्षमैरित्यर्थः। अत एव व्रीडादिवेति हेतूत्प्रेक्षा ऊर्मिभिर्विलिल्ये विलीनं। लीयतेर्भावे लिट्। अत्र प्रस्तुतस्यापि अविजिगीषोर्व्रीडानुदयात्सापेक्षत्वेनोत्प्रेक्षयोः सङ्करः ॥ ४० ॥

कुतूहलेनेव जवादुपेत्य
प्राकारभित्त्या सहसा निषिद्धः।
रसन्नरोदीद्भृशमम्बुवर्ष
व्याजेन यस्यावहिरम्बुवाहः ॥ ४१ ॥
यदङ्गनारूपसरूपतायाः
कञ्चिद्गुणं भेदकमिच्छतीभिः।
आराधितोऽद्धा मनुरप्सरोभि
श्चक्रे प्रजाः स्वाः सनिमेषचिह्नाः ॥ ४२ ॥

कुतूहलेनेति। अम्बु वहतीत्यम्बुवाहोमेघः। कर्मण्यण्। कुतूहले नान्तःप्रवेशकौतुकेनेवेति हेतूत्प्रेक्षा जवात् उपेत्य यस्याःप्राकार भित्त्या सहसा निषिद्धोनिवारितः अतएव वहिरेव रसन् गर्जन् दुःखात् क्रन्दंश्चेति श्लेषः अम्बुवर्षव्याजेन भृशमरोदीत् अश्रूणि मुक्तवान्। रुदिरश्रुविमोचने लङ् रुदश्च पञ्चभ्यइतीडागमः। अत्राम्बुवर्षव्याजेनोत्पादकस्योक्तश्लेषोत्प्रेक्षासापेक्षत्वात्सङ्करः ॥४१॥

यदङ्गनेति। यस्यां पुर्य्यामङ्गनानां रूपं सौन्दर्य्यमाकारोवा। रूपं स्वभावे सौन्दर्य्ये आकारश्लोकयोरपीति विश्वः। तस्य सरूप तायाः सारूप्याद्भेदकं व्यावर्त्तकं कञ्चिद्गुणं धर्म्ममिच्छतीभि रपेक्षमाणाभिः। आच्छीनद्योर्नुमिति विकल्पान्नुमभावः। अप्सरोभि राराधितः प्रार्थितोमनुर्मानुषसृष्टिकर्त्ता स्वाः स्वकीयाः प्रजाः निमेषः पक्ष्मपातएव चिह्नं व्यावर्त्तकं तेन सह वर्त्तन्तइति सनिमेष चिह्नाः। तेन सहेति तुल्ययोगइति बहुव्रीहिः। चक्रे अद्धा

स्फुरत्तुषारांशुमरीचिजालै
र्विनिह्नुताः स्फाटिकसौधपङ्क्तीः ।
आरुह्य नार्य्यः क्षणदासु यत्र
नभोगता देव्य इव व्यराजन् ॥४३॥

नम्रमित्युत्प्रेक्षा । तल्पं स्वट्वाङ्गना इयोरित्यमरः। अत्र स्वाभाविक निमेषस्याप्सरसः प्रार्थनाहेतुकत्वोत्प्रेक्षया द्वारकाङ्गनानां निमेषमात्रभिन्नमप्सरोरूपं सौन्दर्य्यं वस्तु व्यज्यते ॥ ४२ ॥

स्फुरदिति। यस्यां पुरि क्षणदासु रात्रिषु नार्य्यः स्फुरद्भिस्तुषारांशोश्चन्द्रस्य मरीचिजालैश्चन्द्रिकाभिः विनिह्नुताः अपह्नुताः तदेकरूपतापत्तेरगृह्यमाणा इत्यर्थः । अतएव सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । स्फाटिकानां स्फटिकविकाराणां सौधानां पङ्क्तीरारुह्य नभोगता देव्यो देवाङ्गना इव । देवशब्दस्य पचादिषु देवडिति पाठात् टिड्ढाणञित्यादिना ङीप् । व्यराजन् सौधानामग्रहणादभ्रङ्कषत्वाच्च तत्र लक्ष्यमाणाः स्त्रियः खेचर्य्य इव रेजुरित्यर्थः। अत्र नभोगतत्वोत्प्रेक्षायाः पूर्व्वोक्तसामान्यसापेक्षत्वात् सङ्करः ॥ ४३ ॥

कान्तेति । यत्र पुरि क्षपासु रात्रिषु प्रतिक्षपं । विभक्त्यर्थेऽव्ययीभावः । कान्तानि रम्याणि इन्दुकान्तोपलानां चन्द्रकान्तमणीनां कुट्टिमानि बद्धभूमयो येषु तेषु । कुट्टिमं बद्धभूमिः स्यादिति हलायुधः । हर्म्यतलेषु उच्चैरुन्नताः प्रणाल्यो जलमार्गाः। द्वयोः प्रणाली पयसः पदव्यामित्यमरः । अधः पातिनोऽधस्तराः पयोमुचो मेघाः धारासाराः अधःस्थमेघमण्डलत्वात्

कान्तेन्दुकान्तोपलकुट्टिमेषु
प्रतिक्षपं हर्म्यतलेषु यत्र ।
उच्चैरधःपातिपयोमुचोऽपि
समूहमूहुः पयसां प्रणाल्यः ॥ ४४ ॥

रतौ ह्रिया यत्र निशाम्य दीपान्
जालागताभ्योऽधिगृहं गृहिण्यः ।
बिभ्युर्बिडालेक्षणभीषणाभ्यो
वैदूर्यकुड्येषु शशिद्युतिभ्यः ॥ ४५ ॥

अजातवृष्टिपाताअपीत्यर्थः । विरोधालङ्कारः । पयसां समूहं पयःपूरमूहुर्वहन्ति स्म चन्द्रकान्तनिष्यन्दैरिति भावः । वहे लिट् वचिस्वपीत्यादिना सम्प्रसारणं । अत्र सौधानां प्रणालीनां च तादृगैश्वर्य्यपयःपूरासम्बन्धेऽपि तत्सम्बन्धोक्त्यातिशयोक्तिः ॥ ४४ ॥

रताविति । यत्र पुरि गृहेष्वधिगृहं । विभक्त्यर्थेऽव्ययीभावः । गृहिण्यः कुलाङ्गनाः अतएव रतौ रतिकाले ह्रिया दीपान्निशाम्य निर्वाप्य । शमेर्मित्त्वाद्ध्रस्वादेशाभावश्चिन्त्यः । जालागताभ्योगवाक्षमार्गप्रविष्टाभ्यः । जालं गवाक्षआनायइति विश्वः । विदूरात्प्रभवन्तीति वैदूर्य्याणि बालवायजानि मणयः । वैदूर्य्यं बालवायजमिति विश्वः । विदूरात् ञ्यइति ञ्यप्रत्ययः । अत्र विदूरशब्दोबालवायस्यादेशः पर्य्यायोवा तत्रोपचरितोवा तेन बालवायाद्रिरेवासौ प्रभवति न विदूरान्नगरात् तत्र तु संस्क्रियतइत्याक्षेपः प्रयुक्तः । यदुक्तं । बालवायोविदूरं च प्रकृत्यन्तरमेव वा । न वै तत्रेति

यस्यामतिश्लक्ष्णतया गृहेषु
विधातुमालेख्यमशक्नुवन्तः ।
चक्रुर्युवानः प्रतिबिम्बिताङ्गाः
सजीवचित्रा इव रत्नभित्तीः ॥ ४६ ॥
सावर्ण्यभाजां प्रतिमागतानां
लक्ष्यैः स्मरापाण्डुतयाङ्गनानाम् ।
यस्यां कपोलैः कलधौतधाम
स्तम्भेषु भेजे मणिदर्पणश्रीः ॥ ४७॥

चेद्भूयाज्जिलरीवदुपाचरेदिति । तेषां कुड्येषु भित्तिषु सङ्क्रान्ताभ्य इति शेषः अतएव तच्छायापत्त्या पैङ्गल्यात् विडालेक्षणवत् भीषयन्त इति भीषणाभ्योभयङ्कराभ्यः । नन्द्यादित्वात्कर्त्तरि ल्युप्रत्यये टाप् । शशिद्युतिभ्योबिभ्युः भीताः मौग्ध्यादिति भावः । बिभेतेर्लिट् । अत्र लज्जावारणाय दीपनिर्व्वापणे न केवलमादसिद्धिः प्रत्युत भयश्चोत्पन्नमित्यनर्थोत्पत्तिरूपो विषमभेदः । विरुद्धकार्य्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् । विरूपघटना या स्याद्विषमालङ्कृतिर्मतेति लक्षणात् ॥ ४५ ॥

यस्यामिति । यस्यां पुरि गृहेष्वतिश्लक्ष्णतया रत्नभित्तीनामतिस्निग्धतया आलेख्यञ्चित्रं विधातुन्निर्मातुमशक्नुवन्तो युवानः प्रतिबिम्बिताङ्गाः स्वयन्तासु सङ्क्रान्तमूर्त्तयः सन्तो रत्नभित्तीः सजीवचित्राः सचेतनचित्रवतीरिव चक्रुरित्युत्प्रेक्षा ॥ ४६ ॥

सावर्ण्येति । यस्यां पुरि कलधौतधामस्तम्भेषु हेमागारस्तम्भेषु । कलधौतं रौप्यहेम्नोरिति विश्वः । प्रतिमागतानां सावर्ण्यभाजां

शुकाङ्गनीलोपलनिर्म्मितानां
लिप्तेषु भासा गृहदेहलीनाम् ।
यस्यामलिन्देषु न चक्रुरेव
मुग्धाङ्गनागोमयगोमुखानि ॥ ४८ ॥

तत्सावर्ण्यादगृहीतभेदानामित्यर्थः अतएव सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । अङ्गनानां स्मरापाण्डुतया लक्ष्यैर्विभिन्नवर्णलाञ्छेदेन गृह्यमाणैरित्यर्थः कपोलैर्मणिदर्प्पणानां स्फटिकमुकुराणां श्रीरिव श्रीर्भेजे प्राप्ता इति निदर्शना । सा चोक्तसामान्यप्रसादलब्धेति तेनास्याः सङ्करः ॥ ४७ ॥

शुकाङ्गेति । यस्यां पुरि मुग्धाङ्गनाः शुकाङ्गवन्नीलोपलाः नीलमणयोमकरतानीत्यर्थः । उपलः प्रस्तरे मणाविति विश्वः । तैर्निर्म्मितानां गृहाणां देहल्योगृहद्वारशाखाधारदारूणि । गृहावग्रहणी देहलीत्यमरः । तासाम्भासा लिप्तेषु अलिन्देषु द्वारवहिर्भागेषु । प्रघाणप्रघणालिन्दावहिर्द्वारप्रकोष्ठकइत्यमरः । गोः पुरीषं गोमयम् । गोश्च पुरीषे इति मयट् । तस्य गोमुखानि विलेपनानि । गोमुखं कुटिलाकारे वाद्यभाण्डे विलेपने इति विश्वः । न चक्रुरेव । मरकतप्रभायां विलेपनभ्रान्त्येति भावः । अतएव भ्रान्तिमदलङ्कारः कविसम्मतसादृश्याद्वस्त्वन्तरमतिर्हि यत् । स भ्रान्तिमानित्यलङ्कारसर्व्वस्वकारलक्षणात् ॥ ४८ ॥

गोपानसीष्विति । यत्र पुरि गृहाणि गोपानसीषु वलभीच्छादनाधारेषु वंशपञ्जरेष्वित्यर्थः । अतएव गोपानसी तु वलभी

गोपानसीषु क्षणमास्थिताना
मालम्बिभिश्चन्द्रकिणां कलापैः।
हरिन्मणिश्यामतृणाभिरामै
र्गृहाणि नीध्रैरिव यत्र रेजुः ॥ ४९ ॥
बृहत्तुलैरप्यतुलैर्वितान
मालापिनद्धैरपि चावितानैः।
रेजे विचित्रैरपि या सचित्रै
र्गृहैर्विशालैरपि भूरिशालैः ॥ ५० ॥

च्छादने वक्रदारुणीत्यत्र पटलाधारवंशपञ्जरे इत्याह स्वामी। क्षणमीषत्कालम्। अत्यन्तसंयोगे द्वितीया। आस्थितानामासीनानां चन्द्रकाः मेचकाः। समौ चन्द्रकमेचकावित्यमरः। तद्वतां चन्द्रकिणां मयूराणां आलम्बिभिर्लम्बमानैः कलापैः बर्हैः। कलापो भूषणे बर्हे इत्यमरः। हरिन्मणयो मरकतानि। गारुत्मतं मरकतमश्मगर्भं हरिन्मणिरित्यमरः। तद्वत् श्यामैस्तृणैरभि रामाणि हरिततृणमयानीत्यर्थः। तैर्नीध्रैः पटलप्रान्तैरिव रेजुः। वलीकनीध्रे पटलप्रान्तेऽथ पटलं छदिरित्यमरः। छादनपर्य्यायौ पटलच्छदी छद्यञ्चलवाचिनी वलीकनीध्रे छदेराधारोवंशपञ्जरो गोपानसीति विवेकः। अतएव हरितत्वालम्बनादिगुणक्रिया निमित्तत्वान्नीध्रैरिवेति जातिस्वरूपोत्प्रेक्षा ॥ ४९ ॥

बृहदिति। या पूः बृहत्यस्तुला उपरिस्थाप्यदार्वाधारभूतानि स्तम्भाग्रपीठानि येषु तैः बृहत्तुलैः तथाप्यतुलः तद्रहितैरिति

चिक्रंसया कृत्रिमपत्त्रिपङ्क्तेः
कपोतपालीषु निकेतनानाम्।
मार्ज्जारमप्यायतनिश्चलाङ्गं
यस्यां जनः कृत्रिममेव मेने ॥ ५१ ॥

विरोधः अनुपमैरित्यविरोधः। तुला माने पलशते सादृश्ये राशि भाण्डयोः। गृहाणान्दारुबन्धाय पीथामिति हेमः। वितानानामुल्लोचानां मालाभिः पङ्क्तिभिः पिनद्धैराच्छादितैः तथाप्य वितानैस्तद्रहितैरिति विरोधः अशून्यैरित्यविरोधः समस्तवस्तु समृद्धैरित्यर्थः। अस्त्री वितानमुल्लोचोवितानम्त्रिषु तुच्छकमित्यु भयत्राप्यमरः। विचित्रैरालेख्यरहितैरपि सचित्रैः तत्सहितैरिति विरोधः। विचित्रैरद्भुतैरिति] परिहारः। आलेख्याश्चर्य्ययोश्चित्रमित्यमरः। विगताः शाला गृहैकदेशा येषां तानि। शाला गृहे तरुस्कन्धे शाखागारैकदेशयोरिति विश्वः। तैः विशालैरपि भूरिशालैः प्रचुरगृहैकदेशविशिष्टैरिति विरोधः विशालैः पृथुलैरित्यविरोधः। विशालं पृथुलं महदित्यमरः। वेः शालच्छङ्कटचाविति शालच् प्रत्ययः। गृहैः रेजे। अपिरयं सर्व्वत्र विरोधे विरुद्धवदाभासाद्विरोधालङ्कारः। विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचइति काव्यप्रकाशलक्षणात् ॥ ५० ॥

चिक्रंसयेति। यस्यां पुरि निकेतनानां वेश्मनां। वेश्म सद्म निकेतनमित्यमरः। कपोतान्पक्षिणः पालयन्तीति कपोतपाल्यो विटङ्कापरनामानः स्तम्भाग्रप्रसारिताः दारुविशेषाः। कपोतपालिकायान्तु विटङ्कं पुन्नपुंसकमित्यमरः। कर्म्मण्यणि ङीप्।

क्षितिप्रतिष्ठोऽपि मुखारविन्दै-
र्वधूजनश्चन्द्रमधश्चकार।
अतीतनक्षत्रपथानि यत्र
प्रासादशृङ्गाणि वृथाध्यरुक्षन् ॥ ५२ ॥

तासु कृत्रिमपत्रिणां दारुमयपक्षिणां पङ्क्तिः। कर्मणि षष्ठी। चिक्रंसया क्रमितुमिच्छया जिघृक्षयेत्यर्थः। क्रमेः सन्नन्तादप्रत्यया दित्याकारप्रत्यये टाप् स्नुक्रमोरनात्मनेपदनिमित्ते इतीडागमो न भवति। अत्र क्रमेर्वृत्त्यादिव्यतिरिक्तार्थेऽप्यनुपसर्गादेति वैकल्पिक स्यात्मनेपदनिमित्तस्यानुपसर्गत्वस्य वैवक्षिकस्य सम्भवात्। आयत मानतं वा निश्चलमङ्गं यस्य तं मार्जारं बिडालमपि। ओतु र्बिडालो मार्जार इत्यमरः। जनः कृत्रिमं क्रियानिर्वृत्तमेव मेने न तु वास्तवमित्यर्थः। क्त्रिः क्त्रि. क्षेमम्नित्यमिति मम्प्रत्ययः। अनेन कृत्रिमाकृत्रिमभेदादुर्ग्रहइति शिल्पज्ञानातिशयोक्तिः अत्र कविकल्पितसादृश्यान्मार्जारजनयोः कृत्रिमाकृत्रिमेषु विपरीत मतिवर्णनाद्भ्रान्तिमदलङ्कारः ॥ ५१ ॥

क्षितीति। यस्यां पुरि वधूजनः क्षितौ प्रतिष्ठा यस्य सः भूमि स्थितोऽपि चन्द्रं दिवि स्थितमिति भावः। तथापि मुखैरेवा रविन्दैरधश्चकारेति विरोधः स्वलावण्यमहिम्ना अधरीचकारेति परिहाराद्विरोधालङ्कारः। अतीतानि नक्षत्रपथमतीतनक्षत्र पथानि। अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः द्विगु प्राप्तापन्नेत्यादिना परवल्लिङ्गताप्रतिषेधः। प्रासादशृङ्गाणि वृथा अध्यरुक्षन् अधिरोहन्ति स्म अनधिरुह्यैवाधःकरणादिति भावः।

रम्या इति प्राप्तवतीः पताका
रागं विविक्ता इति वर्द्धयन्तीः।
यस्यामसेवन्त नमद्वलीकाः
समं वधूभिर्वलभीर्युवानः ॥ ५३ ॥

रोहतेर्लुङ् शलइगुपधादनिटः क्सइति च्लेः क्सादेशः। अत्राधःकरण वाक्यार्थस्य श्लेषविरोधोपजीव्यवैयर्थ्ये हेतुत्वात्सङ्कीर्णः काव्यलिङ्गभेदः ॥ ५२ ॥

रम्या इति। यस्यां पुरि युवानो रम्या रमणीया इति हेतोः पताकाः प्राप्तवतीः उच्छ्रितध्वजा इत्यर्थः। अन्यत्र रम्या इत्येवं पताकाः प्राप्तवतीः प्रसिद्धिङ्गता इत्यर्थः। पताका वैजयन्त्याञ्च सौभाग्येऽङ्कध्वजेऽपि च। इति हेतौ प्रकरणे प्रकारादिसमाप्तिष्वित्युभयत्रापि विश्वः। विविक्ता विजना विमलाश्च इति हेतोः रागं वर्द्धयन्तीः। विविक्तौ पूतविजनावित्यमरः। नमद्वलीकाः नम्रनीध्राः। वलीकनीध्रे पटलप्रान्त इत्यमरः। अन्यत्र नमन्त्योवल्यस्त्रिवल्याख्यामध्यरेखायासान्तानमद्वलीकाः। नद्यृतश्चेति कप्प्रत्ययः। वली मध्यमरेखोर्म्मिजीर्णलग्नहृदारुष्विति वैजयन्ती। वलभीः कूटागाराणि। कूटागारं तु वलभीत्यमरः। वधूभिः सममसेवन्त वधूसहिता असेवन्तेत्यर्थः। अत्र वधूनां वलभीनां च प्रकृतानामेव धर्म्मसाधर्म्म्येणौपम्यावगमात्केवलप्रकृतगोचरा तुल्ययोगिता न श्लेषः तत्र विम्बस्यापि श्लिष्टत्वनियमात्। यथाहुः। प्रस्तुतानान्तथान्येषां केवलं तुल्यधर्म्मतः। औपम्यं गम्यते यत्र सा मता तुल्ययोगितेति ॥ ५३ ॥

सुगन्धितामप्रतियत्नपूर्व्वां
बिभ्रन्ति यत्र प्रमदाय पुंसां।
मधूनि वक्त्राणि च कामिनीना
मामोदकर्म्मव्यतिहारमीयुः ॥ ५४ ॥
रतान्तरे यत्र गृहान्तरेषु
वितर्द्दिनिर्य्यूहविटङ्कनीडः।
रुतानि शृण्वन् वयसाङ्गणोऽन्ते
वासित्वमाप स्फुटमङ्गनानाम् ॥ ५५ ॥

सुगन्धितामिति। यत्र पुरि न प्रतियत्नः संस्कारः पूर्व्वो यस्या स्तामप्रतियत्नपूर्व्वामकृत्रिमां स्वाभाविकीमित्यर्थः। प्रतियत्नस्तु संस्कारइति वैजयन्ती। शोभनोगन्धोयेषां तेषां भावस्तत्ता तां सुगन्धितां सौरभ्यं बिभ्रन्ति बिभ्राणानि। वा नपुंसकस्येति नुमागमः। मधूनि मद्यानि कामिनीनां वक्त्राणि च यूनां प्रमदाय प्रीत्यै आमोदकर्म्मणोवासनाधानस्य व्यतिहारं परस्परकरणमीयुः अन्योन्य गन्धेन अन्योन्यं वासयामासुरित्यर्थः। इणोलिट्। अत्रापि मधूनां वक्त्राणां च प्रकृतत्वात्तत्पूर्व्वकएव तुल्ययोगिताभेदः तेन यूनां मधु वासितवधूवदनपानं वदनवासितगण्डूषपानञ्च वस्तु व्यज्यते तेन च निरातङ्कभोगाः पौराइति गम्यते ॥ ५४ ॥

रतान्तरइति। यत्र पुरि गृहान्तरेषु वितर्द्दयोविहारवेदिकाः। स्याद्वितर्द्दिस्तु वेदिकेत्यमरः। तासां निर्य्यूहामत्तवारणाख्या उपाश्रयाः। निर्य्यूहोमत्तवारणइति वैजयन्ती। तेषां विटङ्काः उपरितन्यः कपोतपालिकाः तएव नीडाः कुलायाः यस्य सः।

छन्नेष्वपि स्पष्टतरेषु यत्र
स्वच्छानि नारीकुचमण्डलेषु ।
आकाशसाम्यं दधुरम्बराणि
न नामतः केवलमर्थतोऽपि ॥ ५६ ॥

कुलायो नीडमस्त्रियामित्यमरः । वयसां शुकसारिकादिपक्षिणा ङ्गणः । वयः पक्षिणि बाल्यादाविति विश्वः । अङ्गनानां विलर्दिषु रममाणानामिति भावः । रतान्तरे रुतानि रतिकूजितानि शृखन् अन्ते समीपे वसन्तद्दत्यन्तेवासिनः शिष्याः । छात्रान्तेवासिनो शिष्यद्दत्यमरः । शयवासवासिष्वकालादित्यलुक् । तेषां भावस्तत्त्व माप । समीपे प्रतिशब्दं यथाश्रुतमुच्चारणादेवमुत्प्रेक्ष्यते । अतएव स्फुटमिति व्यञ्जकप्रयोगः ॥ ५५ ॥

छन्नेष्विति । यत्र पुरि छन्नेषु आच्छादितेषु । वा दान्तेत्या दिना वैकल्पिको निपातः । स्पष्टतरेषु स्फुटतरं लक्ष्यमाणेष्वित्यर्थः । नारीकुचमण्डलेषु स्वच्छानि स्फटिकाश्विदतिरोधायकानि अम्बराणि वस्त्राणि केवलं नामतोऽम्बरमिति नाम्नैवाकाशसाम्यं न दधुः । अम्बरं व्योम्नि वाससीति विश्वः । किन्तु अर्थतोऽपि अर्थ क्रिययापि तत्साम्यन्दधुः । स्वयमतिसूक्ष्मत्वादव्यवधायकत्वं दृश्याद्रे मूर्त्तान्तरगत्यविघातित्वञ्चेत्यादिनापि साम्यन्दधुरित्यर्थः । उपमा लङ्कारः ॥ ५६ ॥

यस्यामिति । यस्यां पुरि अजिह्माः अवक्राः अन्यत्राकपटाः दम्भादिरहिताद्दत्यर्थः । आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथेति स्मरणादिति भावः । जिह्मः कपटवक्रयोरिति विश्वः ।

यस्यामजिह्मा महतीमपङ्काः
सीमानमत्यायतयोऽत्यजन्तः ।
जनैरजातस्खलनैर्न जातु
द्वयेऽप्यमुच्यन्त विनीतमार्गाः ॥ ५७ ॥

अपङ्काः कर्द्दमरहितानिष्पापाश्च । पङ्कोऽघे कर्द्दम इति हैमः । महतीं सीमानं राजकल्पितक्षेत्रमानं मर्य्यादां कुलागतानुष्ठानस्थितिञ्च अत्यजन्तः अत्यक्रमन्तः अमर्य्यादा इत्यर्थः । अतिमात्रा आयतिरायामः उत्तरकालश्च येषां ते अत्यायतयः । आयतिस्तूत्तरे काले संयमायामयोरपीति विश्वः । द्वये द्विरूपा अपि । प्रथमचरमतयेत्यादिना जसि विभाषया सर्व्वनामसंज्ञा । विनीतमार्गाः सुरचितपुरवीथयः सुशिक्षिताचारपद्धतयश्च न जातं स्खलनं पाषाणादिप्रतिघातो विरुद्धाचरणं च येषां तैर्जनैः जातु कदाचिदपि नामुच्यन्त न त्यक्ताः न कदाचित् खिलीकृता इत्यर्थः । अत्र मार्गशब्दस्य साधर्म्यादेकवृन्तावलम्बिफलद्वयवदेकशब्देनार्थद्वयप्रतीतेः द्वयानामपि मार्गाणां प्रकृतत्वाच्च केवलप्रकृतविषयोऽर्थश्लेषः । विशेष्यस्यापि श्लिष्टत्वान्न तुल्ययोगिता ॥ ५७ ॥

परस्परेति । यत्र पुरि परस्परस्पर्द्धीन्यहमहमिकयान्योन्यसामर्षाणि परार्द्ध्यानि श्रेष्ठानि रूपाणि सौन्दर्य्याणि यासान्ताः । रूपं स्वरूपे सौन्दर्य्ये इति विश्वः । पुरे भवाः पौराः ताः स्त्रियः पौरस्त्रियः । स्त्रियाः पुंवदित्यादिना पुंवद्भावः । विधाय निर्माय वेधाः स्रष्टा श्रियो लक्ष्मीदेव्याः निर्मित्या निर्माणेन प्राप्तं यत् गुणेन वज्रकीटेन घुणेनोत्कीर्णस्यैकवर्णस्य उपमया साम्येन वाच्य

परस्परस्पर्द्धिपरार्द्धरूपाः
पौरस्त्रियो यत्र विधाय वेधाः ।
श्रीनिर्म्मितिप्राप्तघुणक्षतैक
वर्णोपमावाच्यमलं ममार्ज्ज ॥ ५८ ॥

क्षुण्णं यदन्तःकरणेन वृक्षाः
फलन्ति कल्पोपपदास्तदेव ।
अध्यूषुषोयामभवन् जनस्य
याः सम्पदस्तामनसोऽप्यगम्याः ॥ ५९ ॥

मपवादः तदलमत्यन्तं तदेव मलमिति केचित् ममार्ज घुणाक्षर
वत् यादृच्छिकमिदं श्रीदेवतासौन्दर्य्यशिल्पं न कौशलमित्ययशः
क्षालितवानित्यर्थः । अनया चातिशयोक्त्या पौरस्त्रीणां रमातस्मान
सौन्दर्य्यं वस्तु व्यज्यते ॥ ५८ ॥

क्षुण्णमिति । यदन्तःकरणेन क्षुण्णमभ्यस्तं ममेदम्भूयादिति
भूयोभूयः सङ्कल्पितमित्यर्थः कल्पयन्ति सङ्कल्पितार्थानिति कल्पाः
कल्पाइत्युपपदं व्यावर्त्तकं येषां ते कल्पोपपदाः वृक्षाः कल्पवृक्षाः
तदेव फलन्ति निष्पादयन्ति । फलनिष्पत्ताविति धातोर्लट् । किन्तु
यां पुरमध्यूषुषोयस्यामुषितवन्तः । उपान्वध्याङ्वसइति कर्म्मत्वं
भाषायां सदवसश्रुवइति क्वसुप्रत्ययः । जनस्य याः सम्पदो
ऽभवन् तामनसोऽप्यगम्याः वाचामभूमयइति किमु वक्तव्यमिति
भावः । गृहे गृहे कल्पवृक्षसम्पन्नातिशयोक्त्या पौराणां देवभोगे।
व्यज्यते। इह कल्पइत्युपपदं स्वसंज्ञैकदेशोयेषामिति व्याख्याने
हिरण्यपूर्व्वं कशिपुमित्यादिवदवाच्यवचनदोषावकाशः ॥ ५९ ॥

कलादधानः सकलाः स्वभाभि
रुद्भासयन् सौधसिताभिराशाः ।
यां रेवतीजानिरियेष हातुं
न रौहिणेयो न च रोहिणीशः ॥ ६० ॥

बाणाहवव्याहतशम्भुशक्ते
रासत्तिमासाद्य जनार्दनस्य ।
शरीरिणा जैत्रशरेण यत्र
निःशङ्कमूषे मकरध्वजेन ॥ ६१ ॥

कलादिति । सकलाः समग्राः कलाश्चतुःषष्टिविद्याः षोडश भागांश्च दधानः । कला शिल्पे कालभेदइति । कला तु षोडशोभाग इति चामरः । सुधयावलिप्तं सौधन्तद्वत्सिताभिः स्वभाभि राशादिश उद्भासयन् रेवती ककुद्मिकन्या पूर्षकं भत्र जाया यस्य स रेवतीजानिः । जायया निङिति समासान्तो निङादेशः लोपोव्योर्वलीति यलोपः । रोहिण्या अपत्यं पुमान् रौहिणेयः बलभद्रः । स्त्रीभ्योढक् । यां पुरीं हातुन्त्यक्तुं न इयेष नेच्छति स्म । लिट् । रोहिणीशश्चन्द्रश्च हातुं न इयेष । अत्र रौहिणेयरोहिणी शयोः परोत्कर्षावस्थेम इयोः प्रकृतत्वादिश्लेषस्याश्लिष्टत्वाच्च केवलप्रकृतविषया तुल्ययोगिता । गतमन्यत् ॥ ६० ॥

बाणेति । यत्र पुरि बाणाहवे बाणासुरयुद्धे व्याहता व्यर्थीता शम्भुशक्तिर्येन तस्य हरविजयिनो जनार्दनस्य कृष्णस्यासत्तिं सत्याधत्तिमासाद्य पुनलं प्राप्येत्यर्थः शरीरिणा विग्रहवता न त्वनङ्गेनेति भावः । जेतारएव जैत्राः जयशीलाः । तृन्नन्तात्प्रज्ञादित्वा

निषेव्यमाणेन शिवैर्मरुद्भि-
रध्यास्यमाना हरिणा चिराय ।
उद्रश्मिरत्नाङ्कुरधाम्नि सिन्धा-
वाह्वास्त मेरावमरावतीं या ॥ ६२ ॥

ल्युट् प्रत्ययः । ते शरायस्य तेन मकरध्वजेन कामेन प्रद्युम्नरूपेणेति भावः । निःशङ्कं निर्भीकमूषे उषितं । वस निवासे भावे लिट् वचिस्वपीत्यादिना सम्प्रसारणम् । शङ्का वितर्कभययोरिति विश्वः । अत्र शम्भुशक्तिव्याघातपदार्थस्य विशेषणगत्या निःशङ्कनिवासहेतुत्वोक्तेः काव्यलिङ्गभेदः । पुरा किल भगवान् भक्तवत्सलो धूर्जटिर्बाणप्रेम्णा बाणाभियोधिनं हरिमभियुज्य निर्ज्जितइति पौराणिकाः कथयन्ति ॥ ६१ ॥

निषेव्यमाणेनेति । शिवैर्मरुद्भिर्मन्दमारुतैः अन्यत्र शिवैरुद्रैर्मरुद्भिर्मरुद्गणैश्च चिराय निषेव्यमाणेन हरिणा श्रीकृष्णेन शक्रेण चाध्यास्यमाना अधिष्ठीयमाना उद्रश्मीनां रत्नाङ्कुराणां धाम्नि स्थाने एकत्र रत्नाकरत्वादन्यत्र रत्नसानुत्वाच्चेति भावः सिन्धौ स्थितेति शेषः या पूर्मेरौ स्थितामभरायस्यां सन्तीत्यमरावती मिन्द्रनगरीं । मतौ बह्वचोनाजिरेति दीर्घः संज्ञायां मादुपधायाश्चेति वत्वं । आह्वास्त स्पर्द्धया आहूतवती अमरावतीमनुचकारेत्यर्थः । ह्वयतेर्लुङ् स्पर्द्धायामाङः इत्यात्मनेपदं लिपिसिचिह्वश्चेति आत्मनेपदेष्वन्यतरस्यामिति च्लेरङभावपक्षे सिजादेशः । अत्र प्रथमार्थे श्लेषेऽपि सिन्धौ मेरौ स्थितेति प्रतिबिम्बभावेन साधर्म्योक्तेः श्लेषानुप्राणितेयमुपमेति सङ्क्षेपः ।

स्निग्धाञ्जनश्यामरुचिः सुवृत्तो
वध्वा इवाध्वंसितवर्णकान्तेः ।
विशेषको वा विशिशेष यस्याः
श्रियं त्रिलोकीतिलकः स एव ॥ ६३ ॥

आङ्काङ्क्षेति साहश्यप्रतिपादकः शब्दः स्पर्द्धते क्रुयते द्वेष्टीत्यनु शासनात् ॥ ६२ ॥

स्निग्धेति । स्निग्धं यदञ्जनं तद्वत्तेन च श्यामरुचिः सुवृत्तः सद्वृत्तिः सुष्ठु वर्त्तुलश्च । त्रयाणां लोकानां समाहारस्त्रिलोकी । तद्धितार्थेत्यादिना समासः सङ्ख्यापूर्वो द्विगुरिति द्विगुसंज्ञा अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यत इति स्त्रीत्वं द्विगोरिति ङीप् । तस्यास्तिलको भूषणभूतः स हरिरेव विशेषको वा तिलक इवेत्यर्थः । इववद्वा यथाशब्दा इत्यनुशासनात् । तमालपत्रतिलक चित्रकाणि विशेषकम् द्वितीयञ्च तुरीयञ्च न स्त्रियामित्य मरः । अध्वंसिता वर्णानां ब्राह्मणादीनां कान्तिरौज्ज्वल्यं यस्याः तस्याः पुरः अन्यत्राध्वंसितो वर्णो गौरादिः कान्तिर्लावण्यं च यस्यास्तस्याः । वर्णो द्विजादौ शुक्लादावित्युभयत्राप्यमरः । वध्वा इव श्रियं विशिशेष विशेषितवान् । अनेकशब्देयमुपमेत्येके । शब्दसाम्याद्वाहुश्यात् श्लेष इत्यन्ये । श्लेषोपमेत्याह दण्डी ॥ ६३ ॥

तामिति । अतुलप्रतापः स हरिः तां पूर्वाशां पुरमीक्षमाणः पुरस्तात् पूर्वस्यान्दिशि । सप्तम्यर्थे तसिल् प्रत्ययः । प्रतोलीं रथ्यां । रथ्या प्रतोली विशिखेत्यमरः । प्रापत् प्राप्तवान् । लुङि पुषादित्या दिना च्लेरङादेशः । वज्राणां तोरणप्रासादादिगतहीरकादि

तामीक्षमाणः स पुरं पुरस्ता
त्प्रापत्प्रतोलीमतुलप्रतापः ।
वज्रप्रभोद्भासिसुरायुधश्री
र्या देवसेनेव परैरलङ्घ्या ॥ ६४ ॥

प्रजा इवाङ्गादरविन्दनाभेः
शम्भोर्जटाजूटतटादिवापः ।
मुखादिवाथ श्रुतयो विधातुः
पुरान्निरीयुर्मुरजिद्ध्वजिन्यः ॥ ६५ ॥

मणीनां प्रभाभिरुद्भासिनी सुरायुधश्रीरिन्द्रचापलक्ष्मीर्यस्यां सा । इह वज्रग्रहणं मणिमात्रोपलक्षणं अन्यथेन्द्रायुधासाम्यादिति भावः । अन्यत्र वज्रस्य कुलिशस्य प्रभाभिरुद्भासिनी सुरायुधानामितर देवतायुधानां श्रीर्यस्याः सा । वज्रोऽस्त्री हीरके पवावित्यमरः । या प्रतोली देवसेना सुरचमूरिव परैः शत्रुभिरलङ्घ्या दुष्प्रधर्ष्या ॥ ६४ ॥

प्रजा इति । अरविन्दनाभेर्विष्णोरङ्गात् प्रजा इव । यतो वा इमानि भूतानि जायन्त इति श्रुतेरिति भावः । शम्भोर्जटाजूट तटादाप इव गङ्गाजलानीव विधातुर्मुखात् श्रुतय इव मुरजितो हरेः ध्वजिन्यः सेनाः पुरान्निरीयुः निर्गताः । मालोपमेयं ॥ ६५ ॥

श्लिष्यद्भिरिति । अन्योन्येषां मुखाग्रेषु सङ्गेन स्खलन्तः खलीनाः कविकायस्मिन्कर्मणि तद्यथा तथा । कविका तु खलीनोऽस्त्री त्यमरः । श्लिष्यद्भिः संघृष्यद्भिः विलोलैः मुहुश्चलद्भिर्हरिभि स्तुरङ्गैः करणैरश्वान् वारयन्ति ये तेऽश्ववाराः अश्वारोहाः परस्परेण

स्निग्धद्भिरन्योन्यमुखाग्रसङ्ग
स्खलत्खलीनं हरिभिर्विलोलैः ।
परस्परोत्पीडितजानुभागा
दुःखेन निश्चक्रमुरश्ववाराः ॥ ६६ ॥

निरन्तरालेऽपि विमुच्यमाने
दूरं पथि प्राणभृतां गणेन ।
तेजोमहद्भिस्तमसेव दीपै
र्द्विपैरसम्बाधमयाम्बभूवे ॥ ६७ ॥

त्पीडितजानुभागाः सन्तो दुःखेन निश्चक्रमुः निर्जग्मुः । अत्र स्वभावोक्त्यातिशयोक्तेः सङ्करः ॥ ६६ ॥

निरन्तरालइति । तमसा तिमिरेणेव प्राणभृतां गणेन प्राणिवर्गेण कर्त्रा निरन्तरालेऽपि पूर्वं स्वैनैवातिसङ्कटेऽपि पथि सम्प्रति दूरं दूरतएव विमुच्यमाने सति एकत्र दीपभयादन्यत्र द्विपभयाच्चेत्यर्थः । तेजोमहद्भिर्बलाधिकैः प्रभासम्पन्नैश्च । तेजोबलप्रभा तेजइति विश्वः । द्विपैर्दीपैरिवासम्बाधमसङ्कीर्णमयाम्बभूवे अगमि । न त्वश्वैरिव कृच्छ्रादिति भावः । अय गतौ भावे लिट् दयायास इत्याम्प्रत्ययः । स्वतेजसैव दूरोत्सारिततमस्के दीपाइव तथोत्सारितप्राणिके पथि निरर्गलं द्विपाः प्रययुरित्यर्थः । तमसीति सप्तम्यन्तपाठे तु तमसः पथ्युपमानत्वे द्विपागमनात्पथइव तमसो दीपागमनात्प्राक्तनप्राणिवर्गेण निरन्तरालत्वं पश्चान्मुच्यमानत्वं च न सम्भवतीत्युपमानोपमेययोर्वैरूप्यं स्यात् । इतोयात्

शनैरनीयन्त रयात्पतन्तो
रथाः क्षितिं हस्तिनखादखेदैः ।
सयत्नसूतायतरश्मिभुग्न
ग्रीवाग्रसंसक्तयुगैस्तुरङ्गैः ॥ ६८ ॥

बलोर्मिभिस्तत्क्षणहीयमान
रथ्याभुजायावलयैरिवास्याः ।
प्रायेण निष्क्रामति चक्रपाणौ
नेष्टं पुरो द्वारवतीत्वमासीत् ॥ ६९ ॥

पाठे तमसः प्राणिवर्गोपमानत्वे तत्साहूप्यसाकल्यात्स एव साधीयानित्यालङ्कारिकाणां पन्थाः ॥ ६७ ॥

शनैरिति । रयात्पतन्तोधावन्तोरथाः सयत्नैः सूतैः सारथिभिः । सूतः चत्ता च सारथिरित्यमरः । आयताआकृष्टाये रश्मयः प्रग्रहाः । किरणप्रग्रहौ रश्मी इत्यमरः । तैर्भग्नेषु प्रक्रेषु ग्रीवाणामग्रेषु संसक्ताः युगाः युग्याः स्कन्धवाह्याः दारुविशेषाः येषां तैरत एवाखेदैरश्रमैः तुरङ्गैः हस्तिनखात् हस्तिनखः पूर्द्वारि मृत्कूटः । कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नित्यमरः । तस्माच्छनैः क्षितिमनीयन्त नीता इति स्वभावोक्तिः यथावद्वस्तुवर्णनात् ॥ ६८ ॥

बलोर्मिभिरिति । बलान्यूर्मयइव तैर्बलोर्मिभिः बलयैः कङ्कणैरिव तत्क्षणे हरिनिष्क्रमणक्षणएव हीयमाना अपरिच्छमाना रथ्या भुजेव यस्याः अतएवास्याः पुरोद्वारावत्याश्चक्रपाणौ कृष्णे निष्क्रामति निर्गच्छति सति प्रायेण भूम्ना द्वारवतीत्वं

पारेजलं नीरनिधेरपश्य
न्मुरारिरानीलपलाशराशीः ।
वनावलीरुत्कलिकासहस्र
प्रतिक्षणोत्कूलितशैवलाभाः ॥ ७० ॥

द्वारकात्वं स्वस्वरूपमिति यावत् इष्टं नासीत् हरिविरहे तद्वैफल्या दिति भावः । द्वारवतीशब्दस्य संज्ञात्वात् त्वतलोर्गुणवचनस्येति न पुंवद्भावः । अन्यत्र द्वारवतीत्वं द्वारवत्त्वं नेष्टं तस्य हरि निष्क्रमणहेतुत्वादित्युभयथाप्युपमितभुजवलयगलनहेतुत्वादुपमा सङ्कीर्णेयमनिष्टत्वोत्प्रेक्षा प्रायेणेत्यनेन व्यज्यते ॥ ६९ ॥

अथासर्गसमाप्तेः समुद्रं वर्णयति । पारइति । मुरारिर्नीरनिधेः समुद्रस्य जलानां पारे परतीरे पारेजलं । पारावारे परार्वाची तीरइत्यमरः । पारे मध्ये षष्ठ्या वेत्यव्ययीभावः । तत्संयोगादे कारान्तत्वं च पारेशब्दस्य । आसमन्तान्नीलाः पलाशानां पत्राणां राशयो यासान्ताः हरितपर्णपूर्णाइत्यर्थः । पत्रं पलाशं छदनमित्य मरः । अतएवोत्कलिकाऊर्मयः । ऊर्मिरुत्कलिकोल्लोलकल्लोल लहरिस्तथेति हलायुधः । तासां सहस्रैः प्रतिक्षणमुत्कूलिताः कूलमुद्गताः कूलं प्रापिताइत्यर्थः । उत्कूलशब्दात्तत्करोतीति ण्यन्तात्कर्म्मणि क्तः । तेषां शैवलानां आभेवाभा यासान्ताः तत्सदृशीरित्यर्थः वनावलीरपश्यत् । अत्रोत्कूलितशैवलस्य स्वतः सिद्धसन्देहादुपमोत्प्रेक्षयोः सन्देहसङ्करः ॥ ७० ॥

लक्ष्मीभृतइति । असौ हरिर्लक्ष्मीं शोभां श्रीदेवीं च बिभ र्तीति लक्ष्मीभृतस्ताम् अम्भोधितटे अधिवासोयेषां ताम् नीरदव

लक्ष्मीभृतोऽम्भोधितटाधिवासान्
द्रुमानसौ नीरदनीलभासः ।
लतावधूसम्प्रयुजोऽधिवेलं
बहुत्वतान्स्वानिव पश्यति स्म ॥ ७१ ॥
आश्लिष्टभूमिं रसितारमुच्चै
र्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगाना
मसावपस्मारिणमाशशङ्के ॥ ७२ ॥

नीलभासः नीलवर्णान् लतावध्वइवेत्युपमितसमासः अन्यत्र लता इव वध्वइति शाकपार्थिवादित्वान्मध्यमपदलोपी समासः । ताभिः सम्प्रयुज्यन्तइति सम्प्रयुजः सङ्गतान् । क्विप् । अधिवेलं वेलायां । विभक्त्यर्थेऽव्ययीभावः । द्रुमान् बहुत्वताननेकीकृतान् स्वान् स्वकीय विग्रहानिवेत्यर्थः । एवञ्च पुंलिङ्गतानिर्वाहः । आत्मपरत्वे नपुंसकत्वापातः । स्वोज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धनइत्यमरः । पश्यति स्म श्लेषसङ्कीर्णेयमुत्प्रेक्षा ॥ ७१ ॥

आश्लिष्टेति । आश्लिष्टभूमिमालिङ्गितभूतलं उच्चैस्तारं रसितारं क्रन्दितारं लोलतां चञ्चलतामितस्ततः पततां भुजानां आकारइव आकारोयेषां ते बृहत्तरङ्गायस्य तन्तथोक्तं फेनायमानं फेनमुद्वमन्तं । फेनाच्चेति वक्तव्यमिति क्यङ् । अपां समूहआपं । तस्य समूहइत्यण् । तेन गच्छन्तीत्यापगाः तासां पतिं समुद्रं असौ हरिरपस्मारिणमपस्माररोगिण

पीत्वा जलानान्निधिनातिगार्ध्या
वृद्धिङ्गतेऽप्यात्मनि नैव मान्तीः ।
क्षिप्ताइवेन्दोः स रुचोऽधिवेलं
मुक्तावलीराकलयाञ्चकार ॥ ७२ ॥

माश्यक्के । तत्कर्म्मयोगात्तथा उत्प्रेचाञ्चक्रे इत्यर्थः । यथाऽऽ वैदानिकाः । क्रुद्धैर्धातुभिराहतेऽथ मनसि प्राणी मनः सन्दिश न्दन्तान् खादति फेनमुद्गिरति दोःपादौ चिपन्मूढधीः । पश्यन् रूपमसत्स्थितौ निपतति व्यर्थाङ्करोति क्रियां बिभ्यत्स स्वयमेव शाम्यति गते वेगे त्वपस्माररुक् ॥ ७२ ॥

पीत्वेति । जलानां निधिना समुद्रेण गर्द्ध एव गार्द्ध्यं । औपम्या दिवचातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् । तदतिमात्रमतिगार्द्ध्यं तस्मात्तृष्णा भरादित्यर्थः । गृध्नोः पुनरोर्गुणः वान्तोयिप्रत्यये इति गार्द्धव्य मिति स्यात् । पीत्वा चेपणक्रियापेचया पूर्व्वकालता अथ वृद्धिं गते आत्मनि देहे । चन्द्रोदये समुद्रस्य वृद्धिरित्यागमः । नैव मान्ती रमान्तीः अतिरिच्यमाना इत्यर्थः । मातेः शतरि ङीप् आच्छीनद्योर्नुम् । चिप्ताउद्गीर्णा अतितृष्णयोत्कटं पीत्वा अन्त रमानादवहिरुद्वान्तादित्यर्थः । इन्दोरुचोमरीचीरिवेत्युत्प्रेचा स हरिरधिवेलमधितीरं । वेला कूलविकारयोरिति विश्वः । मुक्ता वलीराकलयाञ्चकार आकलयामास कलतिः कामधेनुः ॥ ७२ ॥

साटोपमिति । अमी मेघाः साटोपं ससम्भ्रमं । सम्भ्रमाटोप संरम्भाइति यादवः । अनिशं नदन्तोगर्ज्जन्तोयैस्तोयैरम्भोभिरुर्वीं समन्ततः स्नावयिष्यन्ति तान्यम्भांसि पयोधेरेकदेशादेककोणा

साटोपमुर्वीमनिशं नदन्तो
यैः प्लावयिष्यन्ति समन्ततोऽमी ।
तान्येकदेशान्निभृतं पयोधेः
सोऽम्भांसि मेघान् पिबतो ददर्श ॥ ७४ ॥

उद्धृत्य मेघैस्तत एव तोय
मर्थं मुनीन्द्रैरिव सम्प्रणीताः ।
आलोकयामास हरिः पतन्ती
र्नदीः स्मृतीर्वेदमिवाम्बुराशिम् ॥ ७५ ॥

निभृतं निश्चलं यथा तथा पिबतो मेघान् स हरिर्ददर्श । एतेन समुद्रस्यापरिच्छिन्नरूपत्वं व्यज्यते ॥ ७४ ॥

उद्धृत्येति । मुनीन्द्रैस्ततो वेदात् वेदार्थमिव मेघैस्ततोऽम्बुराशे रेव तोयमुद्धृत्य सम्प्रणीताः कृताः अम्बुराशिं पतन्तीः प्रविशन्ती र्नदीर्वेदं पतन्तीः स्मृतीर्मन्वादिसंहिता इव हरिरालोकयामास । श्रुतिमूलत्वेनैव प्रामाण्यात् स्मृतीनां तत्सम्बाद एव तत्सम्प्रवेशः । अनेकेवेदमुपमा ॥ ७५ ॥

विक्रीयेति । दिक्षु भवानि दिश्यानि दिगन्तरानीतानीत्यर्थः । दिगादिभ्योयत् । उरूणि महान्ति धनानि नानाद्रव्याणि विक्रीय मूल्येन दत्त्वा उत्तमलाभं द्विगुणादिकं भजन्तीति तानुत्तमलाभ भाजः तत्रत्यं द्वैप्यमित्यर्थः । अव्ययात्यप् । अफल्गु सारवत् । फल्गु तुच्छमसारं चेति यादवः । भाण्डं मूलधनं पण्यद्रव्यमित्यर्थः । वणिङ्मूलधने पात्रे भाण्डं भूषाश्वभूषयोरिति वैजयन्ती । तरीषु नौषु । स्त्रियां नौस्तरणिस्तरिरित्यमरः । अविस्तरिः त्रिरित्यौ

विक्रीय दिश्यानि धनान्युरूणि
द्वैप्यानसावुत्तमलाभभाजः ।
तरीषु तत्रत्यमफल्गुभाण्डं
सांयात्रिकानावपतोऽभ्यनन्दत् ॥ ७६ ॥
उत्पित्सवोऽन्तर्नदभर्त्तुरुच्चै
र्गरीयसा निःश्वसितानिलेन ।
पयांसि भक्त्या गरुडध्वजस्य
ध्वजानिवोच्चिक्षिपिरे फणीन्द्राः ॥ ७७ ॥

ण्यादिकः इकारप्रत्ययः । आवपत आदधतः । वपतेः शतृप्रत्ययः । द्वैप्यान् समुद्रद्वीपवासिनः । द्वीपादनुसमुद्रं यञिति यञ्प्रत्ययः । संयात्रा सम्भूय यात्रा सा प्रयोजनमेषान्तान् सांयात्रिकान् पोतवणिजः । सांयात्रिकः पोतवणिगित्यमरः । प्रयोजनमिति ठक् । असौ हरिरभ्यनन्दत् ॥ ७६ ॥

उत्पित्सव इति । नदभर्त्तुः समुद्रस्यान्तरभ्यन्तरात् उत्पित्सवः उत्पतितुमिच्छवः । पततेः सन्नन्तादुप्रत्ययः सनि मीमे त्यादिना इसादेशः अत्र लोपोऽभ्यासस्येति अभ्यासलोपः । फणीन्द्रा भक्त्या गरुडध्वजस्य हरेर्ध्वजानिव गरीयसातिमहता निःश्वसितानिलेन पयांस्युच्चैरुच्चिक्षिपिरे उत्क्षिप्तवन्तः । उत्प्रेक्षा । स्वरितत्वादात्मनेपदम् ॥ ७७ ॥

तमिति । अम्बुराशिः युगान्तबन्धुमापद्बन्धुमित्यर्थः उत्सङ्ग एव शय्या तस्यां शेत इति तथोक्तं । अधिकरणे शेते इत्यच्प्रत्ययः । आगतमभ्यागतन्तं हरिं वीक्ष्य गुरुणा प्रमोदेन प्रसारिता

तमागतं वीक्ष्य युगान्तबन्धु
मुत्सङ्गशय्याशयमम्बुराशिः ।
प्रत्युज्जगामेव गुरुप्रमोद
प्रसारितोत्तुङ्गतरङ्गबाहुः ॥ ७८ ॥

उत्सङ्गिताम्भःकणको नभस्वा
नुदन्वतः स्वेदलवान्ममार्ज ।
तस्यानुवेलं व्रजतोऽधिवेल
मेलालतास्फालनलब्धगन्धः ॥ ७९ ॥

उत्तुङ्गास्तरङ्गा एव बाहवो यस्य सः सन् प्रत्युज्जगाम सम्मिलनार्थ मागतवानिवेति क्रियास्वरूपोत्प्रेक्षा ॥ ७८ ॥

उत्सङ्गेति । उत्सङ्गिनः संसर्गिणः कृताः उत्सङ्गिताः । तत्करोतीति ण्यन्तात् कर्म्मणि क्तः । उत्सङ्गिताः अम्भःकणा येनेति शेषाद्विभाषेति कप् । एलालतानां आस्फालनेन सङ्घर्षणेन लब्धगन्धः एवं शिशिरसुरभिरुदन्वतो नभस्वान्समुद्रस्य वायुः अधिवेलं वेलायां । विभक्त्यर्थेऽव्ययीभावः । व्रजतस्तस्य हरेः स्वेदलवाननुवेलं प्रतिक्षणं । याथार्थ्येऽव्ययीभावः । ममार्ज्ज जहार । वेला कूले च जलधेर्वेला तीरविकारयोरिति विश्वः । काव्यलिङ्गम् ॥ ७९ ॥

उत्तालेति । चमूषु चरन्तीति चमूचराः सैनिकाः । चरेष्ट इति टप्रत्ययः । तैरुत्तालेषून्नतेषु तालीवनेषु सम्प्रवृत्तेन समीरणेन मारुतेन सीमन्तिताः सीमन्तिन्यः कृताः । सीमन्त शब्दात्सीमन्तात्तत्करोतीति ण्यन्तात्कर्मणि क्तः णाविष्टवद्भावे

उत्तालतालीवनसम्प्रवृत्त
समीरसीमन्तितकेतकीकाः ।
आसेदिरे लावणसैन्धवीनां
चमूचरैः कच्छभुवां प्रदेशाः ॥ ८० ॥

लवङ्गमालाकलितावतंसा
स्ते नारिकेलान्तरपः पिबन्तः ।
आस्वादितार्द्रक्रमुकाः समुद्रा
दभ्यागतस्य प्रतिपत्तिमीयुः ॥ ८१ ॥

विन्मतोर्लुक् । ताः केतक्यो येषु ते तथोक्ताः । नद्यृतश्चेति कप् । लवणसिन्धोरिमाः लावणसैन्धव्यः । तस्येदमित्यण् हृद्भगसिन्ध्वन्ते पूर्वपदस्येत्युभयपदवृद्धिः । तासां कच्छभुवामनूपभूमीनां । जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः । प्रदेशा देशा आसेदिरे प्राप्ताः । सीदतेः कर्मणि लिट् । अत्र स्वभावोक्तिरनुप्रासश्चालङ्कारौ । ओजःश्लेषसौशब्द्यसौकुमार्याद्यनेकगुणसम्पत्तिः स्पष्टा ॥ ८० ॥

लवङ्गेति । लवङ्गमालाभिः लवङ्गकुसुममाल्यैः कलितावतंसाः कृतभूषणाः । नारिकेलान्तरित्यव्ययं । नारिकेलाभ्यन्तर इत्यर्थः । अप इति पृथक्पदं । समासे ऋक्पूरित्यादिना समासान्तप्रसङ्गात् । पिबन्तः आस्वादिताः भक्षिताः आर्द्रक्रमुका आर्द्रपूगीफलानि यैस्ते । घोण्टा तु पूगः क्रमुक इत्यमरः । ते चमूचराः समुद्रादभ्यागतस्यातिथेः प्रतिपत्तिं गौरवं सत्कारमीयुः । प्रतिपत्तिः पदप्राप्तौ प्रवृत्तौ गौरवेऽपि चेति विश्वः । अत्राभ्यागतप्रतिपत्ति

तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः
प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता।
परिचलतो बलानुजबलस्य पुरः सततं धृतश्रिय
श्चिरविगतश्रियः सलिलनिधेश्च तदाभवदन्तर
महत् ॥ ८२ ॥

प्राप्तेर्विशेषणगत्या अवतंसकलशादिपदार्थहेतुत्वात्काव्यलिङ्गमल ङ्कारः । तेन समुद्रस्य भूधराणां गृहस्थाभ्यागतोपम्यप्रतीतिरल ङ्कारेणालङ्कारध्वनिः ॥ ८१ ॥

तुरगेति । परितस्तुरगशतैराकुलस्य अपरिमिताश्वस्येत्यर्थः प्रति पथं प्रतिमार्गं। याथार्थ्येऽव्ययीभावे समासान्तः। प्रमथिताः क्षुण्णाः भूभृतो राजानो गिरयश्च येन तस्य न तु स्वयं केनापि मथितस्येति भावः । सततं धृता श्रीः शोभा रमा च येन तस्य धृतश्रियः पुरोऽग्रे नगराद्वा परिचलतः परिगच्छतः बलो रामस्तदनुजस्य हरेर्बलस्य सैन्यस्य। बलं सैन्ये बलो राम इत्युभयत्रापि शाश्वतः। परं केवलमेकस्यैव तुरगस्य जन्म जन्ममात्रं यस्य तस्यैकतुरग जन्मनः एकोऽपि जातएव न त्वस्तीति भावः । महीभृता मन्दराद्रिणा राज्ञा च मथितस्य न तु स्वयं कस्यापि मन्थिता सततं विगतश्रियः उत्पत्त्यनन्तरमेवास्याः हरिस्वीकरणादिति भावः जलधेश्च तदा प्रस्थानसमये महदन्तरं दूरगमनादि व्यवधानं वक्ररीत्या महत्तारतम्यं चाभवत् । अत्रोपमेयस्य हरिबलस्य उपमानाज्जलधेराधिक्यवर्णनात् व्यतिरेकालङ्कारः। पद्मकावली वृत्तम्। नजभजजाजरौ यदि पदे कथिता भुवि पद्म कावलीति लक्षणात् ॥ ८२ ॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये पुरीप्रस्थानोनाम तृतीयः सर्गः ॥ ३ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्याख्याने सर्वंकषाख्ये तृतीयः सर्गः ॥ ३ ॥

निश्वासधूमं सह रत्नभाभि
र्भित्त्वोत्थितं भूमिमिवोरगाणाम् ।
नीलोपलस्यूतविचित्रधातु
मसौ गिरिं रैवतकं ददर्श ॥ १ ॥
गुर्वीरजस्रं दृषदः समन्ता
दुपर्य्युपर्य्यम्बुमुचां वितानैः ।
विन्ध्यायमानं दिवसस्य भर्त्तु
र्मार्गं पुनारोद्धुमिवोन्नमद्भिः ॥ २ ॥

निःश्वासेति । नीलोपलैरिन्द्रनीलमणिभिः स्यूताः प्रोताः विचित्रानानावर्णाः धातवोगैरिकादयोयस्य तं अतएव रत्नभाभि र्मणिप्रभाभिः सह भूमिम्भित्त्वा उत्थितं ऊर्द्धं निर्गतं उरगाणां निश्वासधूमं फूत्कारवाष्पमिव स्थितं रैवताख्यं गिरिमसौ हरि र्ददर्श स्यूतेति । सीव्यतेः कर्म्मणि क्तः च्छ्वोः शूडनुनासिके चेत्यूठा देशे यणादेशः । अत्र गिरेर्विशिष्टवर्णनीयत्वेन विशिष्टधूम त्वोत्प्रेक्षणाद्गुणनिमित्तजातिस्वरूपोत्प्रेक्षा । सर्गेऽस्मिन्नानावृत्तानि तत्रादावष्टादशोपजातयः तल्लक्षणं तूक्तं अतीतानन्तरसर्गादौ । अत्रासर्गसमाप्तेर्गिरिवर्णनमेव ॥ १ ॥

गिरिन्ददर्शेत्युक्तं कीदृगित्याकाङ्क्षायामेकान्वयेनाष्टाभिर्विशिनष्टि । गुर्व्वीरिति । गुर्व्वीर्महतीर्दृषदः शिलातटीरित्यर्थः । पाषाण प्रस्तरग्रावोपलाश्मानः शिला दृषदित्यमरः । उपर्युपरि दृषदां समीपउपरिप्रदेशइत्यर्थः । उपर्य्यध्यधसः सामीप्ये इतिद्विर्भावे

क्रान्तं रुचा काञ्चनवप्रभाजा
नवप्रभाजालभृतां मणीनाम्।
श्रितं शिलाश्यामलताभिरामं
लताभिरामन्त्रितषट्पदाभिः ॥३॥

तद्योगात् द्वितीयेति । यथाह वामनः उपर्य्यादिषु सामीप्ये द्विरुक्तेषु द्वितीयेति । समन्तादजस्रमुद्गद्भिः देशकालाविच्छेदे नोत्पतद्भिरित्यर्थः अतएव तैरम्बुमुचां वितानैर्मेघवृन्दैर्निमित्तै दिवसस्य भर्त्तुः सूर्य्यस्य मार्गं पुनः रोद्धुं । संहितायां रोरीति रलोपः ढ्रलोपइति दीर्घः । विन्ध्यायमानमिव विन्ध्यवदाचरन्तं तद्वदुद्भावमिव स्थितमित्यर्थः। आचारे क्यङन्ताच्छटः शानजा देशः। अत्राविच्छिन्नमेघोत्क्रमनेन विन्ध्यायमानत्वोत्प्रेक्षणात् क्रिया निमित्तक्रियास्वरूपोत्प्रेक्षा ॥ २ ॥

क्रान्तमिति । पुनर्नवानि प्रभाजालानि बिभ्रतीति नवप्रभाजाल भृतः तेषां मणीनां सम्बन्धिन्या काञ्चनवप्रभाजा स्वर्णसानु प्रस्तुतया रुचा दीप्त्या क्रान्तं व्याप्तं पुनः शिलानां मेचकोपलानां इन्द्रनीलानां वा श्यामलतया श्यामलिम्ना अभिरामन्तथा आमन्त्रितषट्पदाभिः मकरन्दपूरितत्वादाहूतभृङ्गाभिः लताभिः श्रितं व्याप्तं । इतः परं श्लोकान्तरमेकं यमकं वक्ष्यति । तच्च तद्वालङ्कारः । अर्थालङ्कारस्त्वभ्युच्चेयइति यथासम्भवमूह्यम् । यमकलक्षणं त्वाचार्य्यदण्डिनोक्तम् । अव्यपेतव्यपेतात्मा या वृत्ति र्वर्णसंहतेः । यमकन्तच्च पादानामादिमध्यान्तगोचरं एक द्वित्रिचतुष्पादयमकानां प्रकल्पना । आदिमध्यान्तमध्यान्तमध्या

सहस्रसंख्यैर्गगनं शिरोभिः
पदर्भुवं व्याप्य वितिष्ठमानम् ।
विलोचनस्थानगतोष्णरश्मि
निशाकरं साधु हिरण्यगर्भम् ॥ ४ ॥
क्वचिज्जलापायविपाण्डुराणि
धौतोत्तरीयप्रतिमच्छवीनि ।
अभ्राणि बिभ्राणमुमाङ्गसङ्ग
विभक्तभस्मानमिव स्मरारिम् ॥ ५ ॥

धाखव सर्व्वतः । अनन्तत्वात्त्वत्तेषां भेदाः सम्भेदयोनयः सुकरादुष्कराश्चैव दृश्यन्ते तत्र केचनेति ॥ २ ॥

सहस्रेति । सहस्रमिति संख्या येषां तैः सहस्रसंख्यैः शिरोभिः शिखरैः शीर्षैश्च गगनन्तथा तत्संख्यैः पादैः प्रत्यन्तपर्व्वतैश्चरणैश्च भुवञ्च व्याप्य वितिष्ठमानं अवतिष्ठमानं । समवप्रविभ्यः स्थ इत्यात्मनेपदम् । विलोचनयोर्यत् स्थानं योग्यदेशः तद्गता उष्णरश्मिनिशाकरौ यस्य तं अन्यत्र नेत्रीकृतार्केन्दुमित्यर्थः अतः साधु सत्यं हिरण्यगर्भम्ब्राह्मणमित्युत्प्रेक्षा सहस्रशीर्षेत्यादिश्रुतेरिति भावः । हिरण्यगर्भो निधिगर्भश्च ॥ ४ ॥

क्वचिदिति । पुनः क्वचिदेकदेशे जलानामपायेनापगमेन विपाण्डुराणि शुभ्राणि अतएव धौतं क्षालितं यदुत्तरीयं तत्प्रतिमा तत्समा छविर्येषान्तानि अभ्राणि मेघान् बिभ्राणं दधानं । भृञः कर्त्तरि शानच् । अतएवोमायाः पार्व्वत्याः

छायां निजस्त्रीचटुलालसानां
मदेन किञ्चिच्चटुलालसानाम्।
कुर्वाणमुत्पिञ्जलजातपत्त्रै-
र्विहङ्गमानां जलजातपत्त्रैः ॥ ६ ॥

स्कन्धाधिरूढोज्ज्वलनीलकण्ठा-
नुर्वीरुहः श्लिष्टतनूनपोन्द्रैः।
प्रनर्त्तिनानेकलताभुजाग्रान्
रुद्राननेकानिव धारयन्तम् ॥ ७ ॥

अङ्गसङ्गेनार्द्धभागेन विभक्तं एकभागस्थापितं भस्म यस्य तं स्मरारिं हरमिव स्थितमित्युपमालङ्कारः ॥ ५ ॥

छायामिति। पुनः निजस्त्रीणां चाटुषु प्रियवचनेषु लालसाः लोलुपाः। लोलुपो लोलुभो लोलो लोलम्पटो लालसोऽपि चेति यादवः। तेषान्निजस्त्रीचटुलालसानाम्मदेन किञ्चिदीषच्चटुलाश्च पलास्ते अलसाश्च। विशेषणयोरपि मिथो विशेषणविशेष्यभाव विवक्षया विशेषणसमासः। तेषाञ्चटुलालसानां विहङ्गमानां हंसादीनां उत्पिञ्जलानि जातानि उत्पिञ्जलजातानि। पूर्ववत्समासः। तानि पत्त्राणि येषान्तैरुत्पिञ्जलजातपत्त्रैरुत्पिञ्जरीभूतदलैरित्यर्थः। रलयोरभेदः। जलजातपत्त्रैः जलजैरेवातपत्त्रैः छायां कुर्वाणं। एतेन महती कमलाकरसमृद्धिर्व्यज्यते। यमकरूपकयोः सङ्करः ॥ ६ ॥

स्कन्धेति। पुनः स्कन्धं प्रकाण्डमधिरूढाः उज्ज्वला नीलकण्ठा मयूरा येषान्तान् अन्यत्र स्कन्धाधिरूढाः अंसस्थिताः नीलाः

विलम्बिनीलोत्पलकर्णपूराः
कपोलभित्तीरिव लोध्रगौरीः ।
नवोलपालङ्कृतसैकताभाः
शुचीरपः शैवलिनीर्दधानम् ॥ ८ ॥

राजीवराजीवशलोलभृङ्ग
मुष्णन्तमुष्णन्ततिभिस्तरूणाम् ।
कान्तालकान्ताललनाः सुराणां
रक्षोभिरक्षोभितमुद्वहन्तम् ॥ ९ ॥

कण्ठायेषान्तान् । अंसप्रकाण्डयोः स्कन्धइति विश्वः । अहीन्द्रैः श्लिष्टतनून् व्याप्तदेहान् एकत्र तदावासत्वादन्यत्र तद्भूषणत्वाच्चेति भावः । प्रनर्त्तितानि अनेकलतानामेव भुजानां लतानामिव अ भुजानां अग्राणि येषान्तानतएवानन्तानसङ्ख्यान् रुद्रानिव स्थितम् इत्युत्प्रेक्षा उर्वीरुहोत्खान्धारयन्तमुद्वहन्तम् ॥ ८ ॥

विलम्बीति । विलम्बिनोनीलोत्पलान्येव कर्णपूराः कर्णावतंसा यासान्ताः लोध्रेण लोध्ररजसा गौरीरवदाताः । षिद्गौरादिभ्यश्चेति ङीष् । कपोलभित्तीः स्त्रीणां गण्डस्थलीरिव स्थिताः । उपमान्तरमाह । नवाउलपावल्वजतृणानि । उलपाः वल्वजाः प्रोक्ताइति विश्वः । तैरलङ्कृतानां सैकतानामाभेवाभा यासान्ताः कुतः शुचीः शुद्धाः शैवलिनीः शैवलवतीः अपोदधानं । शुचित्व शैवलत्वाभ्यां विम्बप्रतिविम्बभावेनोपमाद्वयम् ॥ ८ ॥

राजीवेति । पुनः राजीवराजीनां पद्मपङ्क्तीनां वशाअधीनाः लोलाश्चलाभृङ्गायस्मिन् तं राजीवराजीवशलोलभृङ्गं तरूणां

मुदे मुरारेरमरैः सुमेरो-
रानीय यस्योपचितस्य शृङ्गैः ।
भवन्ति नोद्दामगिरां कवीना-
मुच्छ्रायसौन्दर्य्यगुणा मृषोद्याः ॥ १० ॥

ततिभिः सद्भिरुष्णमातपं मृणालं हरन्तं कान्तारम्याश्चलकान्तास्त्रूर्ण कुन्तलाः क्रीय सान्ताः कान्तालकान्ताः। अलकाश्चूर्णकुन्तलाइत्यमरः। सुराणां ललनाः स्त्रियोऽध्वरमः रवोभीरावसैः अचोभितमनभिभूतं यथा तथा उद्वहन्तम् ॥ ९ ॥

नन्वल्पीयानयं कश्चिद्रैवतकोनाम शिलोच्चयः कथमियद्दर्ण्यत इति शङ्कां निरस्यति। मुदइति । मुरारेर्मुदे सन्तोषाय अमरैः कर्तृभिः सुमेरोः शृङ्गैः करणैरानीयोपचितस्य वर्द्धितस्य आनीतैः शृङ्गैरुपचितस्येत्यर्थः । उपचये करणानां शृङ्गाणामर्थादानयन कर्म्मत्वं । यस्य शैलस्य उच्छ्रायः औन्नत्यं सौन्दर्य्यञ्च तयोः गुणा उत्कर्षाउद्दामगिरां प्रगल्भवाचां कवीनां मृषा उद्यन्तइति मृषोद्याः मिथ्यावाच्यान भवन्ति मेरुशृङ्गेषु सर्व्वगुणसम्भवादिति भावः । राजसूयसूर्य्यमृषोद्येत्यादिना वदः क्यवन्तोनिपातः । उत्कृष्टः श्रायः उच्छ्रायइति घञन्तेनोपसर्गस्य समासः नह्युपसृष्टात् घञ् प्रत्ययः । श्रोणीभुवोऽनुपसर्गइति नियमात् । मुदइत्यादि श्लोकसप्तके यच्छब्दस्य दृष्टोऽयं शैलः सइत्यनेनान्वयः । मेरुशृङ्गासम्बन्धेऽपि सम्बन्धवर्णनादतिशयोक्तिः ॥ १० ॥

यतइति । लोकः परार्द्ध्यानि श्रेष्ठानि अनूनैर्महद्भिः भूरिभिः प्रभूतैः। प्रभूतं प्राज्यं भूरीत्यमरः। प्रस्थैः सानभिर्नामविशेषैस

यतः परार्ध्यानि भृतान्यनूनैः
प्रस्थैर्मुहुर्भूरिभिरुच्छिखानि ।
आढ्यादिव प्रापणिकादजस्रं
जग्राह रत्नान्यमितानि लोकः ॥ ११ ॥

अखिद्यतासन्नमुदग्रतापं
रविन्दधानेऽप्यरविन्दधाने ।
भृङ्गावलिर्यस्य तटे निपीत
रसा नमत्तामरसा न मत्ता ॥ १२ ॥

प्रस्थोऽस्त्री सानुमानयोरित्यमरः । भृतानि सम्भृतानि मितानि च उच्छिखान्युद्गमीनि अमितानि अपरिमितानि रत्नानि यतः शैलादाढ्याद्धनिकात् । इभ्य आढ्यो धनीत्यमरः । प्रपणो व्यवहारः प्रयोजनमस्य प्रापणिको वणिक् । तदस्य प्रयोजनमिति ठक् । पण्याजीवाः प्रापणिका वैदेहा नैगमास्तु ते वणिज इति वैजयन्ती । तस्मादिवाजस्रं मुहुर्जग्राह । उपमालङ्कारः ॥ ११ ॥

अखिद्यतेति । आसन्नमौन्नत्यात्सन्निहितमत एवोदग्रतापं सुमहातपं रविं दधानेऽपि अरविन्दधान इति विरोधः । अरविन्दानां धाम्ने निधाने इति परिहारः । धीयतेऽस्मिन्निति धानम् । अधिकरणे ल्युट् । शब्दश्लेषमूलो विरोधालङ्कारः । यस्य गिरेस्तटे निपीतरसा नितरां पीतमकरन्दा नमन्ति तामरसानि पङ्केरुहाणि भारभृतया यया सा नमत्तामरसा । पङ्केरुहन्तामरसमित्यमरः । अतएव मत्ता भृङ्गावलिर्नाखिद्यत न खिन्ना । खिदेर्दैवादिकात्कर्त्तरि

यत्राधिरूढेन महीरुहोच्चै-
रुन्निद्रपुष्पाक्षिसहस्रभाजा।
सुराधिपाधिष्ठितहस्तिमल्ल-
लीलां दधौ राजतगण्डशैलः ॥ १३ ॥
विभिन्नवर्णा गरुडाग्रजेन
सूर्य्यस्य रथ्याः परितः स्फुरन्त्या।
रत्नैः पुनर्यत्र रुचा रुचं स्वा-
मानिन्यिरे वंशकरीरनीलैः ॥ १४ ॥

स्तङ्। अत्यन्तसूर्य्यसन्निधानेऽप्यरविन्दाकरविहाराान्मधुकरास्तापं नापुरित्यर्थः ॥ १२ ॥

यत्रेति। यत्र शैले रजतस्य विकारो राजतः। प्राणिरजतादिभ्योऽञित्यञ् प्रत्ययः। स चासौ गण्डशैलश्च। गण्डशैलास्तु च्युताः स्थूलोपला गिरेरित्यमरः। उन्निद्राणि विकसितानि पुष्पाण्य क्षीणीवेत्युपमितसमासः। तेषां सहस्रं भजतीति तद्भाजा अधिरूढेनोच्चैर्महीरुहा वृक्षेण सुराधिपेन देवेन्द्रेण अधिष्ठितो यो हस्ती मल्ल इव तस्यैरावतस्य लीलां शोभां दधौ ऐरावतस्य धावल्यादिति भावः। हस्तिमल्लोऽभ्रमातङ्गे हस्तिमल्लो विनायके इति विश्वः। अत्र लीलामिव लीलामिति सादृश्याक्षेपान्निदर्शनालङ्कारः ॥ १३ ॥

विभिन्नेति। गरुडाग्रजेनारुणेन विभिन्नवर्णा अन्यथाकृतवर्णा अरुणिमानमापादिता इत्यर्थः। सूर्य्यस्य सम्बन्धिनो रथं वहन्तीति

यत्रोज्झिताभिर्मुहुरम्बुवाहैः
समुन्नमद्भिर्न समुन्नमद्भिः ।
वनं बबाधे विषपावकोत्था
विपन्नगानामविपन्नगानाम् ॥ १५ ॥

रथ्याः रथाश्वाः । तद्वहति रथयुगप्रासङ्गमिति यत्प्रत्ययः । यत्र शैले वंशकरीरनीलैः वंशाङ्कुरश्यामैः रत्नैर्मरकतैरित्यर्थः । वंशाङ्कुरे करीरोऽस्त्रीत्यमरः । वंशशब्दस्यास्थानतादृतोरल्लूनतायाः प्रतिपत्त्यर्थत्वादपौनरुक्त्यम् । अतएवैकार्थपदमप्रयोज्यमित्युक्त्वा करिकलभकर्णावतंसादिषु प्रतिपत्तिविशेषकरेषु न दोषइत्याह वामनः। स विशेषश्चेदिति । परितः स्फुरन्त्या रुचा स्वप्रभया करणेन पुनः स्वां रुचं निजहरितवर्णमेव आनिन्यिरे आनीताः । नयते र्द्विकर्म्मकात्प्रधाने कर्म्मणि लिट् । प्रधानकर्म्मण्याख्येये लादीनाहुर्द्विकर्म्मणामिति वचनात् । अत्र विभिन्नवर्णादत्येकस्तद्गुणः। रथ्यानां स्वगुणत्यागेन गरुडाग्रजगुणग्रहणात्पुनस्तत्त्यागेन मरकतगुणग्रहणादपरस्तद्गुणस्तदुपजीवीति सजातीययोः सङ्करः । तेन गिरेः सूर्य्यमण्डलपर्य्यन्तमौन्नत्यं वस्तु व्यज्यते । तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणग्रहः ॥ १४ ॥

यत्रेति । यत्र शैले समुन्नमद्भिः समुत्पतद्भिरम्बुवाहैरुज्झिताभिस्त्यक्ताभिरद्भिर्मुहुः समुन्नं सम्यक् उन्नं क्लिन्नं सिक्तमित्यर्थः । उन्दी क्लेदने इति धातोः कर्म्मणि क्तः नुदविदेत्यादिना निष्ठानत्वं । विपन्नगाविगतसर्पा न भवन्तीत्यविपन्नगाः सपन्नगाइत्यर्थः । तेषामविपन्नगानामगानां वृक्षाणां वनं विषपावकोत्था विषाग्निसमुत्था

फलद्भिरुष्णांशुकराभिमर्षात्
कार्शानवं धाम पतङ्गकान्तैः।
शशंस यः पात्रगुणाद्गुणानां
सङ्क्रान्तिमाक्रान्तगुणातिरेकम्॥ १६ ॥

विपदापत् न बबाधे नित्यं वर्षानुषङ्गादिषाशिचोभोद्यचाणाम किञ्चित्करदति भावः॥ १५ ॥

फलद्भिरिति। यः शैलः उष्णांशुकराभिमर्षादर्ककरसम्पर्कात् कृशानोरिदं कार्शानवं आग्नेयं धाम तेजः फलद्भिरुद्गिरद्भिः अग्नि करसामर्थ्याभिव्यञ्जकैरिति भावः। पतङ्गकान्तैः सूर्य्यकान्तैः दृष्टान्तभूतैरिति भावः। गुणानां सङ्क्रान्तिमन्यत्र सङ्क्रमणं संक्रान्त गुणानित्यर्थः। पात्रगुणादाधारगुणसहकारादाक्रान्तः प्राप्त गुणातिरेकः कार्य्यविशेषाधानरूपो गुणोत्कर्षो यस्यास्तां शशंस प्रतिपादयामास अर्ककिरणां सर्व्वत्र सङ्क्रमणाविशेषेऽपि सूर्य्यकान्ते ष्वेव ज्वलनजननदर्शनात् सर्व्वत्रापि सङ्क्रम्यकारिणां गुणानामाधार गुणसहकारात्कार्य्यविशेषाधायकत्वमिति निश्चयोऽत्रैव जायत इत्यर्थः। ततश्च सहकारशक्तिविरहिणो सहजशक्तिरनुपकारिणीति भावः। वृत्त्यनुप्रासोऽलङ्कारः॥ १६ ॥

दृष्टोपीति। मुहुर्दृष्टोऽपि स शैलो मुरारेरपूर्व्वेणादृष्टपूर्व्वेण तुल्यमपूर्व्ववत्। तेन तुल्यं क्रिया चेदिति वतिः। विस्मयमाततान अतिरमणीयत्वादिति भावः। तथाहि चणे चणे प्रतिचणम्। वीप्सायां द्विर्भावः। नवतामपूर्व्ववद्भावं उपैतीति यत्। तन्नवत्वोपगमन मेव रमणीयतायाः रूपं स्वरूपं लचणमित्यर्थः। अत्र रमणीयत्व

दृष्टोऽपि शैलः स मुहुर्मुरारे
रपूर्व्ववद्विस्मयमाततान ।
क्षणे क्षणे यन्नवतामुपैति
तदेव रूपं रमणीयतायाः ॥ १७ ॥
उच्चारणज्ञोऽथ गिरान्दधान
मुच्चारणात्पक्षिगणास्तटीस्तम् ।
उत्कन्धरं द्रष्टुमवेक्ष्य शौरि
मुत्कन्धरं दारुक इत्युवाच ॥ १८ ॥

लक्षणस्य वाक्यार्थस्य विस्मये हेतुत्वसमर्थनाद्वाक्यार्थहेतुकं काव्य लिङ्गमलङ्कारः ॥ १७ ॥

उच्चारणज्ञ इति । अथ हरिविस्मयानन्तरङ्गिरां वाक्याना मुच्चारणं जानातीत्युच्चारणज्ञः उक्तिकुशलः । आतोनुपसर्गे क इति कप्रत्ययः नेगुपधेत्यादिना आकारादनुपपदात्कर्म्मोपपदो भवति विप्रतिषेधेनेति वचनात् । दारुकः कृष्णसारथिः उच्चाः उन्नताः रणन्तः पक्षिगणाः यासु ताः रणत्पक्षिगणास्तटीर्दधानं तं पूर्व्वोक्तं । धरतीति धरं पर्व्वतं । पचाद्यच् । अहार्य्यधरपर्व्वता इत्यमरः । द्रष्टुमुत्कं उत्सुकं । उत्क उन्मनाइति निपातः । उत्कन्धरमौत्सुक्यादुन्नमितकन्धरं शौरिमवेक्ष्य इति वक्ष्यमाण क्रमेण वाचमुवाच । नह्यीङ्गितज्ञोऽवसरेऽवसीदतीति भावः ॥ १८ ॥

इतः प्रभृति यमकानन्तरश्लोकेषु वसन्ततिलकावृत्तं नियमे नाह । आच्छादितेति । आच्छादितान्यावृतानि आयतानि

आच्छादितायतदिगम्बरमुच्चकैर्गा-
माक्रम्य संस्थितमुदग्रविशालशृङ्गम्।
मूर्द्धि स्खलत्तुहिनदीधितिकोटिमेन-
मुद्वीक्ष्य कोभुवि न विस्मयते नगेशम् ॥१९॥

दीर्घाणि दिशोऽम्बरं खञ्च दिगम्बराणि येन तं अन्यत्र आच्छादितं वसितमायतं दिगेवाम्बरं वासो येन तं तथोक्तं उच्चकैरुन्नतां गां भुवमाक्रम्य व्याप्य संस्थितं। तथा उदग्राणि उन्नतानि विशालानि च शृङ्गाणि शिखराणि यस्य तं अन्यत्र उदग्रे विशाले शृङ्गे विषाणे यस्य तं उच्चकैरुन्नतङ्गां वृषभमाक्रम्याधिष्ठाय संस्थितमित्यर्थः। शृङ्गं विषाणे शिखरइति। गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रमसि स्मृतः। अर्ज्जुनीनेत्रदिग्बाणभूवाग्वारिषु गौर्मतेति च विश्वः। मूर्ध्नि शिखरे अन्यत्र शिरसि स्फुरन्ती तुहिनदीधितेरिन्दोः कोटिः रश्मिः कला च यस्य तमेनं नगेशं नगश्रेष्ठं रैवतकं कैलासनायकमीश्वरञ्चोद्वीक्ष्य कोन विस्मयते सर्व्वोऽपि विस्मयतइत्यर्थः। नेयं तुल्ययोगिता प्रकृताप्रकृतविषये तदनुत्थानात् नापि समासोक्तिः तस्याविशेषणसाम्यजीवितात्। नापि श्लेषः उभयश्लेषे विशेष्यश्लेषयोगात्। तस्मात्प्राकरणिकार्थमात्रपर्य्यवसितेऽभिधाव्यापारेणापि शब्देनार्थान्तरधीकृद्ध्वनिरित्याहुः। तदुक्तं काव्यप्रकाशे। अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते। संयोगाद्यैरवाच्यार्थधीकृद्व्याप्टतिरञ्जनमिति। वृत्तलक्षणन्तु उक्तं वसन्ततिलका तभजाजगौ गइति ॥ १९ ॥

उदयति विततोर्द्धरश्मिरज्जा
वहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टा
द्वयपरिवारितवारणेन्द्रलीलाम् ॥ २० ॥

वहति यः परितः कनकस्थलीः
सहरितालसमाननवांशुकः ।
अचल एष भवानिव राजते
स हरितालसमाननवांशुकः ॥ २१ ॥

उदयतीति । वितताऊर्द्धाश्च रश्मिरज्जवो रश्मयो रज्जव इव यस्य तस्मिन्वितताऊर्द्धरश्मिरज्जौ अहिमरुचौ सूर्य्ये उदयति उदयमाने । अय गताविति स्वरितेतं केचिदिच्छन्ति ततः शतरि सप्तमी । तथा वितताऊर्द्धरश्मिरज्जौ हिमधाम्नि चन्द्रे चास्तं याति अस्तमयमाने । यातेः शतरि सप्तमी । अयं गिरिर्विलम्बिना विशेषं लम्बमानेन घण्टाद्वयेन परिवारितस्य वेष्टितस्य वारणेन्द्रस्य लीलां शोभां वहति । अत्र लीलामिव लीलामिति सादृश्याक्षेपान्निदर्शना । तथा सूर्य्याचन्द्रमसावस्य कुक्षिसमानकक्षां बिभ्रतइति महदौन्नत्यं व्यज्यते पुष्पिताग्रा वृत्तम् । अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ॥ २० ॥

वहतीति । लसमानादीप्यमानानवांशवो यस्य स लसमाननवांशुकः । शैषिकः कप्रत्ययः । योऽचलः सहरिताः सदूर्व्वाः । हरितेति च दूर्व्वायां हरिद्वर्णयुतेऽन्यवदिति विश्वः । कनकस्य

पाश्चात्यभागमिह सानुषु सन्निषण्णाः
पश्यन्ति शान्तमलसान्द्रतरांशुजालम् ।
सम्पूर्णलब्धललनालपनोपमान
मुत्सङ्गसङ्गिहरिणस्य मृगाङ्कमूर्त्तेः ॥२२॥

स्थलीः स्वर्णभूमीः । जानपदेत्यादिना अकृत्रिमार्थे ङीप् । परितोवहति स एषोऽचलः हरितालेन कर्बूरेण समानं नव मंशुकं वासोयस्य स हरितालसमाननवांशुकः पीताम्बरो भवानिव राजते । द्रुतविलम्बितं वृत्तम् । द्रुतविलम्बितमाह नभौ भराविति लक्षणात् ॥ २१ ॥

पाश्चात्येति । इहाद्रौ सानुषु सन्निषण्णाः स्थिताः जनाः शान्त मलकलङ्कस्य पुरोवर्त्तित्वान्निष्कलङ्कमतएव सान्द्रतरमंशुजालं यस्य तं सम्पूर्णं परिपूर्णं लब्धमाप्तं ललनालपनोपमानं स्त्रीमुख सादृश्यं येन तं । आननं लपनं मुखमित्यमरः । कुतः उत्सङ्ग सङ्गिहरिणस्य अङ्कस्थमृगस्य मृगाङ्का मृगचिह्ना मूर्त्तिर्यस्य तस्य मृगाङ्कमूर्त्तेश्चन्द्रस्य पश्चाद्भवः पाश्चात्यः । दक्षिणपश्चात्पुरसस्त्यक् । स चासौ भागस्च तं पाश्चात्यभागं पृष्ठभागं पश्यन्ति । पाश्चात्यभाग दर्शनातिशयोक्त्या तादृगौन्नत्यध्वनिः । वसन्ततिलका वृत्तं ॥२२॥

कृत्वेति । अत्राद्रौ निर्झराणां गिरिनदप्रवाहाः । प्रवाहो निर्झरो झरइत्यमरः । चूतवृक्षइत्यादिवत्सामान्यविशेषभावात् पनरुक्तिः पुंवत्पुंश्चिस्तुल्यं । तेन तुल्यं क्रिया चेदिति वतिः । उच्चै र्भृगुभ्यस्तटेभ्यः । प्रपातस्त्वतटोभृगुरित्यमरः । ग्राव्णां शिलानां मर्द्धिपातं कृत्वा पतित्वा जर्जराः शकलीभूताः श्यामाकाशस्यत्वु

छत्वा पुंवत्पातमुच्चैर्भृगुभ्यो
मूर्द्ध्नि ग्राव्णां जर्ज्जरा निर्झरौघाः ।
कुर्व्वन्ति द्यामुत्पतन्तः स्मरार्त्त-
स्वर्लोकस्त्रीगात्रनिर्व्वाणमत्र ॥२३॥

स्थगयन्त्यमूः शमितचातकार्त्तस्वरा
जलदास्तडित्तुलितकान्तकार्त्तस्वराः ।
जगतीरिह स्फुरितचारुचामीकराः
सवितुः क्वचित् कपिशयन्ति चामी कराः ॥२४॥

त्पतन्तः स्मरार्त्तानां स्वर्लोकस्त्रीणां खेचरीणामप्सरसाञ्च निर्व्वाणमङ्गनिर्वृतिं कुर्व्वन्ति । अनुष्ठानासमर्थस्य वानप्रस्थस्य जीर्य्यतः । भृग्वग्निजलसम्पातैर्मरणं प्रविधीयत इति विहितभृगुपातिनां पुंसां स्वर्लोकगामिनामिहोपमानता । शालिनी वृत्तम् शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैरिति ॥ २३ ॥

स्थगयन्तीति । इहाद्रौ क्वचिदमूर्जगतीर्भूमीः । जगती भुवने भूमाविति विश्वः । शमिताश्चातकानामार्त्तस्वरा यैस्ते शमितचातकार्त्तस्वराः । सर्व्वसहापतितमम्बु न चातकानामिति भूमिगतस्य तेषां विपाभत्वाद्भौमाम्बुदानेनोज्जीवयन्तीत्यर्थः । किञ्च तडिद्भिस्तुलितानि उपमितानि कान्तानि कार्त्तस्वराणि सुवर्णानि यैस्ते तडित्तुलितकान्तकार्त्तस्वराः । तडित्स्फुरणे तेषामपि तद्वत् स्फुरणादिति भावः । ते जलदाः स्थगयन्ति आच्छादयन्ति । स्थग आच्छादने इति चौरादिकः । क्वचित्तु स्फुरितानि उज्ज्वलितानि

उत्क्षिप्तमुच्छ्रितसितांशुकरावलम्बै
रुत्तम्भितोडुभिरतीवतरां शिरोभिः ।
श्रद्धेयनिर्झरजलव्यपदेशमस्य
विष्वक् तटेषु पतति स्फुटमन्तरीक्षम् ॥२५॥

चारूणि चामीकराणि सुवर्णानि यैस्ते स्फुरितचारुचामीकराः अमी सवितुः कराः आतपाश्च कपिशयन्ति कपिशिताः कुर्व्वते क्वचिद्दृष्टिः क्वचिदातपश्चेति महदाश्चर्य्यमिति भावः । पथ्या वृत्तम् । सजसायलौच सह गेन पथ्या मता ॥ २४ ॥

उत्क्षिप्तमिति । उच्छ्रिताः उत्क्षिप्ताः सितांशोश्चन्द्रस्य कराः अंशवो हस्ताश्चावलम्बो येषान्तैः उत्तम्भितान्युडूनि यैस्तैः उडूनि चावष्टभ्येत्यर्थः । शिरोभिः शिखरैर्मस्तकैश्चातीवतराम्भृशतरं । अतीवशब्दादव्ययादामुप्रत्ययः । उत्क्षिप्तमुद्यम्य धृतं अन्तरीक्षं श्रद्धेयः साहृश्यादिश्वसनीयः निर्झरजलमिति व्यपदेशो व्यवहारो यस्य तत् दृढतरां निर्झरजलधियं कुर्व्वदित्यर्थः । अस्याद्रेः तटेषु विष्वक्समन्तात्पतति स्फुटं सत्यं इन्दुकरानुडूनि चावष्टभ्य शिरोभिर्ध्रियमाणमपि दुरुद्धरत्वाद्भ्रश्यदन्तरीक्षमेवेदं न तु जलं साहृश्यात्तु व्यपदेशो दुर्वार इति सर्व्वतः पातिता निर्झरजलं चोत्प्रेक्ष्यते तेनोत्सेधविस्तारावस्य व्यज्येते ॥ २५ ॥

एकत्रेति । एकत्र एकस्मिन्भागे स्फटिकस्य यत्तटन्तस्यां शुभिर्विभिन्ननीराः मिश्रोदकाः शुभ्रजला इत्यर्थः । अपरत्रा परस्मिन् भागे नीलाश्मनामिन्द्रनीलानां द्युतिभिः भिदुराणि मिश्राण्यम्भांसि यासान्ताः नीलसलिला इत्यर्थः । इत्याद्रेः सरितः

एकत्र स्फटिकतटांशुभिन्ननीरा
नीलाश्मद्युतिभिदुराम्भसोऽपरत्र ।
कालिन्दीजलजनितश्रियः श्रयन्ते
वैदग्धीमिह सरितः सुरापगायाः ॥२६॥

इतस्ततोऽस्मिन्विलसन्ति मेरोः
समानवप्रे मणिसानुरागाः ।
स्त्रियश्च पत्यौ सुरसुन्दरीभिः
समानवप्रेमणि सानुरागाः ॥ २७ ॥

कलिन्दस्याद्रेरपत्यं स्त्री कालिन्दी यमुना । कालिन्दी सूर्य्यतनया यमुना शमनस्वसेत्यमरः । तस्याजलैः जनिता श्रीः शोभा यस्यास्तस्याः तत्सङ्गतायाइत्यर्थः । सुरापगायागङ्गायाः वैदग्धीं शोभां श्रयन्ते भजन्ति विदग्धस्य भावः वैदग्धी । ब्राह्मणादित्वा द्गुणवचनेत्यादिना ष्यञ् प्रत्ययः षिद्गौरादिभ्यश्चेति ङीष् सोऽपीलस्य बाहुलकलादिह वैकल्पिकः अतएव ष्यञः षित्करणादी कारोबहुलमिति वामनः । अत्र सितासितमणिगुणग्रहणात्सरितां यमुनासङ्गतगङ्गाशोभासादृश्याक्षेपात्तद्गुणोत्थापिता निदर्शना । प्रहर्षिणी वृत्तम् म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ २६ ॥

इतइति । मेरोः समानवप्रे तुल्यप्रस्थे अतएवास्मिन्नद्राविस्ततोमणिसानुरागारत्नतटकान्तयोविलसन्ति प्रसरन्ति किञ्च नवम्प्रेम यस्य तस्मिन्नवप्रेमणि पत्यौ अनुरागेण सह वर्त्तन्तइति सानुरागाः सुरसुन्दरीभिः समाः सरूपाः स्त्रियश्च इतस्ततो

उच्चैर्महारजतराजिविराजितासौ
दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा ।
अभ्येति भस्मपरिपाण्डुरितस्मरारे
रुद्वह्निलोचनललामललाटलीलाम् ॥२८॥

अयमतिजरठाः प्रकामगुर्वी
रलघुविलम्बिपयोधरोपरुद्धाः ।
सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्तटीर्बिभर्ति ॥ २९ ॥

विलसन्ति क्रीडन्ति अन्योन्यमनुरागिणोऽनुरूपाश्चेह विलासिन स्तदनुरूपाणि च विहारस्थलानि सन्तीति भावः ॥ २७ ॥

उच्चैरिति । इहाद्रौ सान्द्रया सुधया लेपविशेषेणामृतेन वा सवर्णा समानवर्णा । ज्योतिर्जनपदेत्यादिना समानस्य सादेशः । लेपभेदेऽमृते सुधेति वैजयन्ती । महारजतराजिविराजिताकाञ्चन रेखाशोभिता असौ पुरोवर्त्तिनी उच्चैरुन्नता दुर्वर्णभित्तिः रजत भित्तिः । महारजतकाञ्चने इति । दुर्वर्णं रजतं रूप्यमिति चामरः । भस्मना परिपाण्डुरितस्य स्मरारेरुद्वह्नि उद्गतार्चिर्लोचनमेव ललामभूषणं यस्य तस्य ललाटस्य लीलां शोभामभ्येति भजतीति निदर्शनालङ्कारः । ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुष्वित्य मरः ॥ २८ ॥

अयमिति । अयमद्रिरतिजरठाः अतिकठिनाः अतिजरतीश्च । जरठः कठिने जीर्ण इति वैजयन्ती । प्रकामगुर्वीः श्रेष्ठाः स्थौल्य

धूमाकारं दधति पुरः सौवर्णे
वर्णेनाग्नेः सदृशि तटे पश्यामी।
श्यामीभूताः कुसुमसमूहेऽलीनां
लीनामालीमिह तरवो बिभ्राणाः ॥ ३० ॥

दुर्भराश्च प्रकामगुर्व्वीः गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरइति शब्दार्णवः। विसष्टपटुवत् मयूरव्यंसकादयश्चेति समासः अलघुभि र्विलम्बिभिर्लम्बमानैः पयोधरैर्मेघैः स्तनैश्च। स्त्रीस्तनाब्दौ पयोधराविव्यमरः। उपरुद्धाः आवृताः निबद्धाः सतत सर्व्वदा असुमताप्राणभृतामगम्यरूपाः अत्युन्नतत्वात् दुरारोहस्वरूपाः अन्यच वृद्धत्वाङ्गमनानर्हवियशः। त्यजेदन्यकुलोत्पन्नां वृद्धां स्त्रीं कन्यकान्तथेति गमननिषेधादिति भावः। परिणतास्तिर्य्यग्दन्त प्रहारिणोदिक्करिणोदिग्गजाः यासु ताः परिणतदिक्करिकाः। तिर्य्यग्दन्तप्रहारस्तु गजः परिणतोमतइति हलायुधः। इतः स्त्रियामिति समासान्तः कप्प्रत्ययः। अन्यच परिणताः कठिनीभूताः दिशोदन्तक्षतविशेषाः करिकानखव्रणाश्च यासान्ताः। दिग्दष्टे वर्त्तुलाकारे करिका नखरेखिकेति वैजयन्ती। तटीर्बिभर्त्ति। अत्र प्रकृततटीविशेषणमहिम्ना अप्रकृतवृद्धाङ्गनाप्रतीतेः समासोक्तिः। पुष्पिताग्रा वृत्तमुक्तम् ॥ २९ ॥

धूमेति। इहाद्रौ पुरोऽग्रे वर्णेनाग्नेः सदृशि समाने अग्निसमान वर्णे इत्यर्थः। सौवर्णे सुवर्णविकारे तटे कुसुमसमूहे लीनां श्लिष्टां। स्वादिभ्यश्चेति निष्ठानत्वं। अलीनां भृङ्गाणामालीमावली बिभ्राणाः अतएव श्यामीभूताः अमी तरवो धूमाकारन्धूमसादृश्यं

व्योमस्पृशः प्रथयता कलधौतभित्ती-
रुन्निद्रपुष्पचणचम्पकपिङ्गभासः ।
सौमेरवीमधिगतेन नितम्बशोभा-
मेतेन भारतमिलावृतवद्विभाति ॥ ३१ ॥

दधति त्वं पश्य । स्वर्णतटं अग्निवद्भाति श्यामाम्बरवो धूमवद्भान्ती-त्युपमा । जलधरमाला छन्दः । अब्ध्यङ्कैः स्याज्जलधरमाला भौ स्माविति लक्षणात् ॥ ३० ॥

व्योमेति । व्योमस्पृशोऽभ्रङ्कषाः उन्निद्रैर्विकसितैः पुष्पैर्वित्ता उन्निद्रपुष्पचणाः । तेन वित्तइति चणप्प्रत्ययः । ते च ते चम्पकाश्च तद्वत्पिङ्गभासः पिङ्गवर्णाः कलधौतभित्तीः कनकतटीः । कलधौतं रौप्यहेम्नोरिति विश्वः । प्रथयता प्रकटयता अतएव सौमेरवीं सुमेरुसम्बन्धिनीं नितम्बशोभां कटकलक्ष्मीं अधिगतेन प्राप्तवता । गत्यर्थाकर्मकेत्यादिना गमेः कर्त्तरि क्तः । एतेन रैवतकाद्रिणा भारतं भरतस्य राज्ञइदम्भारताख्यं वर्षं भूखण्डं । स्याद्दृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियामित्यमरः । इलावृतवदिलावृतवर्षमिव विभातीत्युपमा । नवखण्डस्य जम्बूद्वीपस्य हिमाद्रेर्दक्षिणभूखण्डं हैमवतापरनामकं भारतवर्षं सुमेरुयोगात्सौमेरवापराख्यं मध्यम खण्डमिलावृतवर्षं अतएव । नाभेरिदम्भारतं वर्षं हिमाद्रेस्तच्च दक्षिणे । तेन हैमवतं नाम परेष्वप्येवमुन्नयेत् । इलावृतं सौमेरवं सुमेरोः परितोहि तदिति वैजयन्ती ॥ ३१ ॥

रुचिरेति । असौ गिरिः रुचिरैः उज्ज्वलैः चित्रैर्नानावर्णैस्तनूरुहैः लोमभिः शालन्तइति तथोक्तैः परितः प्रचलितैः प्रसरद्भिः

रुचिरचित्रतनूरुहशालिभि
र्विचलितैः परितः प्रियकव्रजैः ।
विविधरत्नमयैरभिभात्यसा
ववयवैरिव जङ्गमतां गतैः ॥ ३२ ॥

कुशेशयैरत्र जलाशयोषिता
मुदा रमन्ते कलभा विकस्वरैः ।
प्रगीयते सिद्धगणैश्च योषिता
मुदारमन्ते कलभाविकस्वरैः ॥ ३३ ॥

प्रियकाः कम्बलप्रकृतयो मृगविशेषाः । प्रियको रोमभिर्युक्तो मृदू
च्चसमृणैर्घनैरिति वैजयन्ती । तेषां व्रजैः समूहैः जङ्गमतां
परिणताङ्गैर्विविधरत्नमयैरवयवैः स्वाङ्गैरिव प्रतिभातीत्युत्प्रेक्षा ।
द्रुतविलम्बितं वृत्तम् ॥ ३२ ॥

कुशेशयैरिति । अत्राद्रौ जलाशयोषिताः जलाशयेषु ह्रदेषु
उषिताः वसन्तः । गत्यर्थाकर्मकेत्यादिना वसतेः कर्त्तरि क्तः ञ्म
सारणं मतिबुद्धिपूजार्थेभ्यश्चेति चकाराद्वर्त्तमानार्थता । कलभाः त्रिंश
द्वर्षकरिणः । त्रिंशद्वर्षस्तु कलभ इति वैजयन्ती । विकस्वरैर्व्विकसन
शीलैः । स्थेशभासविकसोवरच् । कुशेशयैः शतपत्रैः मुदा प्रीत्या रमन्ते
क्रीडन्ति करिविहाराणां कमलाकराणामयमाकर इति भावः । किञ्च
कला अव्यक्तमधुराः विकारो मानसो भावः स प्रयोजनमेषां भाविका
उद्दीपका इत्यर्थः कलाभाविकाश्च स्वराः षड्जादयो येषान्तैः कल
भाविकस्वरैः सिद्धगणैः सुरवृन्दैः योषितां स्त्रीणामन्ते समीपे
उदारैर्गुणैः प्रगीयते च भूस्वर्गोऽयमिति भावः ॥ ३३ ॥

आसादितस्य तमसा नियतेर्नियोगा
दाकाङ्क्षतः पुनरपक्रमणेन कालम् ।
पत्युस्त्विषामिह महौषधयः कलत्र
स्थानं परैरनभिभूतममर्वहन्ति ॥ ३४ ॥

आसादितस्येति। इहाद्रौ अमूर्महौषधयः नियतेर्नियोगादस्मिन् काले इदं भावीति दैवशासनात् । तमसाऽन्धकारेण तत्प्रायेण व्यसनेन वा आसादितस्याक्रान्तस्य पुनरपक्रमणेन पुनरावृत्त्या कालं समागमकालमाकाङ्क्षतः पुनरागत्य सङ्गन्तुमिच्छत इत्यर्थः । त्विषां पत्युः सूर्य्यस्य सम्बन्धि परैस्तेजोऽन्तरैः ग्रहणान्तरैश्चानभिभूत मतिरस्कृतमनुपहतञ्च कलत्रस्थानं कलत्रभूतानां त्विषां स्थानं स्थितिं वहन्ति निर्व्वहन्तीत्यर्थः। स्त्रीणां स्त्रीष्वेव रक्षणं कार्य्यमिति भावः । यथा केनचिदापदि न्यासीकृतानि कलत्राणि संरक्ष्य कालान्तरे साधवस्तस्मै प्रयच्छन्ति तद्वदोषधयोऽपि त्विषः त्विषां पत्युरर्पयन्तीत्यर्थः एतच्च तासां सूर्य्यास्तसमये प्रज्वलनादुदये विपर्य्ययाच्चोपपद्यते । अत्र विशेषणसाम्यादर्कादीनामापन्नादि साम्यप्रतीतेः समासोक्तिरलङ्कारः ॥ ३४ ॥

वनस्पतीति । अत्राद्रौ वनस्पतयोवृक्षाः । वनस्पतिर्द्रुमभावे विनापुष्पफलद्रुमइति विश्वः । तेषां स्कन्धेषु प्रकाण्डेषु अंसेषु च निषण्णाः सक्ताः बालप्रवालावालपल्लवाहस्ताइव याताभ्यां स्तयोक्ताः मधूनि व्रतयन्ति भुञ्जते इति मधुव्रतामधुपास्तेषां व्रातेन वृन्देन रुतैः शब्दैः अतएव लम्भिताः प्रापिताः श्लोकस्तारकाणि कज्जलानि येस्तैर्वातैरिव स्थितैरित्युत्प्रेक्षा। देवार्चे

वनस्पतिस्कन्धनिषण्णबाल
प्रवालहस्ताः प्रमदा इवात्र ।
पुष्पेक्षणैर्लम्भितलोचकैर्वा
मधुव्रतव्रातवृतैर्व्रतत्यः ॥ ३५ ॥

विहगाः कदम्बसुरभाविह गाः
कलयन्त्यनुक्षणमनेकलयम् ।
भ्रमयन्नुपैति मुहुरभ्रमयं
पवनश्च धूतनवनीपवनः ॥ ३६ ॥

वाशब्दः तद्वदुत्प्रेक्षायाश्च उक्तः । लोचको मांसपिण्डे स्यादक्षितारे च कज्जलइति विश्वः । पुष्पैरीक्षणैरिव पुष्पेक्षणैरुपलक्षिताः अतत्यो लताः प्रमदाइव लक्ष्यन्तइति शेषः । न प्रसिद्धे क्रियाध्याहारदोषइत्याह वामनः । लिङ्गाध्याहारवदिति ॥ ३५ ॥

विहगाइति । कदम्बैः सुरभिः सुगन्धिस्तस्मिन् कदम्बसुरभाविहास्मिन् विहगाः पक्षिणः अनुक्षणं प्रतिक्षणं अनेके बहुविधा लया विच्छेदा यस्मिन् कर्मणि तद्यथा तथा गाः वाचः शब्दानित्यर्थः। कलयन्ति । अर्जुनीनेत्रदिग्बाणभूवाग्वारिषु गौर्मतेति विश्वः । किञ्च धूतानि कम्पितानि नवानि नीपवनानि कदम्बकाननानि येन स धूतनवनीपवनः । नीपप्रियकदम्बास्तु हलिप्रिय इत्यमरः । अयम्पवनः मुहुरभ्रमभ्रमयन्नुपैति । प्रमिताक्षरावृत्तम् । प्रमिताक्षरा सजससैरुदितेति लक्षणात् ॥ ३६ ॥

विदद्भिरिति । एषोऽद्रिः श्रेयान् श्रेष्ठः द्विजातिभ्राम्रणइवागमो निधिकस्तोमस्यालयश्च सएव परम्प्रधानं येषान्तैरागम

विद्वद्भिरागमपरैर्विवृतं कथञ्चित्
श्रुत्वापि दुर्ग्रहमनिश्चितधीभिरन्यैः ।
श्रेयान् द्विजातिरिव हन्तुमघानि दक्षं
गूढार्थमेष निधिमन्त्रगणं बिभर्त्ति ॥ ३७ ॥

बिम्बौष्ठं बहु मनुते तुरङ्गवक्त्र-
श्चुम्बन्तं मुखमिह किन्नरं प्रियायाः ।
श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्री-
मुत्तुङ्गस्तनभरभङ्गभीरुमध्याम् ॥ ३८ ॥

परैर्विद्वद्भिर्निधीनां मन्त्राणां च साधनविधानज्ञैः कथञ्चिद्विवृतं स्वरूपतः प्रकाशितं नास्ति निश्चिता इदमित्थमिति निश्चयात्मिका धीर्येषां तैरनिश्चितधीभिरन्यैरशास्त्रज्ञैः श्रुत्वापि इह निधिरस्ति ईदृक् महिमा असौ मन्त्र इति चाप्तमुखादाकर्ण्यापि दुर्ग्रहं दुःसाधनं अघानि दुःखान्येनांसि च हन्तुं दक्ष समर्थम् । दुःखैनो व्यसनेष्वघमिति वैजयन्ती । गूढः संवृतोऽर्थो धनमभिधेयश्च यस्मिन् तं गूढार्थं निधयो मन्त्राश्चेत्यन्यत्र निधय इव मन्त्रास्तेषाङ्गणं बिभर्त्ति द्विजातिर्मन्त्रगणमिव निधिगणमेष बिभर्त्तीत्युपमार्थः ॥ ३७ ॥

बिम्बौष्ठमिति । इहाद्रौ तुरङ्गस्य वक्त्रमिव वक्त्रं यस्य स तुरङ्गवक्त्रो देवयोनिविशेषः । सप्तम्युपमानपूर्व्वपदस्य बहुव्रीहिरुत्तरपदलोपश्चेत्युष्ट्रमुखवत्समासः । बिम्बकल्प ओष्ठो यस्य तं बिम्बौष्ठमित्युपमालङ्कारः । ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यमित्यौकारः । प्रियायाः मुखञ्चुम्बन्तं किन्नरं मानुषमुखमश्वाङ्गं देवयोनि विशेषम्बहु गुरु यथा तथा मनुतेऽवबुध्यते तुरङ्गवक्त्रस्य चुम्बना

यदेतदस्यानुतटं विभाति
वनं ततानेकतमालतालम्।
न पुष्पिताऽत्र स्थगितार्करश्मा
वनन्तताने कतमा लतालम्॥ २९ ॥

सम्भवादिति भावः। इतरः किन्नरोऽपि उत्तुङ्गस्तनभरेण योभङ्ग स्तस्माद्गीरुर्मध्यो यस्यास्तां निजस्त्रीं स्वस्त्रियम्। वाम्रयोरिति विकल्पादियङादेशाभावः। गुरुः स्त्रियन्तं मानुषाकृत्वादाश्लिकृन्त न्तुरङ्गवक्त्रत्वज्ञ यथा तथा मनुते तुरङ्गवपुषः किन्नरस्यास्तेषा सम्भवादिति भावः। दुर्लभं प्रियं भवतीति रहस्यं। मध्यस्याभङ्गे ऽपि भङ्गोक्तेरतिशयोक्तिः उपमया संसृज्यते। प्रहर्षणी वृत्तमुक्तम्। ॥ २८ ॥

यदिति। अस्याद्रेरनुतटन्तटेषु। विभक्त्यर्थेऽव्ययीभावः। तता विस्तृताश्चानेके बहवस्तमालास्तालाश्च यस्मिन् तत्ततानेकतमाल मालं यदेतत् पुरोवर्त्ति वनं विभाति स्थगितार्करश्मा तिरोहिता तपे अनन्तताने अपारविस्तारेऽत्र वने कतमा लता का वा लता अलमत्यन्तं न पुष्पिता सञ्जातपुष्पा न भवतीति शेषः। सर्व्वापि पुष्पितेत्यर्थः॥ २९ ॥

दन्तोज्ज्वलास्विति। अस्मिन्नद्रौ दन्तानिकुञ्जादन्तमासु। दन्तोनिकुञ्जे दशने इति विश्वः। तैरुज्ज्वलासु रुचिरासु सद्रत्ने स्विचास्विति कटकानि सानूनि वलयानि च यासान्तासु। कटकं वलये सानाविति विश्वः। अधित्यकासूर्ध्वभूमिषु। भूमिरूर्ध्वमधित्यके त्यमरः। उपाधिभ्यान्त्यकन्नासन्नारूढयोरित्यधिशब्दात्त्यकन्

दन्तोज्ज्वलासु विमलोपलमेखलान्ताः
सद्रत्नचित्रकटकासु बृहन्नितम्बाः ।
अस्मिन् भजन्ति घनकोमलगण्डशैला
नार्य्योऽनुरूपमधिवासमधित्यकासु ॥ ४० ॥
अनतिचिरोज्झितस्य जलदेन चिर
स्थितबहुबुद्बुदस्य पयसोऽनुकृतिम् ।
विरलविकीर्णवज्रशकला सकला
मिह विदधाति धौतकलधौतमही ॥ ४१ ॥

प्रत्ययः । विमलोपलाः उज्ज्वलशिला उज्ज्वलमणयोवा मेखलाः काञ्च्योनितम्बभूमयश्च । मेखला खड्गबन्धे स्यात्काञ्चीशैलनितम्बयो रिति विश्वः । ताभिरन्तारम्याः । स्तातवषिते रम्ये समाप्तावन्त इष्यतइति शब्दार्णवे । बृहन्तोनितम्बाः कटिपश्चाद्भागाः शिखराणि च यासान्ताः । नितम्बोरोधषि स्कन्धे शिखरेऽपि कटेरधइति विश्वः । घनाविपुलाः कोमलाः श्लक्ष्णाः गण्डशैलाः गण्डस्थलानि स्थूलोपलाश्च यासान्ताः नार्य्योऽनुरूपमिच्छासदृशं आत्मसदृशं वाधिवासम्भजन्ति । अत्र नारीणामधित्यकानाञ्च प्रकृतत्वात्केवल प्रकृतगोचरास्सेषोपस्थापिता तुल्ययोगिता । अतएवोभयविशे षणानि उभयत्र विभक्तिविपरिणामेन योज्यानि ॥ ४० ॥

अनतिचिरेति । इहाद्रौ विरलं यथा तथा विकीर्णा वज्रशकला यस्यां सा धौता शुभ्रा कलधौतमही रजतभूमिः जलदेनानति चिरोज्झितस्य तत्कालमुक्तस्य शुभ्रस्येति भावः । चिरस्थिता स्थिर

वर्जयन्त्या जनैः सङ्गमे कान्तत
स्तर्कयन्त्या सुखं सङ्गमेकान्ततः ।
योषयैष स्मरासन्नतापाङ्गया
सेव्यतेऽनेकया सन्नतापाङ्गया ॥ ४२ ॥

स्थायिनोबहवश्च बुद्बुदाजलस्फोटायस्मिन् तस्य पयसोऽम्भसः सकलामनुकृतिं समग्रसादृश्यं विदधाति अत्र मेघोज्झितजलस्य स्थिरबुद्बुदासम्बन्धेऽपि सम्भावनया सम्बन्धोक्तेरतिशयोक्तिः । कुररीरुता वृत्तम् । कुररीरुता नजभजैर्लगयुगिति लक्षणात् ॥ ४१ ॥

वर्ज्जयन्त्येति । एकान्ततः एकान्ते रहसीत्यर्थः । कान्ततः कान्तेन प्रियेणेत्यर्थः । उभयत्रापि सार्व्वविभक्तिकस्तसिः । सङ्गमे सति सुखं तर्क्कयन्त्या उत्प्रेक्षमाणया विस्रब्धं विहारमाकाङ्क्षन्त्ये त्यर्थः । अतएव जनैः सङ्गं वर्ज्जयन्त्या कुतः स्मरेणासन्नतापानि प्राप्तज्वराणि अङ्गानि यस्यास्तया स्मरासन्नतापाङ्गया । अङ्गगात्र कण्ठेभ्यश्चेति वक्तव्यमिति विकल्पादिह पक्षे टाप् । सन्नतावपाङ्गौ यस्यास्तया सन्नतापाङ्गया स्मरतापात् कूणितनेत्रया अनेकया योषया अनेकाभिर्योषाभिरित्यर्थः । जातावेकवचनं । स्त्री योषिद बला योषा नारी सीमन्तिनी वधूरित्यमरः । एषोऽद्रिः सेव्यते इच्छाविहारस्थानानि इह सन्तीति भावः — स्रग्विणी वृत्तम् । रैश्चतुर्भिर्युता स्रग्विणी सम्मतेति लक्षणात् ॥ ४२ ॥

सङ्कीर्णेति । अस्मिन्नद्रौ सङ्कीर्णाः मिथः संदष्टाः कीचकाः वेणुविशेषाः । वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धुता इत्यमरः ।

सङ्कीर्णकीचकवनस्खलितैकवाल
विच्छेदकातरधियश्चलितुं चमर्य्यः ।
अस्मिन् मृदुश्वसनगर्भतदीयरन्ध्र
निर्य्यत्स्वनश्रुतिसुखादिव नोत्सहन्ते ॥ ४३॥

मुक्तं मुक्तागौरमिह चीरमिवाभ्रै
र्वापीष्वन्तर्लीनमहानीलदलासु ।
शस्त्रीश्यामैरंशुभिराशु द्रुतमम्भ
श्छायामच्छामृच्छति नीलीसलिलस्य ॥४४॥

तेषां वने स्खलितस्यैकवालस्यैकरोम्णो विच्छेदात् कातरा यस्या धीर्यासान्ताश्चमर्य्यः मृदुश्वसनो मन्दमारुतो गर्भे येषान्तेभ्यस्तदीयरन्ध्रेभ्यः कीचकविवरेभ्यो निर्य्यतो निर्गच्छतः स्वनस्य श्रुत्या श्रवणेन यत् सुखं तस्मादिवेति हेतूत्प्रेक्षा। चलितुं नोत्सहन्ते वस्तुतस्तु वालप्रियत्वादिति भावः। शकधृषेत्यादिना तुमुन्प्रत्ययः॥ ४३॥

मुक्तमिति। इहाद्रावन्तर्लीनानि महानीलदलानि इन्द्रनीलविशेषखण्डानि यासु तासु। सिंहलस्याकरोद्भूता महानीलास्तु ते मता इति भगवानगस्त्यः। वापीषु दीर्घिकासु अभ्रैर्मेघैर्मुक्तं वृष्टं मुक्तागौरं मौक्तिकशुभ्रं अतएव चीरमिव स्थितं शस्त्री छुरिका। स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुकेत्यमरः। बह्वादिभ्यश्चेति ङीप्। शस्त्रीवत् श्यामैरंशुभिरन्तर्गतेन्द्रनीलमरीचिभिः आशु तत्क्षणमेव द्रुतं लोलितं यत् छुरितमित्यर्थः नीलीसलिलस्य नीलाख्यौषधिपत्ररसस्य। नीली काला क्लीतकिकेत्य

या न ययौ प्रियमन्यवधूभ्यः
सारतरागमना यतमानम्।
तेन सहेह बिभर्त्ति रहः स्त्री
सा रतरागमनायतमानम् ॥ ४५ ॥

मरः। अच्छां छायां कान्तिमृच्छति तत्सदृशीं छायां गच्छतीत्यर्थः। अतो निदर्शनालङ्कारः। स च मुक्तागौरं चीरमिव शस्तोऽस्मास्विति चोपमात्रयेणान्तर्लीनमहानीलदलासु वापीष्विति पदार्थहेतुकं काव्यलिङ्गं तेनोत्थापितेनांशुभिर्हृतमिति तद्गुणोत्थापितस्त्यङ्गाङ्गिभावेन सङ्करः। चीरमिवेत्यनेनेन्द्रनीलानां सौक्ष्म्यं सूचितं। चीरमध्ये क्षिपेन्नीलं चीरश्चेन्नीलतां व्रजेत्। इन्द्रनीलमिति ख्यातं इति लक्षणसम्भवात्। तेनाच्च नीलीरसोपमानेन तद्वर्णा एवेति सूचितम्। नीलीरसनिभाः केचित्कम्बुकण्ठनिभाः परइत्यादिना अगस्त्येन रत्नशास्त्रे एषामेकादशविधच्छायाभिधानादिति। मत्तमयूरं वृत्तम्। वेदैरन्ध्रैर्म्तौ यसगा मत्तमयूरमिति लक्षणात् ॥ ४४ ॥

या नेति। इहाद्यावन्यवधूभ्यः स्त्र्यन्तरेभ्यः। पञ्चमीविभक्तेरिति पञ्चमी। सारतरं श्रेष्ठमागमनं यस्याः सा सारतरागमना साध्यसङ्गमेत्यर्थः। या स्त्री यतमानं स्वप्राप्त्यै प्रयतमानं प्रार्थयमानमित्यर्थः। यती प्रयत्ने शानच्। प्रियं न ययौ सा तथा प्रतिकूलापि स्त्री रहस्तेन प्रियेण सह अनायतमानमदीर्घमानं यथा तथा रतरागं सुरताभिलाषं बिभर्त्ति अथमतिमानवतीरपि मद एवोद्दीपयतीति भावः। दोधकवृत्तम्। दोधकवृत्तमिदम्भभभागाविति लक्षणात् ॥ ४५ ॥

भिन्नेषु रत्नकिरणैः किरणेष्विहेन्दो
रुच्चावचैरुपगतेषु सहस्रसङ्ख्याम्।
दोषापि नूनमहिमांशुरसौ किलेति
व्याकोशकोकनदतां दधते नलिन्यः॥४६॥

भिन्नेष्विति। इहाद्राविन्दोः किरणेषु उदक्ष्चावाक्ष्च तैरुच्चावचैरनेकविधैरित्यर्थः। उच्चावचं नैकभेदमित्यमरः। मयूरव्यंसकादिषूच्चोच्चनीचाच् पराञ्चोच्चावचकिञ्चनाकुतोभयानीति तत्पुरुषे निपातनात् साधुः। रत्नकिरणैर्भिन्नेषु मिश्रेषु अतएव सहस्रसङ्ख्यामुपगतेषु सत्सु नलिन्यः पद्मिन्यः। नलं पद्मे नलं तृणमिति शाश्वतः। असौ प्रकाशमानोऽहिमांशुः किलेति सहस्रकिरणत्वात् सूर्य्यएवेति सम्भावनाबुद्ध्येत्यर्थः। वार्त्तासम्भाव्ययोः किलेत्यमरः। दोषापि रात्रावपि। सप्तम्यर्थेऽव्ययम्। दिवाह्नीत्यथ दोषा च नक्तञ्च रजनावित्यमरः। व्याकोशकोकनदतां विकचं पद्मतां दधते नूनमित्युत्प्रेक्षायां। अथ रक्तसरोरुहम्। रक्तोत्पलं कोकनदमिति व्याकोशविकचस्फुटादइति चामरः। इह देवभूमित्वा नित्यपद्मा नलिन्यइति भावः। इह नलिनीनान्दोषातनविकाससम्बन्धेऽपि तत्सम्बन्धरूपयातिशयोक्त्या तस्येन्दावर्कभ्रान्तिमदलङ्कारो व्यज्यते॥ ४६॥

अपशङ्कमिति। अपशङ्कं निःशङ्कमङ्कपरिवर्त्तनेषु उत्सङ्गलुण्ठनेषूचिताः परिचिताः पतिम्भर्त्तारमुपैतुं पुरोऽग्रे चलिताः प्रयाताः आत्मजाः स्वसम्भवादुद्दिश्य निम्नगाः नदीः करुणेन दीनेन पत्रिणां पक्षिणां विरुतेन क्रोशनेन निमित्तेनैवोऽद्रिर्वत्सल

अपशङ्कमङ्कपरिवर्त्तनोचिता
श्चलिताः पुरः पतिमुपैतुमात्मजाः ।
अनुरोदितीव करुणेन पत्त्रिणां
विरुतेन वत्सलतयैष निम्नगाः ॥ ४७ ॥

मधुकरविटपानमिता
स्तरुपङ्क्तीर्बिभ्रतोऽस्य विटपानमिताः ।
परिपाकपिशङ्गलता
रजसा रोधश्चकास्ति कपिशङ्गलता ॥४८॥

तथा वात्सल्येन स्नेहेनेत्यर्थः । प्रेमा ना स्निग्धस्तु वत्सलः इत्य मरः । वत्सांसाभ्यां कामबले इति वलच् प्रत्ययः । अनुरोदिती वानुक्रोशतीवेत्युत्प्रेक्षा । रुदस्य पञ्चभ्य इति गुणः रुदादिभ्यः सार्व्व धातुके इतीट् ॥ ४७ ॥

मधुकरेति । मधुकरा एव विटास्तेषां पानमद्यपानमिताः प्राप्ताः । इणः कर्त्तरि क्तः । विटपैः शाखाविस्तारैरानमिताः विटपा नमिताः । विस्तारो विटपोऽस्त्रियामित्यमरः । तरुपङ्क्तीर्बिभ्रतो ऽस्याद्रेः रोधो नितम्बो गलता पतता परिपाकेण पिशङ्गीनां लतानां रजः पुष्परेणुः तेन परिपाकपिशङ्गलतारजसा कपिशं पिशङ्गं चकास्ति । मात्रावृत्तिरियमार्य्यागीतिरष्टगणा । अर्द्धे वसुगणा आर्य्यागीतिरिति पिङ्गलनागः ॥ ४८ ॥

प्राग्भागतइति । इहाद्रौ प्राग्भागतः ऊर्द्ध्वप्रदेशात् उपत्यकासु अधःप्रदेशेषु । उपत्यकाद्रेरासन्नेत्यमरः । उपाधिभ्यामित्यादिनोप शब्दात् त्यकन्प्रत्ययः । पतन् । झङ्कारः बिन्दरादिमधुकनमल

प्राग्भागतः पतदिहेदमुपत्यकासु
शृङ्गारितायतमहेभकराभमभ्रः ।
संलक्ष्यते विविधरत्नकरानुविद्ध
मूर्द्धप्रसारितसुराधिपचापचारु ॥ ४९ ॥
दधति च विकसद्विचित्रकल्प
द्रुमकुसुमैरभिगुम्फितानिवैताः ।
क्षणमलघुविलम्बिपिच्छदाम्नः
शिखरशिखाः शिखिशेखरानमुष्य ॥ ५० ॥

सञ्जातः शृङ्गारितः । शृङ्गारः सुरते नाट्ये रसे दिग्गजमण्डन इति विश्वः । आयतोदीर्घः तस्य महेभकरस्येवाभा यस्य तत् विविधरत्नानां करैरंशुभिरनुविद्धमनुरञ्जितमिदमभ्रः ऊर्द्धं प्रसारितं यत् सुराधिपचापमिन्द्रधनुस्तद्वच्चारु संलक्ष्यते। अत्रेन्द्र चापस्योर्द्धत्वासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः । अभूतोपमेति मतान्तरम् । तिरोहितविवक्षायां तूपमानस्य प्रसिद्धत्वादुपमैवेयम् ॥ ४९ ॥

दधतीति । किञ्चेति चार्थः अमुष्याद्रेरेताः शिखराणि शृङ्गाण्येव शिखाः केशपाशः । शिखा चूडा केशपाशीत्यमरः । विकसद्भिर्विचित्रैः नानावर्णैः कल्पद्रुमकुसुमैरभिगुम्फितान् ग्रथिता निव स्थितानित्युत्प्रेक्षा । अलघूनि विलम्बीनि लम्बमानानि च पिच्छान्येव दामानि स्रजो येषु तान् शिखिनः केकिन एव शेखरान् आपीडान् क्षणं दधतीव । शिखावलः शिखी केकीति शिखास्वापीड शेखराविद्यमरः । अत्र कुसुमगुम्फनोत्प्रेक्षालिङ्गेन पिच्छादीनां

सवधूकाः सुखिनोऽस्मि
न्नवरतममन्दरागतामरसदृशः ।
नासेवन्ते रसव
न्नवरतममन्दरागतामरसदृशः ॥ ५१ ॥
आच्छाद्य पुष्पपटमेष महान्तमन्त
रावर्तिभिर्गृहकपोतशिरोधराभैः ।
स्वाङ्गानि धूमरुचिमागुरवीं दधानै
र्धूपायतीव पटलैर्नवनीरदानाम् ॥ ५२ ॥

हामादिरूपकसिद्धिस्तदुत्थापिता चोत्प्रेक्षेति सङ्करः । पुष्पिताग्रा वृत्तमुक्तम् ॥ ५० ॥

सवधूका इति । अस्मिन्नद्रावद्वरे न भवन्तीत्यनवराः श्रेष्ठाः अन वरतमाः श्रेष्ठतमाश्च मन्दरागतैरमरैः सदृशः सरूपाश्च अनवरतम मन्दरागतामरसदृशः अमन्दरागाण्यतिरक्तानि तामरसानि पङ्के रुहाणीव दृशो येषान्ते अमन्दरागतामरसदृशः रक्तनेत्राः । पङ्के रुहन्तामरसमित्यमरः । सुखिनो भोगिनः सह वधूभिः सवधूकाः सन्तः । तेन सहेति तुल्ययोगे बहुव्रीहिः नद्यृतश्चेति कप् । रस वत्सानुरागं । गुणे रागे द्रवे रस इत्यमरः । नवरतं नूतनसुरतन्ना सेवन्त इति न किन्त्वासेवन्त एवेत्यर्थः । सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधाविति वामनः विशिष्टसुरतानां सेवनस्य सामान्यतः प्रसक्तेः । उपमालङ्कारः । गतैयमार्य्यागीतिः ॥ ५१ ॥

आच्छाद्येति । एषोऽद्रिर्महान्तं पुष्पाण्येव पट इति रूपकन्त माच्छाद्य अन्तः पटाभ्यन्तरे आवर्तिभिरभ्रमद्भिः । गृह

अन्योन्यव्यतिकरचारुभिर्विचित्रै
रत्रस्यन्नवमणिजन्मभिर्मयूखैः ।
विस्मेरान् गगनसदः करोत्यमुष्मि
न्नाकाशे रचितमभित्ति चित्रकर्म्म ॥ ५३ ॥

माभीक्ष्ण इति णिनिः। गृहकपोतशिरोधरायां गृहपारावतकण्ठस्या भेवाभा येषान्तैरित्युपमा । पारावते कपोतः स्यादिति विश्वः । अगुरोः कालागुरोरिमामागुरवीं । कालागुर्वगुरुः स्यादित्यमरः । धूमश्चिन्धूमकान्तिन्तसुहस्रोमित्यर्थः । अतएव निदर्शना । इधामैर्नवमीरदानां पटलैः स्वाङ्गानि धूपायतीव धूपैरिवा धिवासयतीवेत्युत्प्रेक्षा रूपकोपमानिदर्शनाभिरङ्गैः सङ्कीर्य्यते । धूप सन्तापे इति धातोः । गुपूधूपविच्छिपणिपनिभ्य आय इत्यायप्रत्ययः ॥ ५२ ॥

अन्योन्येति । अमुष्मिन्नद्रावन्योन्येषां व्यतिकरेण मिश्रणेन चारुभिः अतएव विचित्रैर्नानावर्णैरत्रस्यन्तः त्रासदोषेणादुष्यन्तः । त्रासोभीमणिदोषयोरिति विश्वः । वा भ्राशेत्यादिना वैकल्पिकः श्यन्प्रत्ययः । तेभ्योनवमणिभ्योजन्म येषान्तैर्मयूखैराकाशे रचित मभित्ति अकुड्यं अनाधारमित्यर्थः चित्रकर्म कर्तृ गगनसदः खेचरान् विस्मेरान् विस्मयशीलान् करोति । नमिकम्पीत्या दिना रप्रत्ययः । अत्र मणिमयूखेषु खे चित्रकर्म्मभ्रान्तिमता मेवाभित्तिचित्रकर्म्मेति अकारणकार्य्योत्पत्तिवर्णनात् भ्रान्तिमद नङ्करोत्थापिता विभावनेति सङ्करः । कारणेन विना कार्य्यस्यो त्पत्तिर्विभावनेति । प्रहर्षिणी वृत्तम् ॥ ५३ ॥

समीरशिशिरः शिरःसु वसतां
सतां जवनिकानिकामसुखिनाम्।
बिभर्त्ति जनयन्नयं मुदमपा
मपायधवलावलाहकततीः ॥ ५४ ॥

समीरेति। समीरेण मारुतेन शिशिरः शीतलः शिरःसु शिखरेषु वसतां निकामसुखिनां अत्यन्तसुखिनां सतां पुण्यवतां मुदञ्जनयन्नय मद्रिरपामम्भसामपायेनापगमेन धवलावलाहकततीर्मेघपङ्क्तीरेव जवनिकास्तिरस्करिणीर्बिभर्त्ति। अनावृतेष्वपि शिखरेषु क्रीडने मेघैरेवावरणतां सम्पाद्य मुदञ्जनयतीत्यर्थः। अत्र वलाहकततिष्वारोप्यमाणानां जवनिकानां मुदञ्जनयन्निति प्रकृतोपयोगित्ववर्णनात् परिणामालङ्कारः। आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति लक्षणात्। रूपके तूपरञ्जनमात्रमिति भेदः। जलोद्धतगति र्वृत्तम्। रसैर्जसजसा जलोद्धतगतिरिति लक्षणात्॥ ५४ ॥

मैत्रीति। इहाद्रौ समाधिं योगम्बिभ्रतीति समाधिभृतो योगिनः। मैत्री करुणा मुदिता उपेक्षेति चतस्रश्चित्तवृत्तयः। तत्र पुण्यकृत्सु मैत्री दुःखिषु करुणा सुखिषु मुदिता अनुमोदनं पापिषु उपेक्षा। मैत्री आदिर्येषान्तानि चित्तस्य परिकर्म्माणि प्रसाधकानि शोधकानीत्यर्थः तानि विन्दन्ति लभन्त इति तद्विदः तल्लाभक्षीणान्तःकरणमलादित्यर्थः अतएव क्लेशप्रहाणं विधाय। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः। तत्रानित्येषु नित्यत्वाभिमानः अनात्मनि च देहेन्द्रियादावात्मधीरित्यादिर्विभ्रमोऽविद्या। अस्मिता अहङ्कारः। रागोऽभिमतविषया

मैत्र्यादिचित्तपरिकर्म्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः ।
ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम् ॥५५॥
मरकतमयमेदिनीषु भानो
स्तरुविटपान्तरपातिनो मयूखाः ।
अवनतशितिकण्ठकण्ठलक्ष्मी
मिह दधति स्फुरिताणुरेणुजालाः ॥ ५६ ॥

भिलाषः । द्वेषोऽनभिमतेषु रोषः । अभिनिवेशः कार्य्याकार्य्ये
ष्वाग्रहः । ते हि पुरुषं क्लिश्यन्तीति क्लेशाः क्लेशहेतवः । पञ्चाद्यच् ।
तेषां प्रहाणं चयः । कृत्यल्युट इति णत्वं । तद्विधाय क्लेशान् छित्वेत्यर्थः ।
अतो लब्धः सबीजः सावलम्बनो योगो यैस्ते लब्धसबीजयोगाः सन्तः
आलम्बनमेव व्यनक्ति । सत्त्वेति । सत्त्वपुरुषयोः प्रकृतिपुरुषयोरन्यतया
अन्यत्वेन मिथोभिन्नत्वेन ख्यातिं ज्ञानं चाधिगम्य प्रकृतिपुरुषौ
भिन्नाविति ज्ञात्वेत्यर्थः । प्रकृतिपुरुषयोर्विवेकाग्रहणात्संसारः ।
विवेकग्रहणान्मुक्तिरिति साङ्ख्याः । अथ तां ख्यातिमपि निरोद्धुं
निवर्त्तयितुं वाञ्छन्ति वृत्तिरूपात्मां निवर्त्य स्वयम्प्रकाशतयैव
स्थातुमिच्छन्तीत्यर्थः । प्रकृतावुपरतायां पुरुषस्य स्वरूपेणावस्थानं
मुक्तिरिति साङ्ख्यसिद्धान्तः । न केवलभोगभूरियं किन्तु मोक्षक्षेत्र
मपीति भावः ॥ ५५ ॥

मरकतेति । इहाद्रौ मरकतानां विकारा मरकतमय्यस्तासु
मेदिनीषु । स्त्रियः पुम्वदित्यादिना पुम्वद्भावः । तरूणां विटप

या बिभर्त्ति कलवल्लकीगुण
स्वानमानमतिकालिमालया ।
नात्र कान्तमुपगीतया तया
स्वानमा नमति कालिमालया ॥ ५७ ॥

पल्लवाः तेषामन्तरैरवकाशैः पतन्तीति तथोक्ताः । विटपः पल्लवे षिड्गे विस्तारे स्तम्भशाखयोरिति विश्वः । स्फुरितान्यणुरेणूनां सूक्ष्मरजसां जालानि येषु ते भानोर्मयूखाः अवनतस्य शितिकण्ठकण्ठस्य मयूरकन्धरायाः लक्ष्मीं दधतीति निदर्शनालङ्कारः । पुष्पिताग्रा वृत्तम् ॥ ५६ ॥

येति । अत्यादृतावत्यन्तः कालिमा कार्ष्ण्यं यस्याः सा अतिकालिमा अतिश्यामेत्यर्थः । न विद्यते लयोलयनं क्वचिदवस्थानं यस्याः सा अलया भ्रमन्तीत्यर्थः । अतएव मस्वनेति भावः । या अलिमाला कलोऽव्यक्तमधुरः वल्लकीगुणस्वानस्य वीणातन्त्रीशब्दस्य मानमुपमानं बिभर्त्ति तन्त्रीवद्भनतीत्यर्थः । उपमालङ्कारः । उपगीतया समीपे गातुम्प्रवृत्तयैव न तु पूर्व्वङ्गायन्त्येवेति भावः । आदिकर्म्मणि क्तः कर्त्तरि चेति क्तः । तया अलिमालया भृङ्गावल्या स्वानमा सुखेनानमयितुमाक्रष्टुं शक्या । ईषद्दुरित्यादिना खल्प्रत्ययः । का वा स्त्री कान्तं प्रियं न नमति सर्व्वापि मानं विहाय कान्तं सद्यः प्रणमत्येव तथोद्दीपकत्वाद्गस्त्वेत्यर्थः । रथोद्धता वृत्तम् । रोनराविति रथोद्धता लगाविति लक्षणात् ॥ ५७ ॥

सायमिति । इत्यादौ वप्राः सानवः । वप्रोऽस्त्री सानुमानयो रित्यमरः । साथं रात्रौ शशाङ्ककिरणैराहतेभ्यश्चन्द्रकान्तेभ्यो

सायं शशाङ्ककिरणाहतचन्द्रकान्त
निस्यन्दिनीरनिकरेण कृताभिषेकाः ।
अर्कोपलोल्लसितवह्निभिरह्नि तप्ता
स्तीव्रं महाव्रतमिवात्र चरन्ति वप्राः ॥ ५८ ॥

एतस्मिन्नधिकपयःश्रियं वहन्त्यः
संक्षोभं पवनभुवा जवेन नीताः ।
वाल्मीकेररहितरामलक्ष्मणानां
साधर्म्यं दधति गिरां महासरस्यः ॥५९॥

निस्यन्दिना प्रस्राविणा नीरनिकरेण जलपूरेण कृताभिषेकाः कृतस्नानाः अह्नि अर्कोपलेभ्यः सूर्य्यकान्तेभ्यः उल्लसितैरुत्थितै र्वह्निभिस्तप्ताः सन्तः तीव्रं उग्रं दुश्चरं महाव्रतं महातपश्चरन्तीवेत्यु त्प्रेक्षा ॥ ५८ ॥

एतस्मिन्निति । एतस्मिन्नद्रावधिकपयःश्रियमधिकाम्बुस मृद्धिं वहन्त्यः अन्यत्र तु अधिकाः कपयः सुग्रीवादयो वर्ण्यत्वेन यासु ताः अधिकपयः श्रियं गुणालङ्कारादिशोभां वहन्त्यः पवना द्भवतीति पवनभूस्तेन पवनभुवा वायुजन्येन जवेन वेगेन संक्षोभ मुल्लसन्नीताः अन्यत्र तु जवेन जविना । जवोजविनि वेगे स्यादिति विश्वः । पवनभुवा हनुमता संक्षोभमौद्धत्यं नीता हनुमद्वेगवर्णनया प्रागल्भ्यं नीतादृत्यर्थः । वाक्पक्षे सर्वत्र षष्ठ्या विपरिणामः कार्य्यः । महासरस्योमहासरांसि अरहितावबर्जितौ रामलक्ष्मणौ याभिस्तासां अन्यत्र तु रामोरमणः अरहितरामा अवियुक्तरामाः

इह मुहुर्मुदितैः कलभैरवः
प्रतिदिशं क्रियते कलभैरवः ।
स्फुरति चानुवनं चमरीचयः
कनकरत्नभुवां च मरीचयः ॥ ६० ॥

लक्ष्मणाः सारसयोषितो यासु ताः केचित्त्वरहितरामाः अवियुक्तरथौकाः लक्ष्मणाः सारसाइति पुंपक्षिपरत्वेन व्याचक्षते तेषां हंसस्य योषिदरटा सारसस्य तु लक्ष्मणा लक्ष्मणौषधिसारस्योरित्याद्यमरविश्वप्रकाशादिवाक्यगतनियतस्त्र्यर्थताविरोधः । तासां वाल्मीकेर्गिरां साधर्म्यं सादृश्यं दधति । अत्र पवनभुवा जवेनेत्यत्रैकशब्दावलम्बिफलद्वयवदभङ्गैकपादगतत्वेनार्थद्वयप्रतीतेरर्थश्लेषः । अन्यत्र पदभङ्गेनार्थद्वयप्रतीतेर्जतुकाष्ठवच्छब्दयोरेव मिथः श्लिष्टत्वाच्छब्दश्लेष इत्युभयसाहित्यादुभयश्लेषोऽयं प्रकृताप्रकृतगोचरः उपमालङ्कारमिति सङ्करः ॥ ५८ ॥

इहेति । इहाद्रौ मुदितैरिच्छाविहारसन्तुष्टैः कलभैः करिपोतैः । कलभः करिशावक इत्यमरः । दिशि दिशि प्रतिदिशं । यथार्थेऽव्ययीभावः अव्ययीभावे शरत्प्रभृतिभ्य इति समासान्तोऽच्प्रत्ययः । कलश्चासौ भैरवश्च कलभैरवो मधुरभीषणः । विशेषणयोरपि शुक्लकृष्णवदेकैकोपसर्जनत्वविवक्षया विशेषणसमासः । रवो हृहणध्वनिः मुहुः क्रियते अनुवनं वने वने चमरीचयः चमरीमृगसङ्घः स्फुरति । किञ्च कनकरत्नानां या भुवस्तासां मरीचयश्च स्फुरन्ति समृद्धिमद्दसुवर्णनादुदात्तालङ्कारे यमकस्याङ्गत्वम्‌
॥ ६० ॥

त्वक्सारन्ध्रपरिपूरणलब्धगीति
रस्मिन्नसौ मृदितपक्ष्मलरल्लकाङ्गः ।
कस्तूरिकामृगविमर्दसुगन्धिरेति
रागीव सक्तिमधिकां विषयेषु वायुः ॥ ६१ ॥
प्रीत्यै यूनां व्यवहिततपनाः
प्रौढध्वान्तं दिनमिह जलदाः ।
दोषामन्यं विदधति सुरत
क्रीडायासश्रमशमपटवः ॥ ६२ ॥

त्वगिति । अस्मिन्नद्रौ त्वचि सारो येषान्ते त्वक्सारा वंशाः । वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजा इत्यमरः । तेषां रन्ध्राणि तेषां परिपूरणेन ध्मापनेन लब्धा गीतिर्गानसुखं येन सः मृदितानि सम्मृष्टानि पक्ष्मलानि लोमशानि रल्लकानां कम्बलमृगाणां कम्बलानां वाङ्गानि शरीराणि येन सः । रल्लकः कम्बलमृगे कम्बले परिकीर्त्तित इति वैजयन्ती । एतेन स्पर्शसुखमुक्तं कस्तूरिकामृगाणां विमर्देन संघर्षेण सुगन्धिः शोभनगन्धः यद्यपि । गन्धस्येत्वे तदेकान्त ग्रहणं कर्त्तव्यमित्युक्तं तथापि निरङ्कुशाः कवय इत्यपर्य्यनुयोगः । असावेवम्भूतो वायूरागीव कामीव विषयेषु प्रदेशेषु च । विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि चेति विश्वः । अधिकां सक्तिं व्यासक्तिमेति गच्छति ॥ ६१ ॥

प्रीत्यै इति । इहाद्रौ युवतयश्च युवानश्च तेषां यूनां । पुमान् स्त्रियेत्येकशेषः । प्रीत्यै व्यवहिततपनाः तिरोहितार्काः अतएव सुरतान्येव क्रीडास्ताभिर्यआयासो व्यायामस्तेन यः श्रमः खेदः । श्रमः

भग्नोनिवासोऽयमितश्च पुष्पैः
सदानतोयेन विषाणिनागः ।
तीव्राणि तेनोज्झति कोपितोऽसौ
सदानतोयेन विषाणि नागः ॥ ६२ ॥

खेदोऽध्वरत्यादेरिति लक्षणात्। तस्य भ्रमे वारणे पटवः समर्थाः जलदाः प्रौढध्वान्तं मेघावरणाद्गाढान्धकारं दिनं दिवसन्दोषा रात्रिमात्मानं मन्यत इति दोषामन्यं रात्रिमानिनं विदधति मेघावरणैर्मलिना दिवसः स्वयमप्यात्मानं रात्रिं मन्यते किमुतान्य इत्यर्थः । दोषेत्यव्ययन्तदुपपदान्मन्यतेर्धातोरात्ममाने खश् चेति खश् प्रत्ययः। इह यूनां दोषावद्दिवापि विस्रब्धं विहाराः सम्भवन्तीति भावः । भ्रमरविलसितं वृत्तम्। म्भौ न्लौ गः स्याद्भ्रमरविलसितमिति लक्षणात् ॥ ६२ ॥

भग्न इति। इहाद्रावस्य नागस्य निवासः आश्रयः सदा पुष्पैरानतो नम्रोऽयं न गच्छतीत्यगो वृक्षः दानतोयैर्मदोदकैः सह वर्त्तते यस्तेन सदानतोयेन मत्तेनेत्यर्थः। येन विषाणिना दन्तिना भग्नस्तेन विषाणिना कोपितः कोपमापितः असौ नागः सर्पस्तीव्राणि विषाणि गरलान्युज्झति वमति परप्रतीकाराक्षमस्य क्रोधः स्वाश्रयमेव व्याहन्तीति भावः ॥ ६२ ॥

प्रालेयेति । ईश्वरः शिवोऽपि किमुतान्य इति भावः । चार्म्मं यदिभचर्म्म तदेव वसनं तदेवावरणं छादनं यस्य सः तथा स्वस्वलावरणेनापि शिथिलावरण इति भावः । प्रलयादागतं प्रालेयं हिमं । तत आगत इत्यणि केकयमित्रयुप्रलयानां यादेरियइति यस्यादे

प्रालेयशीतमचलेश्वरमीश्वरोऽपि
सान्द्रेभचर्म्मवसनावरणोऽधिशेते ।
सर्व्वर्त्तुनिर्वृतिकरे निवसन्नुपैति
न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि ॥ ६४ ॥

नवनगवनलेखाश्याममध्याभिराभिः
स्फटिककटकभूभिर्नाटयत्येष शैलः ।
अहिपरिकरभाजो भास्मनैरङ्गरागै-
रधिगतधवलिम्नः शूलपाणेरभिख्याम् ॥ ६५ ॥

यादेशः । तेन शीतं शीतलमचलेश्वरं हिमवन्तमधिशेते तस्मिन् शेते इत्यर्थः । अधिशीङ्स्थासां कर्म्मेति कर्म्मत्वं । सर्व्वर्त्तुभिर्निर्वृतिकरे सदासुखकरे इहाद्रौ निवसन् पुनर्नास्ति किञ्चनास्येत्यकिञ्चनो निःस्वोऽपि । उच्चावचेत्यादिना मयूरव्यंसकादिषु निपातनात्तत्पुरुषः । किञ्चिदल्पमपि द्वन्द्वदुःखं शीतोष्णदुःखं नोपैति नित्यं सन्निहितानां ऋतूनामन्योन्यदोषनिवारकत्वादिति भावः । द्वन्द्वं युग्मं हिमोष्णादि मिथुनं कलहो रहइति वैजयन्ती । अत्रोपमानात् हिमाचलादुपमेयस्याधिक्यवर्णनाद्व्यतिरेकः ॥ ६४ ॥

नवेति । एष शैलो रैवतको नवया नगवनलेखया तरुवनपङ्क्त्या श्यामोमध्योमध्यभागोयासान्ताभिराभिः स्फटिकानां कटकभूभिः तटप्रदेशैः करणैरहिरेव परिकरो गात्रिकाबन्धस्तं भजतीति तस्य अहिपरिकरभाजः । भवेत्परिकरो व्राते पर्य्यङ्कपरिवारयोः प्रगाढे गात्रिकाबन्धे विवेकारम्भयोरपीति विश्वः । भजोण्विः । भास्मनैः भस्ममयैः । वैकारिकोण् प्रत्ययः अणिति प्रकृतिभावान्नस्लुक्तिरिति

दधद्भिरभितस्तटौ विकचवारिजाम्बू नदै-
र्विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः ।
निषेव्य मधु माधवाः सरसमत्र कादम्बरं
हरन्ति रतये रहः प्रियतमाङ्गकादम्बरम् ॥ ६६ ॥

टिलेपीन । अङ्गरागैरनुलेपनैरधिगतधवलिम्नः प्राप्तधावल्यस्य शूलं पाणौ यस्य तस्य शूलपाणेरीश्वरस्य । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः । अभिख्यां शोभां । अभिख्या नामशोभयोरित्यमरः । आतश्चोपसर्गेइत्यण्प्रत्ययः । नाटयत्यनुकरोति निदर्शनालङ्कारः । मालिनी वृत्तमेतत् ॥ ६५ ॥

दधद्भिरिति । अत्राद्रौ माधवस्य इमे माधवाः यादवाः विकचानि वारिजानि येषु तान्यम्बूनि ययोस्तौ विकचवारिजाम्बू अभितउभयतस्तटौ दधद्भिः नदैः । अम्बुप्रवाहैः प्राक्स्रोतसोनद्यः प्रत्यक्स्रोतसोनदाः नर्मदां विनेत्याहुः । विनोदितोदिनक्लमो येषान्ते विहारापनीतार्किक्रमसन्तापाइत्यर्थः किञ्च जाम्बूनदस्य विकारैर्जाम्बूनदैः कनकभूषणैः कृतरुचोजनितशोभाः सन्तः रसवत् स्वादवत् । रसोगन्धे रसे स्वादइति विश्वः । कादम्बइक्षुः । कादम्बः कलहंसेक्ष्वोरिति विश्वः । कादम्बं राति रलयोरभेदाल्लाति प्रकृतित्वेनादत्तइति कादम्बरमैक्षवं । पानसन्ध्याचमाधूकं खार्ज्जूरन्तालमैक्षवमिति स्मरणात् । आतोऽनुपसर्गे कः । मधु मद्यं । एवञ्च मधुकादम्बरशब्दयोः सामान्यविशेषपरत्वादपौनरुक्त्यं । निषेव्य पीत्वा । क्षत्रियाणां गौड्याएव निषेधादिति भावः । रतये सुरतार्थं रहः प्रियतमानां प्रेयसीनामङ्गादेवाङ्काच्चाकादम्बरं वस्त्रं हरन्ति

दर्प्पणनिर्म्मलासु पतिते घनतिमिरमुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः ।
व्रीडमसम्मुखोऽपि रमणैरपहृतवसनाः
काञ्चनकन्दरासु तरुणीरिह नयति रविः ॥६७॥

यादवाश्चेह मधुपानरतोत्सवैर्विस्रब्धं विहरन्तीति भावः । पृथ्वी वृत्तम् । जसौ जसयलावसुग्रहयतिश्च पृथ्वी गुरुरिति लक्षणात् ॥ ६६ ॥

दर्प्पणेति । इहाद्रौ रविर्दर्प्पणनिर्म्मलासु पुरः रौप्यभित्तिषु । काञ्चनकन्दराग्रवर्त्तिरजतसानुषु पतिते सङ्क्रान्ते घनं सान्द्रं यत्तिमिरं तन्मुष्णाति हरतीति तन्मुट् । क्विप् । तस्मिन् ज्योतिषि सतेजसि काञ्चनकन्दरासु मुहुः प्रतिफलति सम्मूर्च्छति सति रमणैरपहृतवसनास्तरुणीरसंमुखोऽपि कन्दरानभिमुखोऽपि व्रीडं त्रपां । यद्यपि गुरोश्च हल इति स्त्रियामप्रत्ययः अतएव मन्दाक्षं ह्रीस्त्रपा व्रीडेत्यमरः तथापि तत्र स्त्रीत्वाविवक्षायां बाहुलकत्वाच्च पुंस्त्वं च । अतएवाविधौ गुरोः स्त्रियां बहुलविवक्षेति वामनः । नयति प्रापयति । नीवह्योर्हरतेश्चेति द्विकर्म्मकता । यस्मिन् सुवर्णकन्दरासु क्रीडार्थं प्रविष्टाः स्त्रियोऽन्धकार इति कृत्वा पुरुषैरपहृतवस्त्राः सत्यः पुरःस्थितरौप्यभित्तितेजसामन्तःप्रतिबिम्बवत्प्रकाशे सति लज्जन्त इति भावः अत्र काञ्चनकन्दराणामसम्मुखार्कज्योतिःप्रतिफलनासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः । वंशपत्रपतितं वृत्तम् । दिङ्मुनि वंशपत्रपतितं भरनभनलगैरिति लक्षणात् ॥ ६७ ॥

अनुकृतशिखरौघश्रीभिरभ्यागतेऽसौ
त्वयि सरभसमभ्युत्तिष्ठतीवाद्रिरुच्चैः ।
द्रुतमरुदुपनुन्नैरुन्नमद्भिः सहेलं
हलधरपरिधानश्यामलैरम्बुवाहैः ॥ ६८ ॥
इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
रैवतकवर्णनं नाम चतुर्थः सर्गः ॥ ४ ॥

अनुकृतेति । असावुच्चैरुन्नतोऽद्रिः रैवतकः त्वयि अभ्यागते सति अनुकृता शिखरौघाणां श्रीर्यैस्तैस्तथोक्तैः शिखरौघभ्रमकारिभिरिति भावः । अत एवात्र श्रीरिव श्रीरिति निदर्शनया भ्रान्तिमदलङ्कारो व्यज्यते । द्रुतमरुता शीघ्रमारुतेनोपनुन्नैः प्रेरितैः अतएव सहेलं सलीलमुन्नमद्भिः उत्पतद्भिः धरतीति धरः । पचाद्यच् । हलस्य धरो हलधरो बलभद्रः तस्य परिधानानि अम्बराणि तद्वत् श्यामलैः श्यामैरम्बुवाहैः निमित्तेन सरभसमभ्युत्तिष्ठतीव प्रत्युत्थानं करोतीवेति क्रियानिमित्ता क्रियास्वरूपोत्प्रेक्षा विशिष्टमेघोन्नमनक्रियया प्रत्युत्थानक्रियोत्प्रेक्षणात् सा चोक्तनिदर्शनानुप्राणितेति सङ्करः शब्दस्तु वृत्त्यनुप्रासः । मालिनी वृत्तम् ॥ ६८ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये चतुर्थः सर्गः ॥ ४ ॥

इत्थङ्गिरः प्रियतमा इव सोऽव्यलीकाः
शुश्राव सूततनयस्य तदा व्यलीकाः ।
रन्तुं निरन्तरमियेष ततोऽवसाने
तासाङ्गिरां च वनराजिपटं वसाने ॥१॥

तं स द्विपेन्द्रतुलितातुलतुङ्गशृङ्ग
मभ्युल्लसत्कदलिकावनराजिमुच्चैः ।
विस्तारुद्धवसुधोऽन्वचलश्चचाल
लक्ष्मीन्दधत्प्रतिगिरेरलघुर्बलौघः ॥ २ ॥

इत्थमिति । स हरिरित्थमनेन प्रकारेण । इदमस्थमुरिति थमुप्रत्ययः । अव्यलीकाः अप्रियरहिताः । व्यलीकन्त्वप्रियेऽनृते इत्यमरः । प्रियतमाः प्रेयस्य इव स्थिताः कान्तासम्मिता इत्यर्थः व्यलीकाद्विगतान्तताः सत्याः सूततनयस्य सारथिकुमारस्य दारुकस्य गिरः तदा शुश्राव ततः श्रवणानन्तरं तासाङ्गिरामवसाने समाप्तौ निरन्तरं नीरन्ध्रवनराजिरेव पटस्तं वसाने आच्छादयति । वस आच्छादन इति धातोः कर्त्तरि लटः शानजादेशः । गिरौ रैवतकाद्रौ रन्तुं क्रीडितुमियेष तत्र वसतिं कर्त्तु मिच्छति स्मेत्यर्थः उपमायमकयोः संसृष्टिः । सर्गेऽस्मिन् वसन्त तिलका वृत्तम् । उक्ता वसन्ततिलका तभजाजगौ गइति ॥ १ ॥

तमिति । कदल्य एव कदलिकाः वैजयन्त्योरम्भातरवश्च । कदली वैजयन्त्यां च रम्भायां हरिणान्तरे इति विश्वः । अभ्यु ल्लसन्त्यः कदल्यो वैजयन्त्यो वनराजय इव यस्य सः अन्यत्र रम्भाक्ष

भास्वत्करव्यतिकरोल्लसिताम्बरान्ताः
आपत्रपा इव महाजनदर्शनेन ।
संविव्युरम्बरविकाशि चमूसमुत्थं
पृथ्वीरजः करभकण्ठकडारमाशाः ॥३॥

पङ्क्तयो यस्य तमिति योज्यम् । उच्चैस्त्वतः विस्तारेण च रुद्धवसुधः व्याप्तभूमिः अतएव प्रतिगिरेर्लक्ष्मीं दधत् स्वयमप्यन्यो गिरिरिव स्थित इत्यर्थः अलघुर्महान् स बलौघः सेनासङ्घः द्विपेन्द्रैस्तुलितान्यतुलान्यप्रतिमानि द्विपेन्द्रव्यतिरिक्तप्रतिमारहितानि उत्तुङ्गशृङ्गाणि यस्य तमलघोकमन्वचलं रैवतकमनु चचाल तम्प्रति ययावित्यर्थः । अनुर्लक्षण इति कर्मप्रवचनीयत्वात्तद्योगे द्वितीया । अत्र प्रतिगिरेः कस्यचिदप्रसिद्धत्वात् गिरिधर्मयोगी बलौघः प्रतिगिरेर्लक्ष्मीमिव लक्ष्मीं दधातीति निदर्शनामुखेन प्रतियोगित्वेनोत्प्रेक्ष्यते इत्युत्प्रेक्षैवेयं श्लेषानुप्राणितेति सङ्करः ॥ २ ॥

भास्वदिति । आशा दिशो भास्वत्करव्यतिकरेण सूर्यांशुव्याप्त्या उल्लसिताम्बरान्ताः प्रकाशिताकाशदेशाः अन्यत्र भास्वान् भास्वरः अभिरूपः । भास्वान् भास्वरसूर्ययोरिति विश्वः । तस्य हस्तस्य स्पर्शेन उल्लसिताम्बरान्ताः स्रस्तवस्त्राञ्चलाः अतएव महाजनदर्शनेन आपत्रपा इव । लज्जा सापत्रपान्यत इत्यमरः । अम्बरविकाशि व्योमव्यापि वासश्शोभि च । अम्बरं व्योम्नि वाससीति विश्वः । चमूषु समुत्थं करभ उष्ट्रपोतः । उष्ट्रे क्रमेलकमयमहाङ्गाः करभः शिशुरित्यमरः । तस्य कण्ठ इव कडारं कपिशं । कडारः कपिशः पिङ्ग इत्यमरः । पृथ्वीरजः संविव्युः संवव्रुराच्छादयामासु

आवर्त्तिनः शुभफलप्रदशुक्तियुक्ताः
सम्पन्नदेवमणयोभृतरन्ध्रभागाः ।
अश्वाः प्यधुर्वसुमतीमतिरोचमाना
स्तूर्णं पयोधयइवोर्म्मिभिरापतन्तः ॥ ४ ॥

रित्यर्थः । वेञः संवरणे लिट् किलात्समप्रसारणे द्विर्भावः एरनेकाच इति यणादेशः । स्त्रियोवस्त्रापहारे लज्जया यत्किञ्चिदाच्छादयन्तीति भावः । अत्राचेतनास्वाशासु श्लिष्टविशेषणमहिम्ना स्त्रीप्रतीतौ तदभेदाध्यवसायेन संव्यानव्यवहारसमारोपात् समासोक्तिः । सा च सापत्न्यपत्नीत्प्रेक्षानुप्राणितेति सङ्करः ॥ ३ ॥

आवर्त्तिनइति । आवर्त्तिनः दशावर्त्तवन्तः।प्रशंसायामिति णिनिः । ते च द्वावुरस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः । एकोभाले ऽपाने च दशावर्त्ताधुवाः स्मृताइत्युक्तादश ध्रुवाख्या विवक्षिताः । अन्येषामनन्तरमेव पृथगभिधानात् । अन्यत्र तु जलभ्रमवन्तः । स्यादावर्त्तोम्भसाभ्रमइत्यमरः । रोमसंस्थाने तु तत्साम्याद्व्यपदेशः तदुक्तम् । आवर्त्तसाम्यादावर्त्तोरोमसंस्थानमङ्गिनामिति । शुभफलानि राज्यलाभादीनि प्रददतीति शुभफलप्रदाः । प्रे दाभिइति कः। ताभिः शुक्तिभिः संस्थानैरावर्त्तविशेषैर्युक्ताः । तदुक्तम् । वक्षःस्थाः शुक्तयस्तिस्रऊर्द्ध्वरोमाजयावहाइति । अन्यत्र शुभफलानि मुक्ताफलानि तत्प्रदाः शुक्तयोमुक्तास्फोटाः ताभिर्युक्ताः । मुक्तास्फोटे ऽप्यावर्त्ते शुक्तिः शङ्खकपालयोरिति यादवः । सम्पन्नाः समग्राः देवमणयोनिगालावर्त्ताः कौस्तुभादिदिव्यमणयश्च येषान्ते । आवर्त्तोरोमजोदेवमणिस्सएष निगालजः । निगालस्तु गलोद्देशे

आरचमग्रमवमत्य सृणिं सिताग्र
मेकः पलायत जवेन कृतार्त्तनादः ।
अन्यः पुनर्मुहुरुदप्लवतास्तभार
मन्योन्यतः पथि बताबिभितामिभोष्ट्रौ ॥ ५ ॥

सकृत् इति वैजयन्ती। ग्रन्ता: पूर्वापरभागाः पार्श्वदेशा निम्नप्रदेशाश्च येषान्ते अतिशयिता रोचमानाः कण्ठावर्त्ता येषान्ते अतिरोचमानाः। कण्ठेरोरमानस्तु स्वामिसौभाग्यवर्द्धनइति वैजयन्ती। अन्यत्र तु अत्यन्तं दीप्यमानादत्यर्थः ऊर्मिभिर्गतिविशेषैर्वीचिभिश्च पतन्तः आधावन्तः। पङ्क्तीकृतानामश्वानां गमनोत्तमनाकृतिः। अतिवेगसमायुक्ता गतिरूर्म्मिरुदाहृतेति वैजयन्ती। ईदृशोऽश्वाः पयोधयइव तूर्णं वसुमतीं पृथ्वीं छादयन्ति स्म। अपिधानतिरोधान पिधानच्छदनानि चेत्यमरः। अपिपूर्व्वाद्धातेर्लङ् वष्टि भागुरि रल्लोपमवाप्योरुपसर्गयोरित्यकारलोपः। एकनालावलम्बिफल द्वयवदेकशब्देनार्थद्वयप्रतीतेरर्थश्लेषोऽयं प्रकृताप्रकृतगोचरः उपमा लङ्कृमिति सङ्करः॥ ४ ॥

आरचेति। पथि मार्गे इभोष्ट्रावन्योन्यतः अन्योन्यस्माद् बिभिताभीतवन्तौ। ञिभी भये लङ् भियोऽन्यतरस्यामितीत्वं। बतेत्यनयोरपि भीतिरिति खेदेऽनिविस्मये वा। खेदानुकम्पासन्तोष विस्मयामन्त्रणे वतेत्यमरः। तत्र लिङ्गमाह। एकइभआरचः कुम्भयोरधस्तात् मग्नप्रविष्टं शिताग्रन्तीक्ष्णमुखं सृणिमङ्कुशं। अङ्कुशोऽस्त्री सृणिर्द्वयोरित्यमरः। अवमत्यावधूय कृतआर्त्तनादो येन सः अतिकरुणं क्रन्दन्नित्यर्थः जवेन पलायत पलायितवान्।

आयस्तमैक्षत जनस्तुरगाग्रपादं
गच्छन्तमुच्चलितचामरचारुमश्वं ।
नागं पुनर्मृदु सलीलनिमीलिताक्षं
सर्वः प्रियः खलु भवत्यनुरूपचेष्टः ॥ ६ ॥

परापूर्व्वादस्यतेर्लङ् उपसर्गस्यायतावितिरेफस्य लत्वम् । अन्यः पुनरश्वस्तु अस्तभारन्निरस्तभारं यथा तथा मुञ्चद्रवत उत्प्लुतवान् । प्लु गतावितिलङ् । स्वभावोक्तिः ॥ ५ ॥

आयस्तमिति । जनस्तुरगाग्रपादं चञ्चलपूर्व्वचरणं यथा तथा गच्छन्तं शीघ्रं धावन्तमित्यर्थः उच्चलितैः उल्लसितैश्चामरैश्चारुमश्वमायस्तं सयत्नमाहृतं यथा तथा । यसु प्रयत्ने कर्त्तरिक्तः क्लान्तं क्रियाविशेषणम् । ऐक्षत ईक्षितवान् । ईक्षतेर्लङ् आडजादीनामाटश्चेति वृद्धिः । नागं पुनर्गजन्तु सलीलं निमीलिते अक्षिणी यस्मिन् कर्म्मणि तत् । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् । मृदु मन्दङ्गच्छन्तमायस्तमैक्षत कथं शीघ्रमन्दयोस्तुल्यदृष्टिरतआह सर्व्वः प्राणी अनुरूपचेष्टः स्वजात्युचितव्यापारः सन् प्रीणातीति प्रियः प्रीतिकरोभवति खलु । इगुपधज्ञाप्रीतिकर्त्तरि कः । अर्थान्तरन्यासः ॥ ६ ॥

त्रस्यइति । करेणोरिभ्याः । करेणुरिभ्यां स्त्रीनेभेइत्यमरः । भीत्रार्थानां भयहेतुरित्यपादानत्वम् । त्रस्तोभीतः खरोगर्दभः समस्तजनस्य हासं करोतीति तस्करः सन् । कृञोहेत्वित्यादिना टप्रत्ययः । तावत्तदवधि प्रखरं भृशमुत्तलयाञ्चकार उत्पपात यावत् चलात् स्थानचलितादासनात् विलोलोऽपततस्माल्लितञ्च

त्रस्तः समस्तजनहासकरः करेणु-
स्तावत्खरः प्रखरमुल्ललयाञ्चकार ।
यावच्चलासनविलोलनितम्बबिम्ब
विस्रस्तवस्त्रमवरोधवधूः पपात ॥ ७ ॥
शैलोपशल्यनिपतद्रथनेमिधारा
निष्पिष्टनिष्ठुरशिलातलचूर्णगर्भाः ।
भूरेणवो नभसि नद्धपयोदचक्रा-
श्चक्रीवदङ्गरुहधूम्ररुचो विसस्रुः ॥ ८ ॥

बिम्बाद्विस्रस्तं वस्त्रं यस्मिन् कर्मणि तद्यथा तथा अवरोधवधूः पपात । स्वभावोक्तिः ॥ ७ ॥

शैलेति । शैलस्य रैवतकाद्रेरुपशल्यं प्रान्तं । यद्यपि ग्रामान्त उपशल्यं स्यादित्यमरः तथापि उपचाराद्दोषः । तत्र निपततां धावतां रथानां नेमयश्चक्रान्ताः । चक्रं रथाङ्गन्तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमानित्यमरः । तासान्धाराभिः निष्पिष्टानां चूर्णितानां निष्ठुरशिलातलानां चूर्णाः गर्भे येषान्ते तथोक्ताः नभसि नद्धानि पयोदचक्राणि पयोदाकारमण्डलानि यैस्ते चक्रवद्भ्रमणमस्यास्तीति चक्रीवान् गर्दभः । चक्रीवन्तस्तु वालेयरासभा गर्दभाः खरा इत्यमरः । आसन्दीवदष्ठीवच्चक्रीवदित्यादिना साधुः । तस्याङ्गरुहाणि रोमाणि तद्वत् धूम्ररुचः कृष्णलोहितवर्णाः । धूम्रधूमलौ कृष्णलोहितावित्यमरः । भूरेणवो विसस्रुः प्रसृताः ॥ ८ ॥

उद्यत्कृशानुशकलेषु खुराभिघाता-
द्भूमीसमायतशिलाफलकाचितेषु ।
पर्य्यन्तवर्त्मसु विचक्रमिरे महाश्वाः
शैलस्य दर्दुरपुटानिव वादयन्तः ॥ ९ ॥

उद्यदिति । खुराः शफानि । शफं क्लीबे खुरः पुमानित्यमरः । तेषामभिघातादुद्यन्तः कृशानुशकलाः स्फुलिङ्गाः येभ्यस्तेषु टङ्कप्रायाः खुरा इति भावः भूम्यां समानि समतलानि आयतानि च यानि शिलाः फलकानीव शिलाफलकानि तैराचितेष्वास्तृतेषु शैलस्य पर्य्यन्तवर्त्मसु प्रान्तमार्गेषु महाश्वा दर्दुराणां वाद्यविशेषाणां पुटान्मुखानि वादयन्त इव विचक्रमिरे जग्मुः पादन्यासैः तादृशं शब्दमकुर्व्वन्नित्यर्थः । वेः पादविहरणे इत्यात्मनेपदम् । दर्दुरा तोयभेकेषु वाद्यभाण्डाद्रिभेकयोरित्यमरः । उत्प्रेक्षालङ्कारः ॥ ९ ॥

तेज इति । तेजो नाम दर्पापरनामा सत्त्वगुणविकारः प्रकाशको अन्तःसारविशेषः यथाह भोजराजः तेजो निसर्गजं सत्त्वं वाजिनां स्फुरणं रजः । क्रोधस्तम इति ज्ञेयास्त्रयोऽपि सहजा गुणा इति । तच्च द्विविधं सततोत्थितमभयोत्थितञ्चेति । यथाह स एव धारासु योजितानाञ्च निसर्गात्प्रेरणं विना । अविच्छिन्नमिवाभाति तत्तेजः सततोत्थितम् । कशापादादिघातैर्यत् साध्वसात् स्फुरितं तु तदिति । अत्र तेजःशब्देन तत्कार्य्यं वेगो लक्ष्यते तथा च तेजसि वेगे निरोधे तन्निवारणे समतायां वेगसाम्ये चावहितेन वल्गाविभागकुशलेनेत्यर्थः । कशा ताडिनी । अश्वादेस्ताडिनी कशेत्यमरः । अत्र कशाः कशाघातास्तासां त्रयमुत्तममध्यमाधमेषु यथासङ्ख्यं मृदुसमनिष्ठुर

तेजोनिरोधसमतावहितेन यन्त्रा
सम्यक्कशात्रयविचारवता नियुक्तः ।
आरट्टजश्चटुलनिष्ठुरपातमुच्चै
श्चित्रं चकार पदमर्द्धपुलायितेन ॥ १० ॥

द्विचिरूपं चिंतयन्तस्य विचारः एतेषु निमित्तेषु अङ्गेष्वेवन्ताड्य इति विमर्षः तद्वता तज्ज्ञेन । यथाह भोजः । मृदु नैकेन घातेन दण्डकालेषु ताडयेत् । तीक्ष्णं मध्यं पुनर्द्वाभ्याञ्जघन्य निष्ठुरैस्त्रिभिः । उपवेशेऽथ निद्रायां स्खलिते दुष्टचेष्टिते । वडवालोकनोत्सुक्ये बकुगर्ब्बितहेषिते । सन्त्रासे च दुरुत्थाने विमार्गगमने भये । शिक्षात्यागस्य समये सञ्जाते चित्तविभ्रमे । दण्डः प्रयोज्योवाहानां कालेषु द्वादशस्वपि । ग्रीवायामीतमाहन्यात् त्रस्तञ्चैव च वाजिनम् । विभ्रान्तचित्तमधरे त्यक्तशिक्षञ्च ताडयेत् । प्रहेषितं स्कन्धबाह्वोर्वडवालोकिनं तथा । उपवेशे च निद्रायां कटिदेशे च ताडयेत् । दुश्चेष्टितं मुखे हन्यादुन्मार्गप्रस्थितं तथा । जघने स्खलितं हन्यान्नेत्रमार्गे दुरुत्थितं । यः कुण्ठप्रकृतिर्वाजी तं सर्व्वत्रैव ताडयेदिति । एवम्भूतेन यन्त्रा सादिना सम्यग्यथाशास्त्रं नियुक्तः ईरितः उच्चैरुन्नतः आरट्टोऽश्वयोनिर्देशविशेषः तज्जोऽश्व आरट्टजः । विशेषणमात्रप्रयोगे सागराम्बरादिवत्तावतैव विशेष्यप्रतीतेरित्याह वामनः विशेषणप्रयोगे विशेष्यप्रतिपत्ताविति । चटुलश्चपलो निष्ठुरः परुषश्च पातः प्रक्षेपो यस्मिन् कर्म्मणि तद्यथा तथा । अर्द्धपुलायितेन मण्डलगतिविशेषेण चित्रमद्भुतम्पदम्पदक्रमञ्चकार । शताङ्गाङ्ग

नीहारजालमलिनः पुनरुक्तसान्द्राः
कुर्व्वन् वधूजनविलोचनपक्ष्ममालाः ।
क्षुण्णः क्षणं यदुबलैर्दिवमाततांसुः
पांशुर्दिशां मुखमतुत्थयदुत्थितोऽद्रेः ॥११॥

क्रमादूनैर्मण्डलायितवल्गितैः । उन्मुखस्याश्वमुख्यस्य गतिरर्द्धपुलायितमिति लक्षणात् । पुला नाम प्लुताद्यनेकापरनामा हयानाङ्गतिविशेषः । तदुक्तं हयलीलावत्यां प्लुतां सवल्गितामाहुर्या धारा पुलनाभिधा । पुनरेनां रलोपान्तां पुलामित्याह दैशिकः । तल्लक्षणञ्च तत्रैवोक्तम् । क्षिपति समविशेषानुत्क्षिपत्यग्रपादान्प्रसरति पुरतोऽश्वः साथ धारा पुलाख्या । विलसति समपादोत्क्षेपणाकुञ्चनानां करणमिह गतिज्ञाः प्राहुरन्ये पुलाख्यामिति । पार्ष्णिप्रधानस्य विधाय रागादश्वां सधीकृत्य वहेत्पुलाख्यामित्यादि । पुलाख्यया चयितं गतिः पुलायितं । चयगतौ भावे क्तः तच्छ्रताद्‌र्ध्व्या सुकरीत्या अनुष्ठितमर्द्धपुलायितमित्यलमतिविस्तरेण ॥ १० ॥

नीहारेति । नीहारजालवत् तुहिनव्यूहवन्मलिनः वधूजनविलोचनानां पक्ष्ममालाः पुनरुक्तसान्द्राः द्विगुणसान्द्राः कुर्व्वन् स्वभावतोऽपि सान्द्रत्वादिति भावः । मयूरव्यंसकादित्वाद्विसृष्टवत्समासः । क्षणं यदूनां बलैः सैन्यैः क्षुण्णः अद्रेरुत्थितः दिवमाकाशमाततमितुमन्ततमितुमिच्छुः आतितांसुः । तनोतेः सन्नन्तादुप्रत्ययः सनीवन्तर्द्धेत्यत्र तनिपतिदरिद्राणामुपसंख्यानाद्वैकल्पिक इडभावः तनोतेर्विभाषेति दीर्घः । पांशुर्दिशांमुखमतुत्थयदाच्छादयति स्म । तुत्थ आच्छादने इति धातोश्चौरादिकाल्लङ् ॥ ११ ॥

उच्छिद्य विद्विष इव प्रसभं मृगेन्द्रा-
निन्द्रानुजानुचरभूपतयोऽध्यवात्सुः ।
वन्येभमस्तकनिखातनखाग्रमुक्त-
मुक्ताफलप्रकरभाञ्जि गुहागृहाणि ॥ १२ ॥
बिभ्राणया बहलयावकपङ्कपिङ्ग-
पिच्छावचूडमनुमाधवधाम जग्मुः ।
चञ्चुग्रदष्टचटुलाहिपताकयान्ये
स्वावासभागमुरगाशनकेतुयष्ट्या ॥ १३ ॥

उच्छिद्येति । इन्द्रानुजस्योपेन्द्रस्य हरेरनुचरा अनुजीविनो भूपतयो मृगेन्द्रान् सिंहान् विद्विषः शत्रूनिव प्रसभं प्रसह्योच्छिद्य हत्वा वन्येभानां मस्तकेषु निखातैर्निक्षिप्तैर्नखाग्रैः सिंहनखमुखैर्मुक्तान्विकीर्णान्मुक्ताफलप्रकरान् भजन्तीति तथोक्तानि गुहा गृहाणीवेत्युपमितसमासः विद्विष इवेति लिङ्गात् अध्यवात्सुरध्युषितवन्तः । उपान्वध्याङ्वस इति कर्मत्वं वसनिवासे लुङि सिचि वृद्धिः सस्यार्द्धधातुक इति तत्वम् ॥ १२ ॥

बिभ्राणयेति । अन्ये भूपतयः याव एव यावकोऽलक्तकः । राक्षा लाक्षा जतु क्लीबे यावोऽलक्तो द्रुमामय इत्यमरः । यावादिभ्यः कनिति स्वार्थे कन् । बहलेन यावकपङ्केन पिङ्गं पिङ्गलं पिच्छं बर्हमेवावचूडं अधोलम्बिकलापम्बिभ्राणया । अथो चूडावचूडाख्या चूडाधोमुखचूडकाविति ध्वजाङ्गेषु हलायुधः । चञ्चुस्त्रोटिः । चञ्चुस्त्रोटिरुभे स्त्रियामित्यमरः । तस्या अग्रेण दष्टा चटुला चञ्च

छायामपास्य महतीमपि वर्त्तमाना
मागामिनीं जगृहिरे जनतास्तरूणाम्।
सर्व्वो हि नोपगतमप्यपचीयमानं
वर्द्धिष्णुमाश्रयमनागतमभ्युपैति ॥ १४ ॥

रेव पताका यस्मात्तथा उरगाशनो गरुडस्तस्य केतुयष्टिस्तदधिष्ठितो ध्वजदण्ड इत्यर्थः तथा अभिज्ञानेनेति भावः अनुमाधवधाम हरिशिविरमनु स्वावासभागं स्वनिवेशदेशञ्जग्मुः प्रापुः दूरादेव गरुडध्वजेन माधवधाम ज्ञात्वा तत्सन्निहितान्नियतदिक्कान् स्वावासान्निश्चित्य जग्मुरित्यर्थः ॥ १३ ॥

छायामिति। जनानां समूहाः जनताः। ग्रामजनबन्धुसहायेभ्यस्तल्। तरूणां वर्त्तमानां विद्यमानां महतीमपि छायामपास्य त्यक्त्वा आगामिनीं छायां जगृहिरे वर्द्धिष्णुत्वादिति भावः। न च प्राप्तत्यागो दोषाय त्यागस्वीकारयोः क्षयवृद्धिप्रयुक्तत्वादिति भावः। सर्व्व इति। तथा हि सर्व्वो जनः उपगतं प्राप्तमप्यपचीयमानं क्षीयमाणं। कर्म्मकर्त्तरि प्रयोगः। आश्रयन्नोपैति न गृह्णाति किं त्वनागतमप्राप्तमपि वर्द्धिष्णुं वर्द्धनशीलं आश्रयमुपैति। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ १४ ॥

अग्र इति। अग्रे गतेन पुरः प्रयातेन रम्यां वसतिं निवासं। वहिवस्यर्त्तिभ्यश्चेति वसेरौणादिकोऽतिप्रत्ययः। परिगृह्यापतन्तीत्यापात्याः स्वयमाक्रमितुमागच्छन्तः। भव्यगेयेत्यादिना कर्त्तरि यदन्तो निपातः। तेषां सैनिकानां निराकरणे निरसने आकुलेन व्यग्रेण उद्वाहुना उद्यतहस्तेन केनचिदिति शेषः अन्यतोयान्तोगच्छन्तः

अग्रे गतेन वसतिं परिगृह्य रम्या
मापात्यसैनिकनिराकरणाकुलेन ।
यान्तोऽन्यतः प्लुतकृतस्वरमाशु दूरा
दुद्बाहुना जुहुविरे मुहुरात्मवर्ग्याः ॥१५॥
सिक्ता इवामृतरसेन मुहुर्जनानां
क्लान्तिच्छिदो वनवनस्पतयस्तदानीम् ।
शाखावसक्तवसनाभरणाभिरामाः
कल्पद्रुमैः सह विचित्रफलैर्विरेजुः ॥ १६ ॥

आत्मवर्ग्याः स्वयूथ्याः प्लुतन्निमान्त्रिकं यथा तथा कृतःस्वरोनाद आह्वानं यस्मिन् कर्म्मणि तद्यथा तथा । दूराद्धूते चेति दूरादाह्वाने प्लुतविधानादिति भावः । आशु दूरान्मुहुराजुहुविरे आहूताः । ह्वयतेराङ् पूर्व्वात्कर्म्मणि लिट् अभ्यस्तस्य चेति सम्प्रसारणे द्विर्वचनमुवङादेशश्च ॥ १५ ॥

सिक्ता इति । अमृतरसेन सिक्ता इवेत्युत्प्रेक्षा जनानां क्लान्तिच्छिदः श्रमहराः कल्पद्रुमवदमृतसेकाभावादपि तद्वदा ह्लादका इति भावः शाखास्ववसक्तैर्लग्नैर्वसनैराभरणैश्चाभिरामा एकत्र सेनास्थापितैरन्यत्र स्वप्रसूतैरिति भावः वनवनस्पतयो वनवृक्षाः विचित्रफलैर्वस्त्राभरणाद्यनेकफलयुक्तैः कल्पद्रुमैस्तत्रत्यै रिति शेषः सह तदानीं विरेजुः तद्वद्विरेजुरित्यर्थः । सहेति साद्दश्ये । सह साकल्यसादृश्ययौगपद्यसमृद्धिष्विति विश्वः । तथा चोपमालङ्कारः ॥ १६ ॥

यानाज्जनः परिजनैरवतार्य्यमाणा
राज्ञीर्नरापनयनाकुलसौविदल्लाः ।
स्रस्तावगुण्ठनपटाः क्षणलक्ष्यमाण
वक्त्रश्रियः सभयकौतुकमीक्षते स्म ॥ १७ ॥

कण्ठावसक्तमृदुबाहुलतास्तुरङ्गा
द्राजावरोधनवधूरवतारयन्तः ।
आलिङ्गनान्यधिकृताः स्फुटमापुरेव
गण्डस्थलीः शुचितया न चुचुम्बुरासाम् ॥ १८ ॥

यानादिति । परिजनैर्यानाद्वाहनादवतार्य्यमाणा अवरोप्यमाणाः । रुहेर्ण्यन्तात्कर्मणि लटः शानजादेशः रुहः पोऽन्यतरस्यामिति पकारः। नराणामालोकिजनानामपनयनेऽपसारणे आकुलाः सौविदल्लाः कञ्चुकिनो यासान्ताः । सौविदल्लाः कञ्चुकिन इत्यमरः । स्रस्ता अवरोपणसंक्षोभादपहृता अवगुण्ठनपटा यासान्ताः अतएव क्षणं लक्ष्यमाणाः वक्त्रश्रियो यासान्ताः तथोक्ताः राज्ञीः राजस्त्रीः । पुंयोगादाख्यायामिति ङीप् । सभयकौतुकमीक्षते स्म । ताडनाद्भयं कामात्कौतुकम् ॥ १७ ॥

कण्ठेति । तुरङ्गाद्राजावरोधनवधूः राज्ञामवरोधस्त्री रवतारयन्तोऽवरोपयन्तोऽधिकृताः अन्तःपुराधिकारिणः कण्ठेषु स्वकीयेष्ववसक्ता मृदवो बाहुलतास्तदीया येषान्ते तथोक्ताः सन्तः स्फुटं व्यक्तमालिङ्गनान्यापुरेव अन्यथा दुरवरोहत्वाद्राजाज्ञा चेति भावः। आसाम्बधूनाङ्गण्डस्थलीः शुचितया स्वयं शुद्धवर्त्तित्वादिच्छानां

दृष्ट्वेव निर्जितकलापभरामधस्ता
द्व्याकीर्णमाल्यकबरां कबरीं तरुण्याः ।
प्रादुद्रवत् सपदि चन्द्रकवान् द्रुमाग्रात्
संहर्षिणा सह गुणाभ्यधिकैर्दुरासम् ॥ १९ ॥

नैर्मल्याच्च न पुपुषुः यावत्कर्त्तव्यकारिणः शुद्धात्मानो नातिवर्ध न्तीति भावः अन्यत्र तु पापाचाराः पापलिङ्गानि प्रकाशयन्तीति भावः ॥ १८ ॥

दृष्ट्वेवेति । अधस्तात्तरुतले निर्जितः कलापभारो बर्हभारो यया ताम् । कलापो भूषणे बर्हे इत्यमरः । व्याकीर्णेन विचित्रेण माल्येन कबरां शबलाम् । कबरः कर्बुरः शारः इति हलायुधः । तरुण्याः कबरीं केशपाशम् । कबरी केशपाशोऽथेत्यमरः । जानपदेत्यादिना ङीप् । दृष्ट्वेवेत्युत्प्रेक्षा । सपदि चन्द्रका अस्य सन्तीति चन्द्रकवा न्मयूरः द्रुमाग्रात्प्रादुद्रवत् प्रद्रुतवान् । द्रुगतौ लुङि णिश्रीत्या दिना च्लेश्चङादेशः अचि श्नुधात्वित्यादिना उवङादेशः । तथा हि संहर्षिणा मत्सरिणा कर्त्रा गुणाभ्यधिकैर्गुणोत्कृष्टैः सह दुरासमासितु मशक्यमित्यर्थः । आसेरकर्मकादीषद्दुरित्यादिना खल्प्रत्ययः तयोरेव कृत्यक्तखलर्था इति नियमात् । अत्र भयहेतुकस्य पलायनस्य कबरीदर्शनहेतुकत्वमुत्प्रेक्ष्य तत्समर्थनासमर्थोऽयं अर्थान्तरन्यासः कृतइत्यस्यानयाङ्गेन सङ्करः । न हि जितैर्जेतुरग्रे स्थातुमुचित मिति भावः ॥ १९ ॥

रोचिष्णुरिति । रोचिष्णवो रोचनशीलाः । अलङ्कृञित्या दिना इष्णुच् प्रत्ययः । तेषां काञ्चनचयानां कनकमयानामंशुभिः

रोचिष्णुकाञ्चनचयांशुपिशङ्गिताशा
वंशध्वजैर्जलदसंहतिमुल्लिखन्त्यः ।
भूभर्तुरायतनिरन्तरसन्निविष्टाः
पादा इवाभिबभुरावलयो रथानाम् ॥ २० ॥
छायाविधायिभिरनुज्झितभूतिशोभै
रुच्छ्रायिभिर्बहलपाटलधातुरागैः ।
दूष्यैरिव क्षितिभृतां द्विरदैरुदार
तारावलीविरचनैर्व्यरुचन्निवासाः ॥ २१ ॥

पिशङ्गिताः पिशङ्गीकृताः आशा याभिस्ताः वंशानामन्वयानां राजकुलानां ध्वजैः प्रतिनियतकुलानामङ्कुशादिचिह्नितकेतुभिः अन्यत्र वंशा वेणवस्तैरेव ध्वजैर्जलदसंहतिं मेघसङ्घातमुल्लिखन्त्यः आयतन्दीर्घं निरन्तरन्नीरन्ध्रञ्च सन्निविष्टाः संस्थिताः रथानामावलयः भूभर्तू रैवतकाद्रेः पादाः प्रत्यन्तपर्वता इवाभिबभुः भान्ति स्म । आशापिशङ्गीकरणादिक्रियानिमित्ता जातिस्वरूपोत्प्रेक्षा ॥ २० ॥

छायेति । क्षितिभृतां राज्ञां निवसन्त्यत्रेति निवासाः निवासदेशाश्छायाविधायिभिः कान्तिकरैरनातपसम्पादकैश्च । छाया त्वनातपे कान्ताविति विश्वः । अनुज्झिताभूतीनाम्भस्मरचनानां सम्पदां च शोभा यैस्तैः । भूतिर्भस्मनि सम्पदीत्यमरः । उच्छ्रायिभिरुन्नमद्भिर्बहलः सान्द्रः पाटलश्चारक्तधातुरागो गैरिकादिरञ्जनं येषान्तैः उदारा तारावलीनां शुद्धमुक्तावलीनां विरचना येषु तैः मुक्ताहारभूषितैरित्यर्थः । तारा मुक्तादिसंशुद्धौ

उत्क्षिप्तकाण्डपटकान्तरलीयमान
मन्दानिलप्रशमितश्रमघर्म्मतोयैः ।
दूर्व्वाप्रतानसहजास्तरणेषु भेजे
निद्रासुखं वसनसद्मसु राजदारैः ॥ २२ ॥

तरले शुद्धमौक्तिके इति विश्वः । दूष्यपचे तारावलीरज्जुसन्ततिरिति केचित् द्विरदैर्दूष्यैः पटमण्डपैरिव । दूष्यं वस्त्रे च तद्गृहइति विश्वः । अरुचन् रोचन्ते स्म । रुच दीप्तौ द्युद्भ्योलुङीति परस्मैपदं पूषादीत्यादिना च्लेरङादेशः । अत्र द्विरदाना न्दूष्याणाञ्च प्रकृतत्वान्नोपमा नापि श्लेषभेदः विशेष्यस्य विशेषणानां च केषाञ्चिदश्लिष्टत्वात् तस्मात्केवलप्रकृतास्पदा तुल्ययोगितेयं इवशब्दस्तु साहृश्यमात्रानुवादकइति सङ्क्षेपः ॥ २१ ॥

उत्क्षिप्तेति । उत्क्षिप्तउद्धृतोयः काण्डपटएव काण्डपटकः दूष्याधोलम्बिवायुसञ्चारार्थः पटः । अपटः काण्डपटी स्यादिति वैजयन्ती । तस्यान्तरेऽवकाशे लीयमानेन मन्दानिलेन प्रशमितं श्रमेणाध्वखेदेन यत् घर्म्मतोयं स्वेदाम्बु तद्येषान्तैराजदारैः राजावरोधैः दूर्व्वाणां प्रतानं प्रचयएव सहजमकृत्रिममास्तरणं तल्पं येषु तेषु वसनसद्मसु पटमण्डपेषु निद्रासुखम्भेजे ॥ २२ ॥

प्रस्वेदइति । अङ्गे गात्रे प्रस्वेदवारिणा सविशेषं सातिशयं यथा तथा विषक्तं अतिश्लिष्टं कूर्प्पासकञ्चोलकं कञ्चुकमित्यर्थः । चोलः कूर्प्पासकोऽस्त्रियामित्यमरः । चतानि पुनर्विदीर्णानि नखचतानि यस्मिन् कर्म्मणि तद्यथा तथा उत्क्षिपन्ती उन्मोचयन्ती अतएवाविर्भवत्प्रकाशमानं घनपयोधरबाहुमूलञ्चनौ पयोधरौ

प्रस्वेदवारिसविशेषविषक्तमङ्गे
कूर्पासकं क्षतनखक्षतमुत्क्षिपन्ती ।
आविर्भवद्घनपयोधरबाहुमूला
शातोदरी युवदृशां क्षणमुत्सवोऽभूत् ॥ २३ ॥

यावत्स एव समयः सममेव ताव
दव्याकुलाः पटमयान्यभितो वितत्य ।
पर्य्यापतत्क्रयिकलोकमगण्यपण्य
पूर्णापणा विपणिनो विपणीर्विभेजुः ॥ २४ ॥

बाहुमूले च यस्याः सा शातोदरी । नासिकोदरेत्यादिना ङीप् । युवदृशां क्षणमुत्सवोऽभूत् । एतेन यूनां त्वराचित्तादिकरमिष्ट वस्त्ववलोकननिमित्तकालाक्षमत्वलक्षणमौत्सुक्यं व्यज्यते । नायिकाभिसारिणी प्रगल्भा वा ॥ २३ ॥

यावदिति । विपणो व्यवहारः स एषामस्तीति विपणिनो वणिजो यावत्स एव समयः सेनानिवेशलक्षण एव तावत्क्षण एव समं युगपत् अव्याकुलाः अव्यग्राः सन्तः पटमयानि पट विकाराणि पटमण्डपानीत्यर्थः अभितो वितत्य उभयतः श्रेण्या वितत्य विस्तार्य्य क्रयेण जीवतीति क्रयिकः । वस्तुक्रयविक्रयादिति ठक् । पर्य्यापतन् परितो धावन् क्रयिकलोकः क्रेतृजनो यस्मिन् कर्म्मणि तत् अगण्यैरसंख्येयैः पण्यैः पण्यद्रव्यैः पूर्णा आपणाः पण्य प्रसारणस्थानानि यासु ताः विपणीः पण्यवीथीः । आपणस्तु निषद्यायां विपणिः पण्यवीथिकेत्यमरः । विभेजुरसंकीर्णं निर्म्ममु रित्यर्थः । स्वभावोक्तिरनुप्रासो ॥ २४ ॥

अल्पप्रयोजनकृतोरुतरप्रयासै
रुद्गूर्णलोष्टलगुडैः परितोऽनुविद्धम् ।
उद्यन्तमुद्द्रुतमनोकहजालमध्या
दन्यः शशं गुणमनल्पमवन्नवाप ॥ २५ ॥

अल्पेति । अल्पप्रयोजनेनाल्पफलेन निमित्तेन कृतउरुतरो भूयान्प्रयासो यैस्तैः अल्पस्यैकस्य शशपिण्डस्य भूयसामकिञ्चित्करत्वादिति भावः उद्गूर्णाः उद्यताः लोष्टानि मृत्खण्डाः लगुडाश्च दण्डकाष्ठानि यैस्तैः पुम्भिरिति शेषः परितोऽनुविद्धमनुरुद्धं अनमः शकटस्याकङ्गतिं घ्नन्तीत्यनोकहाः वृक्षाः तेषाञ्जालमध्या दुद्यन्तमुत्थितं । उत्पूर्व्वादेतेः कर्त्तरि क्तः । उद्द्रुतम्पलायितं शशं मृगविशेषं अन्यः परः अवन् हन्तुमनिवार्य्य रक्षन् अनल्पं गुणं महान्तमुत्कर्षमवाप । दयालोरनामिषलोलुपस्य सुकीर्त्तिः सुलभेति भावः अर्थान्तरन्यासः अन्योगुणं पाशमवन् प्रयुञ्जानः शशमवाप अथवा योहन्ता तस्यैव मृगइति व्याधसमयादिति भावः ॥ २५ ॥

चापेति । चापाकुलाजनदर्शनाद्भयविक्लवोऽतएव निकेता निवेशान् परितः सर्व्वतः । अभितः परितइत्यादिना द्वितीया । परिपतन्धावन् मृगोहरिणः कैश्चिदपि धन्विभिर्धनुष्मद्भिः । धन्वी धनुष्मान्धानुष्कइत्यमरः । व्रीह्यादित्वादिनिरिति स्वामी । पुम्भि र्नान्वबन्धि नानुयातः । बध्नातेः कर्म्मणि लुङ् । तथाप्यङ्गनानामाकर्ण पूर्णाविस्तीर्णाआयताश्च ये नयनान्तैरेवशरैर्हता ईक्षणशौर्यस्य वः अतः कश्चिदपि न तस्मै । किन्तु वीरविशिखापाताभावेऽप्यङ्गना

त्रासाकुलः परिपतन्परितो निकेता
न्पुम्भिर्न कैश्चिदपि धन्विभिरन्वबन्धि ।
तस्थौ तथापि न मृगः क्वचिदङ्गनाना
माकर्णपूर्णनयनेषुहतेक्षणश्रीः ॥ २६ ॥
आस्तीर्णतल्परचितावसथः क्षणेन
वेश्याजनः कृतनवप्रतिकर्म्मकाम्यः ।
खिन्नानखिन्नमतिरापततो मनुष्या
न्प्रत्यग्रहीच्चिरनिविष्टइवोपचारैः ॥ २७ ॥

पाङ्गविशिखपातात्पलायित एवेति भावः । अत्र जनालोकनोत्थभयहेतुकस्य मृगानवस्थानस्याङ्गनापाङ्ग[illegible]त्प्रेक्षणादुक्तोत्प्रेक्षा सा च व्यञ्जकाप्रयोगात् प्रतीयमाना । किंच हृतेक्षणश्रीरिति विशेषणगत्योक्तत्वात्काव्यलिङ्गमिति सङ्करः ॥ २६ ॥

आस्तीर्णेति । क्षणेनास्तीर्णतल्पं वेश्यावृत्तेः शय्याप्रधानत्वात् प्रागेव सज्जितशय्यं यथा तथा रचितावसथः कल्पितनिकेतः। स्यादावसथवास्तु चेति कोषः । कृतेन नवप्रतिकर्म्मणा नूतनेन प्रसाधनेन काम्यः स्पृहणीयः अखिन्नमतिरश्रान्तचित्तः अगणिताध्वखेद इत्यर्थः । वेश्याजनः खिन्नानध्वश्रान्तानापतत आगच्छतो मनुष्यान् पुरुषान् चिरनिविष्ट इव तत्रैव नित्यवास्तव्य इवेत्युत्प्रेक्षा उपचारैः शीताम्बुताम्बूलदानादिसत्कारैः प्रत्यग्रहीत् वशीचकारेत्यर्थः॥२७॥

ससुरिति । सेनायां समेताः सैन्याः सैनिकजनाः । सेनाया वेति ण्यप्रत्ययः । नगनिम्नगानां याः श्रियः सम्पदः तासामनुप

सस्नुः पयः पपुरनेनिजुरम्बराणि
जक्षुर्बिसं धृतविकासिबिसप्रसूनाः ।
सैन्याः श्रियामनुपभोगनिरर्थकत्व
दोषप्रवादममृजन्नगनिम्नगानाम् ॥ २८ ॥

भोगः उपभोगाभावः । क्वचित्प्रसज्यप्रतिषेधेऽपि नञ्समास दृश्यते । यथाऽदर्शनमश्रवणमनुच्चारणं अनुपलब्धिरभावइत्यादि । तेन यन्निरर्थकत्वं निष्फलत्वं तदेव दोषः तेन यः प्रवादो निन्दा तममृजन् अमार्ज्जन् । मृजूष् शुद्धौ अदादित्वाल्लङि शपो लुक् मृजेरजादौ क्ङिति विभाषा वृद्धिर्वक्तव्येति विकल्पाद्वृद्ध्यभावः । मार्ज्जनप्रकारमाह । सस्नुः स्नानमकुः पयः पानीयं पपुः । ष्णा शौचे पा पाने लिट् । अम्बराण्यनेनिजुः अक्षालयन् । णिजिर शौचे जुहोत्यादित्वाल्लङि श्लाविति द्विर्भावः सिजभ्यस्तविदिभ्यश्चेति झेर्जुसादेशः [illegible] गुणः । धृतानि विकासिबिसप्रसूनानि [illegible] येते । बिसप्रसूनराजीव पुष्कराम्भोरुहाणि चेत्यमरः । बिसमृणालञ्जक्षुः भक्षयाञ्चक्रुः । घसेर्लिटि गमहनेत्यादिना उपधालोपे शुत्वं शासिवसिघसीनां चेति षत्वं । स्नानाद्युपभोगेनोक्तनैरर्थ्यं निराचक्रुरित्यर्थः । अत्र दोषमार्जनस्य स्नानादिनाकृतत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । स्नानादिक्रियासमुच्चयलक्षणश्चेति सङ्करः ॥ २८ ॥

नाभीति । स्त्रीणां नाभिभिरेव ह्रदैः परिगृहीततरयाणि प्रतिषिद्धवेगानि वृहद्भिर्जघनैरेव सेतुभिर्निवारितानि प्रतिहत गतिकानीत्यर्थः । पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं

नाभिह्रदैः परिगृहीतरयाणि यत्र
स्त्रीणां बृहज्जघनसेतुनिवारितानि ।
जग्मुर्जलानि जलमण्डुकवाद्यवल्गु
वल्गद्घनस्तनतटस्खलितानि मन्दम् ॥ २९ ॥
आलोलपुष्करमुखोल्लसितैरभीक्ष्ण
मुक्षाम्बभूवुरभितोवपुरम्बुवर्षैः ।
खेदायतश्वसितवेगनिरस्तमुग्ध
मूर्द्धन्यरत्ननिकरैरिव हास्तिकानि ॥ ३० ॥

पुरइत्यमरः । जलमेव मण्डुकवाद्यं वाद्यविशेषः जलमेकेन पाणिनोत्थापितमपरेण ताडितमण्डुकवत् ध्वनतीति प्रसिद्धत्वेन वल्गु सुन्दरं वल्गद्भिश्चलैः घनैः स्तनतटैः स्खलितानि स्खलनकृतानि गमितानि वा जलानि पूर्वोक्तनगनिम्नगासलिलानि मन्दञ्जग्मुः । अत्र जलमन्दगमनस्य विशेषणगत्या रयप्रतिबन्धादिपदार्थहेतुकत्वात्काव्यलिङ्गम् ॥ २९ ॥

आलोलेति । हस्तिनां समूहा हास्तिकानि । अचित्तहस्तिधेनोष्ठक् । आलोलानि यानि पुष्कराणि हस्ताग्राणि । पुष्करङ्करिहस्ताग्रइत्यमरः । तेषां मुखैरग्रैरुल्लसितानि उत्क्षिप्तानि तैरम्बुवर्षैः खेदेनाध्वश्रमेणायतेन द्राघीयसा श्वसितस्योच्छ्वासमारुतस्य वेगेन निरस्ताः बहिरुत्क्षिप्ताः ये मुग्धाः सुन्दराः मूर्धन्याः मूर्द्धनि भवाः । शरीरावयवाच्चेति यत्प्रत्ययः ये चाभावकर्मणोरिति प्रकृतिभावाद्वस्त्विति टिलोपाभावः । रत्ननिकरामुक्ताफलप्रकरास्तैरिवेत्युत्प्रेक्षा वपुरभीक्ष्णमुक्षाम्बभूवुः सिषिचुः । उक्ष सेचने

ये पक्षिणः प्रथममम्बुनिधिं गतास्ते
येऽपीन्द्रपाणितुलितायुधलूनपक्षाः ।
ते जग्मुरद्रिपतयः सरसीर्विगाढु-
माक्षिप्तकेतुकुथसैन्यगजच्छलेन ॥ २१ ॥

इत्यादेश गुरुमतोऽन्तश्छ इत्याप्रत्ययः । गजेन्द्रजीमूतवराह शङ्खमत्स्याहिशुक्त्युद्भववेणुजानि । मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरीति गजानां मुक्ताकरत्वे प्रमाणम् ॥ २० ॥

यद्विति । ये पक्षिणः पक्षवन्त इन्द्रेणाच्छिन्नपक्षा इत्यर्थः । संसर्गे इनिप्रत्ययः । तेऽद्रिपतयो मैनाकादयः प्रथममम्बुनिधिं गताः प्रविष्टाः येऽपि ये ये इत्यर्थः इन्द्रस्य पाणिना तुलितेन प्रेरितेनायुधेन वज्रेण लूनपक्षाः छिन्नगरुतस्तेऽद्रिपतयः आक्षिप्ता अपनीताः केतवो ध्वजाः कुथाः पृष्ठास्तरणानि च येषां । प्रवेण्या स्तरणं वर्णः परिस्तोमः कुथो द्वयोरित्यमरः । तेषां सैन्यगजानां छलेन सरसीर्विगाढुं विगाहितुं । स्वरतिसूतीति विकल्पादिडा गमः । जग्मुः अत्र गजच्छलेनेति छलशब्देन गजत्वमपह्नुत्या द्रित्वारोपणाच्छलादिशब्दैरसत्यत्वप्रतिपादनरूपोऽपह्नवालङ्कारः । तेन पक्षवतामद्रीणां सगरावगाहनदर्शनान्मत्सरात् स्वयमपि सलिलमवगाहमानाः साक्षाल्लूनपक्षाः पर्वता इवेत्युत्प्रेक्षा व्यज्यते ॥ २१ ॥

आत्मानमिति । महेभो जलधेर्जलाशयस्य मध्ये प्रति बिम्बितमङ्गं यस्य तमभिमुखापतितमभिमुखमागतमात्मानमेव

आत्मानमेव जलधेः प्रतिबिम्बिताङ्ग-
मूर्म्मौ महत्यभिमुखापतितं गजेन।
क्रोधादधावदपभीरभिहन्तुमन्य-
नागाभियुक्त इव युक्तमहो महेभः॥ ३२॥
नादातुमन्यकरिमुक्तमदाम्बुतिक्तं
धूताङ्कुशेन न विहातुमपीच्छताम्भः।
रुद्धे गजेन सरितः सरुषावतारे
रिक्तोदपात्रकरमास्त चिरं जनौघः॥ ३३॥

आत्मप्रतिबिम्बमेवेत्यर्थः निरीक्ष्यान्यनागेन प्रतिगजेनाभियुक्तोऽभिद्रुत इवातिदूर्षमपभीर्निर्भीकः सन् क्रोधादधावत् अहो इति मौढ्येन विस्मय तच्च युक्तं महेभस्येति भावः। अभियुक्त इवेत्युत्प्रेक्षायाः प्रतिगजभ्रान्तिनिबन्धनत्वात् भ्रान्तिमदुत्प्रेक्षयोरङ्गाङ्गिभावेन सङ्करः॥ ३२॥

नेति। अन्यकरिणा प्रतिगजेन मुक्तेन मदाम्बुना तिक्तं सुरभि। कटुतिक्तकषायास्तु सौरभ्येऽपि प्रकीर्त्तिता इति केशवः। अम्भ आदातुं ग्रहीतुं नेच्छता विहातुं त्यक्तुमपि नेच्छता अनिच्छता क्रोधपिपासाभ्यमिति भावः। धूताङ्कुशेन सरुषा सक्रोधेन गजेन सरितोऽवतारे तीर्थे रुद्धे सति जनौघः रिक्तान्युदपात्राणि येषु ते करा यस्मिन् तद्यथा तथा चिरमास्त अतिष्ठत्। आस उपवेशने लङ्। एकहलादौ पूरयितव्येऽन्यतरस्यामित्युदकशब्दस्योदादेशः॥ ३३॥

पन्थानमाशु विजहीहि पुरः स्तनौ ते
पश्यन् प्रतिद्विरदकुम्भविशङ्कि चेताः ।
स्तम्बेरमः परिणिनंसुरसावुपैति
षिड्गैरगद्यत ससम्भ्रममेव काचित् ॥ ३४ ॥
कीर्णं शनैरनुकपोलमनेकपानां
हस्तैर्विगाढमदतापरुजः शमाय ।
आकर्णमुल्लसितमम्बु विकासिकाश
नीकाशमाप समतां सितचामरस्य ॥ ३५ ॥

पन्थानमिति । पन्थानमाशु विजहीहि । ओहाक् त्यागे लोटि सेर्ह्यारादेशः आ च हाविति विकल्पादीकारादेशः । पुरोऽग्रे ते स्तनौ पश्यन् प्रतिद्विरदस्य कुम्भौ विशङ्कत इति तद्विशङ्कि चेतो यस्य सः कुम्भभ्रान्तिमानित्यर्थः । अतएव भ्रान्तिमदलङ्कारः । स्तम्बे तृणे रमत इति स्तम्बेरमः । इभः स्तम्बेरमः पद्मीत्यमरः । स्तम्बकर्णयो रमिजपोरित्यच् प्रत्ययः । तत्पुरुषे कृति बहुलमित्यलुक् । परिणन्तुं तिर्यक् प्रहर्तुमिच्छुः परिणिनंसुः । नमेः सन्नन्तादु प्रत्ययः एकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः । असावुपैति पुरेति पाठे पुरोपैतीत्यन्वयः उपैष्यतीत्यर्थः । यावत्पुरा निपातयोर्लडिति भविष्यदर्थे लट् । षिड्गैर्विटैः । षिड्गः पल्लविको विट इति कोषः । काचिदेवमुक्तरीत्या सम्भ्रमं सत्वरं अगद्यत गदिता ॥ ३४ ॥

कीर्णमिति । अनेकपानां द्विपानां विगाढः प्रगाढो यो मदस्तापः स एव रुक् रोगः तस्याः रुजः शमाय शनैर्मन्दं हस्तैरनुकपोलं

गण्डूषमुज्झितवता पयसः सरोषं
नागेन लब्धपरवारणमारुतेन ।
अम्भोधिरोधसि पृथुप्रतिमानभाग
रुद्धोरुदन्तमुसलप्रसरं निपेते ॥ २६ ॥

कपोलयोः कीर्णं क्षिप्तं आकर्णं कर्णपर्यन्तं । आङ्मर्यादाभिविध्यो रित्यव्ययीभावः । उच्छ्रितमुत्पतितं विकाशि यत्काशकाशकुसुम स्तेन सदृशकाशनीकाशं । नित्यसमासत्वादस्वपदविग्रहः । अत एव सुपुत्तरपदे त्वमी । निभसङ्काशनीकाशप्रतीकाशोपमादय इत्यमरः । अम्बु सितचामरस्य समतां सादृश्यमाप । तुल्यार्थैरित्यादिना षष्ठी । उपमालङ्कारः ॥ २५ ॥

गण्डूषमिति । लब्धः परवारणस्य प्रतिगजस्य मारुतोमदगन्धवाहो येन तेन अतएव सरोषं यथा तथा पयसः पानीयस्य गण्डूषमुखपूरणं मुखान्तर्गतमप इत्यर्थः । गण्डूषोमुखपूरण इति हलायुधः । द्विलिङ्गत्वेऽपि पुंलिङ्गमेवाह वामनो लिङ्गाध्याहारादित्यत्र । उज्झितवता त्यक्तवता नागेन गजेन । मतङ्गजोगजोनाग इत्यमरः । अम्भोधिरोधसि सागरतीरे । दन्तयोरुभयोर्मध्यम्प्रतिमानमिति स्मृतम् । पृथुना प्रतिमानभागेन रुद्धः प्रतिबद्धः उरू दन्तौ मुसलाविव तयोः प्रसरः प्रसारोयस्मिन् कर्मणि तत् । अयोग्रोमुसलोऽस्त्रीस्यादित्यमरः । निपेते निपतितम् । भावे लिट् । क्रोधवेगादलब्धरोधाः प्रहृत्य पारवश्यात् स्वयमधोमुखः पपातेत्यर्थः । क्रोधान्धाः किन्न कुर्वन्तीति भावः ॥ २६ ॥

दानं ददत्यपि जलैः सहसाधिरूढे
को विद्यमानगतिरासितुमुत्सहेत ।
यद्दन्तिनः कटकटाहतटान्मिमङ्क्षो-
र्मङ्क्षूदपाति परितः पटलैरलीनां ॥ २७ ॥

दानमिति । दीयतइति दानं धर्मं मदश्च । दानं गजमदे त्याग इति विश्वः । तद्ददति वितरत्यपि दातर्य्यपीत्यर्थः । सहसा अकस्मात् । स्वरादित्वादव्ययमिति शाकटायनः । जलैर्जडैर्नीरैश्च । जलं गोकलले नीरे ह्रीवेरे च जडेऽन्यवदिति विश्वः । अधिरूढे आक्रान्ते सति विद्यमानगतिः गत्यन्तरवान्समर्थश्च कः पुमानासितुं स्थातुमुत्सहेत न कोऽपीत्यर्थः । शकधृषेत्यादिना तुमुन् । यस्मान्मिमङ्क्षोर्मङ्क्तुमिच्छोः । मज्जेः सन्नन्तादुप्रत्ययः । दन्तिनः कटो गण्डः स कटाहः खर्प्पर इव । कटाहः खर्प्परस्तुपइति वैजयन्ती । तस्य तटात्प्रदेशादलीनां पटलैः परितो मङ्क्षु द्राक् । द्राक् मङ्क्षु सपदि द्रुतमित्यमरः । उदपाति उत्पतितम् । भावे लुङ् चिण् भावकर्म्मणोरिति चिण् । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ २७ ॥

अन्तरिति । जलौघे अन्तर्जलौघं । विभक्त्यर्थेऽव्ययीभावः । अथ वा जलौघस्य जलपूरस्य अन्तरभ्यन्तरे अवगाढवतः प्रविष्टवतः । गाहेर्निष्ठाक्तवतुप्रत्ययः ढत्वष्टुत्वढलोपाः । गजस्य कपोलौ छित्वा चणमन्तरीचे उपर्य्याकाशे विततपक्षतिर्विस्तृतपक्षमूलः आमूलात विततपक्षइत्यर्थः । स्त्री पक्षतिः पक्षमूलमित्यमरः । पक्षात्तिरिति तिप्रत्ययः । अलिगणो गुणेषु रूपादिषु द्रव्यमाश्रयो येषान्तेषु

अन्तर्जलौघमवगाढवतः कपोलौ
हित्वा क्षणं विततपक्षतिरन्तरीक्षे ।
द्रव्याश्रयेष्वपि गुणेषु रराज नीलो
वर्णः पृथगातद्वालिगणो गजस्य ॥ ३८ ॥

संसर्पिभिः पयसि गैरिकरेणुरागै
रम्भोजगर्भरजसाङ्गनिषङ्गिणा च ।
क्रीडोपभोगमनुभूय सरिन्महेभा
वन्योन्यवस्त्रपरिवर्त्तमिव व्यधत्ताम् ॥ ३९ ॥

द्रव्याश्रयेषु अपि अयुतसिद्धत्वात् द्रव्यसमवेतत्वाच्च द्रव्याधीनसत्ताकेषु सत्स्वपीत्यर्थः । पृथग्गतः जलमज्जनभयात् स्वाश्रयपरिहारेण स्थितोऽलिनीलोवर्णो नीलरूपङ्गजस्य नीलिमेव रराज । गुणे शुक्लादयः पुंसीत्यमरः । अत्रालिगणे सादृश्याद्गजनीलत्वाश्रयादन्यत उपलब्धिनिर्वाहाय पृथक् स्थितिविशिष्टत्वमुत्प्रेक्ष्यते ॥ ३८ ॥

संसर्पिभिरिति । सरिच्च महेभश्च सरिन्महेभौ पयसि संसर्पिभिः गजात्सरिज्जले विसृत्वरैः गैरिकरेणव एव रागास्तैः । करणे घञ् । अङ्गनिषङ्गिणा गजाङ्गसङ्गिना अम्भोजगर्भरजसा पद्मान्तःपरागेण च निमित्तेन क्रीडया लीलया उपभोगं संभोगमनुभूयान्योन्यमिथोवस्त्रयोः परिवर्त्तं विनिमयं व्यधत्तामकुरुतामिव । दधातेर्लङि परस्मैपदे तसस्तामादेशः । अत्र सरिन्महेभयोः प्रतीयमाननायिकादेरभेदाध्यवसायेन वस्त्रविनिमयोत्प्रेक्षा ॥ ३९ ॥

याश्चन्द्रकैर्मदजलस्य महानदीनां
नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः ।
तास्त्वपुरविलम्बितमुत्तरन्तो
धौताङ्गलग्ननवनीलपयोजपत्रैः ॥ ४० ॥

प्रत्यन्यदन्ति निशितांकुशदूरभिन्न
निर्य्याणनिर्यदसृजं चलितं निषादी ।
रोद्धुं महेभमपरिस्रढिमानमागा
दाक्रान्तितो न वशमेति महान्परस्य ॥ ४१ ॥

यामिति । गजेन्द्राः विकसतः समन्तात्पयसि तैलबिन्दुवत्प्रसरतो मदजलस्य चन्द्रकैश्चन्द्राकारैर्मण्डलैर्महानदीनां यान्नेत्रश्रियं विदधुः चक्रुस्तां नेत्रश्रियमुत्तरन्तो जलान्निर्गच्छन्तो धौतेषु क्षालितेष्वङ्गेषु लग्नैः सक्तैर्नवनीलपयोजपत्रैर्नवनीलोत्पलदलैरविलम्बितक्षिप्रमेव प्रत्यवापुः प्रतिभेजिरे । अत्र गजानां नदीनां च समनेत्रश्रीविनिमयोक्त्या समपरिवृत्तिरलङ्कारः । समन्यूनाधिकानाञ्च यदा विनिमयो भवेत् । सार्कं समाधिकन्यूनैः परिवृत्तिरसौ मतेति लक्षणात् ॥ ४० ॥

प्रतीति । अन्यदन्तिनम्प्रति प्रत्यन्यदन्ति प्रतिगजाभिमुखमित्यर्थः । लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः । चलितश्चावल्गं अत एव निशितेनाङ्कुशेन दूरङ्गाढं यथा तथा भिन्नं यत् निर्याणमपाङ्गदेशः । अपाङ्गदेशो निर्य्याणमित्यमरः । तस्मान्निर्यत् निःसरदसृक् यस्य तं महेभं रोद्धुं ग्रहीतुन्निषादी यन्ता परिस्रंहते प्रभवतीति परिस्रढः प्रभुः । स्रहतेस्र्हेर्वा कर्त्तरि क्त

सेव्योऽपि सानुनयमाकलनाय यन्त्रा
नीतेन वन्यकरिदानकृताधिवासः ।
नाभाजि केवलमभाजि गजेन शाखी
नान्यस्य गन्धमपि मानभृतः सहन्ते ॥ ४२ ॥

प्रत्यये प्रभौ परिवृढ इति नकारहकारयोर्लोपः निष्ठातकारस्य ढत्वञ्च निपात्यते अन्यथा ढलोपस्य सर्व्वत्रासिद्धेरिष्टनादिषु रन्ध्रतेश्चलादेर्लघोरिति रेफादेशेन स्यात् तस्मादिमनिचि रेफादेशे परिव्रढिमा ततोनञ् समासः । तनपरिव्रढिमानमसामर्थ्य मागात्प्राप । इणोगा लुङीति गादेशः । तथाहि महान् बलवान् अक्रान्तितोबलात्कारात्परस्य बध्नातीति । सामान्येन विशेष समर्थनरूपोऽर्थान्तरन्यासः ॥ ४१ ॥

सेव्यइति । यन्त्रा निषादिना आकलनाय बन्धनाय सानुनयं ससान्त्वं नीतेन समीपस्थापितेन गजेन वन्यगजदानैः कृतोऽधिवासोवासना यस्य सः तद्गन्धीत्यर्थः शाखी वृक्षः । ब्रीह्यादित्वादिनिः । सेव्योऽपि सन्नाभाजि नासेवि । भज सेवायां कर्म्मणि लुङि चिणोलुग्वृद्धिश्च । किन्तु केवलमभाज्यभञ्जीत्यर्थः । भञ्जि श्चामर्दने भञ्जेश्चिणीति विभाषानलोपः शेषम्पूर्व्ववत् । तथा हि मानभृतोऽहङ्कारिणोऽन्यस्य गन्धमपि न सहन्ते परं किमुतेति भावः । अतोऽत्रभञ्जनं युक्तमेवेत्यर्थः । पूर्व्ववदलङ्कारः ॥ ४२ ॥

अद्रीन्द्रेति अद्रीन्द्रस्य रैवतकस्य कुञ्जेषु चरति यस्तस्य कुञ्ज चरस्य कुञ्जरस्य गण्डकाषेण कपोलकषणेन सङ्क्रान्तं दानपयो मदाम्बु यस्य तस्मातएव सेनागजेन मथितस्य भग्नस्य वनपादपस्य

अद्रीन्द्रकुञ्जचरकुञ्जरगण्डकाष-
सङ्क्रान्तदानपयसो वनपादपस्य ।
सेनागजेन मथितस्य निजप्रसूनै-
र्मम्ले यथागतमगामि कुलैरलीनाम् ॥ ४३ ॥
नोच्चैर्यदा तरुतलेषु ममुस्तदानी-
माधोरणैरभिहिताः पृथुमूलशाखाः ।
बन्धाय चिच्छिदुरिभास्तरसात्मनैव
नैवात्मनीनमथ वा क्रियते मदान्धैः ॥ ४४ ॥

निजैरात्मीयैः प्रसूनैः पुष्पैः । निजमात्मीयनित्ययोरिति वैजयन्ती । मम्ले म्लानम् । म्लायतेर्भावे लिट् । अलीनां कुलैस्तु यथागतमगामि गतम् । आगतक्रमेणैव गतं न तु म्लानमित्यर्थः । आपद्यात्मीयानात्मीययोर्भेद इति भावः । गमेर्गत्यर्थस्याकर्मकत्व विवक्षणाद्भावे लुङ् । इभवनपादपादीनां विशेषणसाम्यादापन्ना द्यौपम्यप्रतीतेः कथञ्चित्समासोक्तिरूह्येया ॥ ४३ ॥

नेति । इभा यदा उच्चैरुन्नतेषु तरुतलेषु न ममुर्नावर्त्तन्त तदानीं आधोरणैर्नियन्तृभिरभिहिताः इमांश्छिन्त्युपदिष्टाः पृथुमूलशाखाः बन्धाय स्वबन्धनायैव तरसा बलेनात्मना स्वय मेव चिच्छिदुः न चैतद्युक्तमिति भावः । यद्वा मूढानां युक्तमेवे त्याह । अथ वेति । अथ वा मदान्धैरात्मनीनमात्मने हितं न क्रियतएव । आत्मन्विश्वजनभोगोत्तरपदात् खइति खप्रत्ययः आत्माध्वानौ खेइति प्रकृतिभावान्नस्तद्धितइति टिलोपो न । पूर्ववदर्थान्तरन्यासः ॥ ४४ ॥

उष्णोष्णशीकरसृजः प्रबलोष्मणोऽन्त
रुत्फुल्लनीलनलिनोदरतुल्यभासः ।
एकान् विशालशिरसो हरिचन्दनेषु
नागान्बबन्धुरपरान्मनुजा निरासुः ॥ ४५ ॥
कण्डूयतः कटभुवं करिणो मदेन
स्कन्धं सुगन्धिमनुलीनवता नगस्य ।
स्थूलेन्द्रनीलशकलावलिकोमलेन
कण्ठे गुणत्वमलिनां वलयेन भेजे ॥ ४६ ॥

उष्णोष्णेति । मनुजा नरा उष्णोष्णाः उष्णप्रकाराः । प्रकारे गुणवचनस्येति द्विर्वचनं कर्मधारयवत्सुपो लुक् । तान् शीकरान् सृजन्ति मुञ्चन्तीति तथोक्तान् । क्विप् । अन्तः प्रबलोष्मणः प्रवृद्धतापान् उत्फुल्लं विकचं । उत्फुल्लसम्फुल्लयोरुपसंख्यानमित्युपसर्गेऽपि फुल्लेर्निष्ठातत्वं । तस्य नीलनलिनस्य नीलोत्पलस्योदरेण तुल्यभासः समानकान्तीन् कृष्णवर्णानित्यर्थः विशालशिरसो विपुलमस्तकान् एकान् कतिचिन्नागान् गजानित्यर्थः हरिचन्दनेषु चन्दनविशेषेषु । तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियामित्यमरः । बबन्धुः अपरान्नागानहीनित्यर्थः । दुष्टाश्चाहिगजानागा इत्युभयत्रापि वैजयन्ती । निरासुः निष्काशयामासुः । अस्यते र्लिट् । अत्रोभयेषामपि नागानां प्रकृतत्वात्केवलप्रकृतश्लेषः ॥ ४५ ॥

कण्डूयतइति । कटभुवङ्गण्डस्थलङ्कण्डूयतः कषतः । कण्ड्वादिभ्यो यक् ततः शतृप्रत्ययः । कण्डूयतेर्ञिद्धातुप्रकृतित्वादुभय

निर्धूतवीतमपि बालकमुच्छलन्तं
यन्ता क्रमेण परिसान्त्वनतर्ज्जनाभिः ।
शिक्षावशेन शनकैर्वशमानिनाय
शास्त्रं हि निश्चितधियां क्व न सिद्धिमेति ॥ ४७ ॥

परिलं । करिणो मदेन सुगन्धिं शोभनगन्धं । गन्धस्येत्वे तदेकान्त ग्रहणं माद्रियन्ते कवयः । नगस्य वृक्षस्य स्कन्धं प्रकाण्डं अनुलीनवता तत्र संश्लिष्टेनेत्यर्थः । लीयतेर्निष्ठेति क्तवतुप्रत्ययः ल्वादिभ्य इति निष्ठानत्वं । स्थूलानामिन्द्रनीलशकलानां आवलिवत्कोमलेन मनोहरेणालिनां वलयेन कण्ठेगुणत्वं कण्ठवलयत्वं । मूर्द्धमस्तकात् स्वाङ्गादकामइत्यलुक् । भेजे प्राप्तम् । कर्म्मणि लिट् । अत्रालि वलये इन्द्रनीलमयकण्ठभूषणत्वारोपाद्रूपकालङ्कारः ॥ ४६ ॥

निर्धूतेति । यन्ता निषादी निर्धूतं निरस्तं वीतं पादघाता ङ्कुशवारणं यस्मिन् कर्म्मणि तद्यथा तथा उच्छलन्तमुत्प्लवमानमपि ॥ पादकर्म्म यतं प्रोक्तं यतमङ्कुशवारणं । उभयं वीतमाख्यातमिति हलायुधः । बालकम्पञ्चवर्षगजम् । पञ्चवर्षोगजोबालः पोतस्तु दशवार्षिकइति वैजयन्ती । शिक्षावशेन स्वकीयेन गजशास्त्रा भ्यासबलेन क्रमेण परिपाट्या परिसान्त्वनान्युपलालनानि तर्ज्जना भर्त्सनाश्च ताभिः शनैरेव शनकैः । अव्ययसर्व्वनाम्नामकच् प्राक् टेरिति स्वार्थेऽकच् प्रत्ययः । वशं शान्तिमानिनाय । तथा हि सुष्ठु निश्चितार्था धीरेषान्तेषाम्पुंसामित्यर्थः शास्त्रं क्व सिद्धिमेति स्वभ्यस्तं शास्त्रं सर्व्वत्र फलतीत्यर्थः । विभक्तधनाभ्रातरोविभक्ता इतिवद्धि निश्चितार्था धीर्निश्चितेत्युपचर्य्यते अतएवात्र गम्यमानार्थत्वाद् र्थपदस्याप्रयोगलक्षणोलोपइत्याहुः ॥ ४७ ॥